'अध्ययनमाला'याश्चतुर्थ-पञ्चम-कुसुमरूपो विशेषाङ्कः
श्रीमहावीर-परिनिर्वाण-
स्मृति-ग्रन्थः
प्रधानसम्पादकः—डॉ० मण्डनमिश्रः
सम्पादकः— डॉ० रुद्रदेवत्रिपाठी
प्रकाशनस्थलम्
श्रीलालबहादुरशास्त्री-केन्द्रीय-संस्कृत-विद्यापीठम्,
१/६ शान्तिनिकेतनम्, नई दिल्ली—२१
विद्यया विन्दतेऽमृतम्

दिल्लीस्थ-श्रीलालबहादुरशास्त्री-केन्द्रीय-संस्कृत-विद्यापीठस्य—'अनुसन्धान-प्रकाशन-विभाग'प्रवर्तिताया
'अध्ययनमाला'याश्चतुर्थ-पञ्चम-कुसुमरूपो विशेषाङ्कः

भगवतः श्रीमहावीरस्य पञ्चविंशतिशततम-निर्वाणमहोत्सवमभिलक्ष्य प्रकाशितः

श्रीमहावीर-परिनिर्वाण-

स्मृति-ग्रन्थः

प्रस्तावना-लेखकः

श्रीदेवनन्दनप्रसादयादवः

उपमन्त्री— केन्द्रीयशिक्षा-समाजकल्याणमन्त्रालयः

अध्यक्षः— शासीपरिषद्, राष्ट्रियसंस्कृत-संस्थानम्, दिल्ली

प्रधानसम्पादकः

डॉ० मण्डनमिश्रः, प्राचार्यः

सम्पादकः

डॉ० रुद्रदेवत्रिपाठी, प्रवाचको विभागाध्यक्षश्च

सह-सम्पादकः

डॉ० चक्रधरबिजल्वानः, व्याख्याता

प्रकाशनस्थलम्

श्रीलालबहादुरशास्त्री-केन्द्रीय-संस्कृत-विद्यापीठम्

१।६ शान्तिनिकेतनम्, नईदिल्ली-२१

१९७५-ई०

अनुक्रमणिका

प्रथमो भागः

[श्रीमहावीर-चरितामृतम्]

द्वितीयो भागः

[आर्हत-धर्म-सुषमा]

तृतीयो भागः

[जैनवाङ्मयानुशीलनम्]

प्रस्तावना

भारतीय ज्ञान-विज्ञान के मूल प्रवर्त्तकों में वैदिक व पौराणिक ऋषि-मुनियों व महामनीषियों के साथ ही
तिहासिक अवतारी महापुरुषों के नाम लिये जाते हैं, उनमें भगवान् महावीर का अन्यतम स्थान है । इस
नव ने अपने समय में भारतीय समाज को एक नई दिशा देने के साथ ही ज्ञान और आचार का एक ऐसा
प्रकाशपुञ्ज छोड़ा, जो भारत में ही नहीं अपितु संसार भर में मानवमात्र का पथ प्रशस्त करता रहेगा । ऐसी
भूतियों का स्मरण करना, उनके प्रति श्रद्धासुमन चढ़ाना तथा उनकी शिक्षा पर चलना प्रत्येक व्यक्ति की
र्या का अंग होना चाहिए, किन्तु आधुनिक जीवन की आपाधापी में अधिकतर व्यक्तियों के लिए यह सम्भव
पाता कि वे प्रतिदिन ऐसे कार्य में कुछ समय लगा सकें । इन्हीं व्यावहारिक कठिनाइयों को ध्यान में रखकर
हाविभूतियों के स्मरण का सामूहिक तथा सार्वजनिक रूप से आयोजन किया जाता है, जिससे कि विभिन्न
र्यों में अस्त-व्यस्त लोगों को भी, कुछ समय के लिए ही सही, अपने जीवन को लोकमंगल या आत्म-कल्याण
र प्रवृत्त करने का अवसर मिल सके । भगवान् महावीर की २५००वीं परिनिर्वाण शताब्दी पर देश-विदेश
योजित किए जाने वाले समारोहों ने हम सबको आत्मसुधार की आवश्यकता का स्मरण दिलाया है और
यह भी अवसर दिलाया है कि हम भी उनके प्रति कृतज्ञता व्यक्त कर सकें । "श्री लालबहादुर शास्त्री
संस्कृत विद्यापीठ, नई दिल्ली" के "अनुसन्धान विभाग" से भी इस अवसर पर **"महावीर-परिनिर्वाण-स्मृतिग्रन्थ"**
ाशन कर "आर्हत-ज्ञान-यज्ञ" में एक "लघु आहुति" देने का निश्चय किया गया, यह बहुत ही प्रसन्नता का
है ।

शिक्षा मन्त्रालय, भारत सरकार द्वारा संचालित "राष्ट्रिय संस्कृत संस्थान" के तत्त्वावधान में चल रहे
स्कृत विद्यापीठों में 'श्री लालबहादुर शास्त्री केन्द्रीय संस्कृत विद्यापीठ, नई दिल्ली' का एक प्रमुख स्थान है ।
ई० में इस विद्यापीठ की स्थापना हुई थी और तब से यह शैक्षिक तथा सांस्कृतिक दृष्टि से महत्त्वपूर्ण कार्य
ला आ रहा है । प्राच्य-पद्धति से आचार्य कक्षाओं तक अध्ययन-अध्यापन के अतिरिक्त यहां लगभग १००
भिन्न शास्त्रीय विषयों पर शोध-कार्य कर रहे हैं । इस विद्यापीठ से अबतक लगभग पच्चीस मानक ग्रन्थ
हो चुके हैं । विद्यापीठ की शोधपत्रिका को प्रायः विषय-विशेष के विशेषांकों के रूप में भी निकाला जाता
ान् महावीर के परिनिर्वाण के २५००वें वर्ष में देश-विदेश में सर्वत्र विभिन्न प्रकार के कार्यक्रमों, सम्मेलनों
साथ-साथ महान् ग्रन्थों का प्रणयन भी किया जा रहा है । ज्ञान के प्रचार-प्रसार में संलग्न विद्यापीठ
ना के लिए यह स्वाभाविक ही था कि वह भी भगवान् महावीर के प्रति युग की मांग के अनुरूप अपनी
क प्रकट करे ।

प्रस्तुत ग्रन्थ में हिन्दी, संस्कृत तथा अंग्रेजी में लिखित शोधलेखों का संकलन किया गया है । प्रथम भाग
महावीर की संस्कृत भाषा में जीवनी दी गई है और द्वितीय-तृतीय भाग में जैनदर्शन, जैनसंस्कृति तथा जैन

ग्राचार्यों से सम्वन्धित लेख हैं ।

राष्ट्रिय संस्कृत संस्थान के तत्त्वावधान में संचालित सभी विद्यापीठों में प्राच्य-पद्धति से पठन-पाठन तथा ग्रनुसन्धान के द्वारा भारत के प्राचीन महामनीषियों के प्रति ग्रादरभावना को वढ़ाने पर ही नहीं, वल्कि उनके द्वारा प्रवर्तित ग्रहिंसा, ग्रपरिग्रह ग्रादि को जीवन में ग्रपनाने पर भी वल दिया जाता है । भगवान् महावीर की स्मृति में इस ग्रन्थ का संकलन या निर्माण कर विद्यापीठ ने एक प्रकार से भारत की समस्त संस्कृत-शिक्षण-संस्थाग्रों का भी प्रतिनिधित्व किया है । संस्कृत का विशाल वाङ्मय भगवान् राम, भगवान् कृष्ण, महात्मा बुद्ध ग्रादि के समान भगवान् महावीर का भी विशेष रूप से ऋणी है । वस्तुतः भारत की महत्ता का एक प्रमुख ग्राधार यह भी रहा है कि हमारे पूर्वजों ने "शुभ", "उत्तम" या "मंगलमय" के लिये ग्रपने मस्तिष्कों के द्वार कभी भी वन्द नहीं किये । जैन दर्शन में ग्रनेकान्तवाद का वड़ा महत्त्व है ग्रौर इसका प्रमुख ग्राशय यही है कि ग्रपने दृष्टिकोण को सही मानते हुए भी ग्रधिकतर सांसारिक मामलों में ग्रन्य लोगों के दृष्टिकोणों पर भी समुचित ध्यान दिया जाना चाहिए । सामाजिक मामलों में यदि हम ग्रपने दृष्टिकोण को उदार वना लें तो उससे कई सामाजिक बुराइयों की समाप्ति हो सकती है । भगवान् महावीर के ग्रन्य सिद्धान्त भी वड़े उपयोगी हैं । यदि उनमें से कुछ को भी हम ग्रपने जीवन में ग्रपना सकें तो निश्चय ही हमारा कल्याण होगा ।

इस ग्रन्थ के संकलन, सम्पादन तथा प्रकाशन में ग्रनुसन्धान-विभाग ने जो परिश्रम किया, उसके लिये वह साधुवाद का पात्र है । जिन विद्वानों ने इस ग्रन्थ के लिए लेख भेजे, उनका मैं विशेष रूप से धन्यवाद करता हूं इन दो शब्दों के साथ इस "ग्रध्ययनमाला-विशेषांक" को मैं भगवान् महावीर की स्मृति में समर्पित करता हूं ।

भगवान् महावीर परिनिर्वाण-दिवस

—देवनन्दनप्रसाद यादव

अनुमोदना-सन्देशः

"श्रीलालबहादुरशास्त्री-केन्द्रीय-संस्कृत-विद्यापीठ"स्य पंचविंशतिशततमं निर्वाण-महोत्सवं लक्ष्यीकृत्य भग-
ावीरस्य पुण्यस्मृतेर्निर्णयो यावान् सामयिकस्तावानेव हितावहः ।

भगवता महावीरेण शाश्वत-सत्यानामुद्घाटनं कृतम् । तत्र सामयिक-सत्यानि स्वयं समाहितानि
शाश्वतसत्यं त्रिकालाबाधितं भवति । यतः समस्यानां समाधानस्य समीचीनो दृष्टिकोणो न लभ्येत तन्न
तत्यं भवेत् । मन्येऽहं ये-ये अध्यात्मसिन्धौ निमज्जनमकार्षुस्ते सर्वेपि सत्य-दर्शिनो महात्मानः सत्यस्य शाश्वतं
कटयाञ्चक्रुः । महावीरस्य दृष्टौ ते सर्वेपि महावीरा एव । अतो महावीरस्य स्मृतिरस्ति सर्वेषां शाश्वतसत्यस्य
णां स्मृतिरथवा साक्षात् शाश्वतसत्यस्य स्मृतिः । अनुमोदेऽहं अस्मिन् पुण्यकार्ये प्रवृत्तानां भवतां सर्वेषां
वनाम् ।

आचार्यः तुलसी

ा हाउस,
र (राजस्थान)

[श्वेताम्बर जैन तेरापन्थी संघ से वर्तमान आचार्य]

शुभकामना

फोन { आगरा ७२२०२
नई दिल्ली: ३८६७३४

३२ ए, भगवती देवी जैन मार्ग
आगरा कैन्ट
दिनांक ११-१०-७५

नाई,

आपका पत्र दिनांक ४-१०-७५ का मिला । धन्यवाद ।

मुझे जानकर प्रसन्नता हुई कि आप श्री भगवान् महावीर की २५००वीं निर्वाण शताब्दी के अवसर पर
की ओर से "श्री महावीर-परिनिर्वाण-स्मृतिग्रन्थ" (विशेषांक) प्रकाशित कर रहे हैं । उस उपयोगी और
न आयोजन के लिए बधाई एवं आपका कार्य सानन्द सम्पन्न हो इसके लिए शुभ कामनाएँ ।

आपका—

अचलसिंह
सदस्य लोकसभा
८७, नार्थ एवेन्यू, नई दिल्ली

प्रधानसम्पाद्कीय

भगवान् महावीर की २५००वीं परिनिर्वाण शताब्दी पर भारत ही नहीं अपितु विश्वभर में अनेक कार्यक्रमों का आयोजन किया गया है। इस पुनीत अवसर पर 'श्री लालबहादुर शास्त्री केन्द्रीय संस्कृत विद्यापीठ' के 'अनुसन्धान-विभाग' द्वारा प्रवर्तित अनुसन्धान-पत्रिका 'अध्ययनमाला' के विशेषाङ्क के रूप में संकलित, सम्पादित तथा प्रकाशित "श्रीमहावीर-परिनिर्वाण-स्मृति-ग्रन्थ" आपके समक्ष प्रस्तुत करते हुए मुझे अत्यन्त हर्ष का अनुभव हो रहा है।

विद्यापीठ की बहुविध गतिविधियों में अनुसन्धान व प्रकाशन का अत्यधिक महत्त्व है। १९६२ ई० में इस विद्यापीठ की स्थापना हुई थी और तब से लेकर अब तक यहाँ से लगभग ३० मानक ग्रन्थों का प्रकाशन हो चुका है। इसके अतिरिक्त लगभग १०० छात्र विभिन्न शास्त्रीय विषयों पर शोधकार्य कर रहे हैं। संस्कृत की शिक्षा को अधिकाधिक लोकोपयोगी बनाने तथा शोध की प्रक्रिया को युग की माँगों के अनुरूप चलाने के लिए विद्यापीठ में शोध-प्रशिक्षण सत्रों का आयोजन भी किया जाता है। इसके साथ ही भारतीय संस्कृति, सभ्यता तथा पुरातत्त्व की दृष्टि से जिन स्थानों पर अन्वेषण के लिए उपयोगी सामग्री मिलने की सम्भावना है, उनकी यात्राएँ करना और महत्त्वपूर्ण पाण्डुलिपियों का संग्रह भी शोधविभाग के कार्यक्रमों में समाविष्ट है। शोधविभाग की मुख-पत्रिका 'अध्ययनमाला' को अपेक्षानुसार विषय-विशेष से सम्बन्धित विशेषांकों के रूप में भी प्रकाशित किया जाता है।

ज्ञान तथा आचार के विश्लेषण की दृष्टि से श्रीमहावीर-परिनिर्वाण शताब्दी से सम्बन्धित कार्यक्रमों का एक ऐतिहासिक महत्त्व है। संस्कृत-वाङ्मय के क्षेत्र में जिन अनेक महापुरुषों का प्रभाव रहा, उनमें भगवान् महावीर का महत्त्वपूर्ण स्थान है। प्रस्तुत स्मृतिग्रन्थ द्वारा हमने एक प्रकार से समस्त संस्कृत-प्रेमियों की ओर से भी भगवान् महावीर के प्रति श्रद्धाञ्जलि अर्पित करने का प्रयास किया है। कतिपय कठिनाइयों के कारण इस ग्रन्थ का आकार बृहद् नहीं हो पाया और अन्य भी कई प्रकार की त्रुटियाँ अवश्य ही रह गई होंगी। भगवान् महावीर की शिक्षाओं के अनुरूप अपने जीवन को ढालना तो आजकल कतिपय सिद्ध-मुनियों के अतिरिक्त अन्य साधारण लोगों के लिए कठिन ही हो गया है फिर भी निष्ठापूर्वक प्रयत्न करते रहने से हम कुछ-न-कुछ तो आत्मकल्याण कर ही सकते हैं। महापुरुषों के स्मृति-दिवसों या निर्वाण शताब्दियों को सामूहिक रूप से मनाते रहने का उद्देश्य उनके प्रति श्रद्धाञ्जलि अर्पित करना तो है ही, साथ ही इससे एक ऐसा पवित्र वातावरण भी बनता है, जिससे कई लोगों के जीवन में एक शुभ मोड़ भी आ जाया करता है। 'श्री लालबहादुर शास्त्री केन्द्रीय संस्कृत विद्यापीठ' की शिक्षा-पद्धति तथा आचार-प्रणाली में अहिंसा आदि शाश्वत सिद्धान्तों का पर्याप्त समावेश है, विद्यापीठ के छात्रों, स्नातकों, शुभचिन्तकों, शिक्षकों व अधिकारियों में भगवान् महावीर के प्रति आदर-भावना रखनेवालों की संख्या बहुत अधिक है। संस्कृत के पाठ्यग्रन्थ तथा शिक्षणक्रम में भी प्रायः उन सभी अच्छाइयों का समावेश किया गया है, जिनकी वजह से भारत को जगद्गुरु माना जाता रहा है। कहना न होगा कि सांस्कृतिक, दार्शनिक तथा सामाजिक दृष्टि से भगवान् महावीर ने हमारे देश को अपने समय में एक ऐसा मार्ग दिखाया, जिस पर चलकर

मनुष्य रागद्वेष तथा सांसारिक बन्धनों से मुक्ति पा सकता है। भगवान् महावीर की २५००वीं निर्वाण शताब्दी पर विदेशों में भी जो असाधारण समारोह आयोजित किये गये, उनसे यह स्वतःसिद्ध है कि जैनधर्म व दर्शन के प्रति आदर की भावना विश्वव्यापिनी है। ऐसी स्थिति में विद्यापीठ द्वारा स्मृतिग्रन्थ का यह प्रकाशन-आयोजन आकार की दृष्टि से विशाल न होने पर भी भावना की दृष्टि से तो किसी भी अन्य आयोजन से कम नहीं है। भगवान् राम को शबरी के बेर बड़े सुन्दर लगे थे। भगवान् कृष्ण ने विदुर की सूखी रोटियाँ आनन्द से खायीं थीं। भगवान् बुद्ध के सम्बन्ध में भी यह कथा प्रचलित है कि जब धूल में खेलते हुए एक बालक ने उनके भिक्षापात्र में एक मुट्ठी धूल डाली तो उन्होंने अपने साथियों से यह कहते हुए धूल को स्वीकार किया कि "वस्तु का नहीं भाव का मूल्य समझा जाना चाहिए, इस बालक की सहज श्रद्धा व दानवृत्ति का महत्त्व समझा जाना चाहिए। श्रद्धापूर्ण समर्पण के संस्कारों को कुचलने की अपेक्षा उन्हें पल्लवित होने देना चाहिए।" इसी प्रकार भगवान् महावीर ने भी चंदना के बासी बाकले स्वीकार किये थे। जिससे यह सिद्ध होता है कि जब हम किसी महाशक्ति या महापुरुष के प्रति लघुरूप में भी अपनी श्रद्धा व्यक्त करते हैं तो उस समय विचारणीय बात यह नहीं रह जाती कि हमारी श्रद्धा का उपादान श्रद्धेय के गौरव के अनुरूप है या नहीं। उस समय तो यही देखा जाना चाहिए कि हमारी श्रद्धा निस्स्वार्थ, निश्छल तथा समग्र है या नहीं। इस दृष्टि से यदि विद्वद्गण विचार करेंगे तो यह लघुग्रन्थ निश्चय ही अपने उद्देश्य की पूर्ति करता हुआ दिखाई देगा।

यह बात मैं और भी स्पष्ट कर देना चाहूँगा कि इस विद्यापीठ की कोई भी गतिविधि लोक दिखावे, आत्मप्रचार या महज खानापूर्ति के लिए नहीं होती। आरम्भ से ही इस विद्यापीठ की यह परम्परा रही हैं कि जिन मूल्यों के लिए भारत सदैव सचेत रहा और जिनकी वजह से पराधीनता की बेड़ियों में बँधकर भी हमारे देशवासी अपने अस्तित्व को सुरक्षित कर सके, उनको यह विद्यापीठ अपने क्रिया-कलापों से उजागर करता रहे। सम्भवतः यही कारण है कि विद्यापीठ के स्नातक युग की मांग तथा भारतीय नेताओं के मार्गदर्शन के अनुरूप भारतीय समाज की बुराइयों को दूर करने व विभिन्न रूपों में देश की सेवा करने में देश की किसी भी अन्य सस्था के छात्रों से पीछे नहीं हैं। मैं इस बात का इस दृष्टि से भी उल्लेख कर रहा हूँ कि हम ज्ञान के साथ-साथ आचार को भी समान महत्त्व देते हैं और अहिंसा, छूआछूतनिवारण, अपरिग्रह आदि आर्हत-सिद्धान्त हमारे लिए अध्ययन के ही नहीं, व्यवहार के भी निदर्शक हैं। संस्कृत की परम्परीण शिक्षा के साथ युगानुरूप आचार के ऐसे सम्मिश्रण की बड़ी आवश्यकता थी। भगवान् महावीर ने अपने समय में स्वयं भी इस ओर पर्याप्त ध्यान दिया था और इस प्रकार विद्यापीठ भी अपनी अल्पशक्ति व सीमा के अनुसार इस महनीय कार्य में सतत संलग्न है।

इस ग्रन्थ को तीन भागों में विभक्त किया गया है। प्रथम भाग—**'श्रीमहावीरचरितामृतम्'** में विभिन्न जैनग्रन्थों के आधार पर भगवान् महावीर की जीवनी संस्कृत में दी गई है। विद्यापीठ के शोधविभाग के प्रवाचक डा० रुद्रदेव त्रिपाठीजी ने इस भाग को सरल तथा सुललित संस्कृत में लिखा है. जिससे कि केवल संस्कृत जाननेवालों को भी इससे लाभ हो सके और उन लोगों को भी इसे समझने में कठिनाई न हो जो संस्कृत नहीं जानते। द्वितीय भाग **'आर्हत-धर्म-सुषमा'** में जैनधर्म के वर्तमान आचार्यों तथा मुनियों के लेख समाविष्ट किये गये हैं। इन से निश्चय ही ग्रन्थ का गौरव बढ़ा है और एक प्रकार से आर्हत धर्म व दर्शन की वर्तमान महाविभूतियों का भी अनुमोदन हमें प्राप्त हुआ है। तृतीय भाग—**"जैनवाङ्मयानुशीलनम्"** में विभिन्न विद्वानों के शोधपूर्ण लेखों का संकलन किया गया है। इस प्रकार इस ग्रन्थ को सब प्रकार से उपयोगी बनाने का भरसक प्रयास किया किया गया है। हमें कहाँ तक इसमें सफलता मिली-इसका निर्णय तो हमारे नीरक्षीर-विवेकी पाठक ही कर सकेंगे।

इस ग्रन्थ के लिए सन्देश व शोधलेख भेजने का जिन-जिन महानुभावों ने कष्ट उठाया, उनके प्रति हम हार्दिक आभार व्यक्त करते हैं। केन्द्रीय शिक्षा एवं समाजकल्याण उपमन्त्री तथा राष्ट्रिय संस्कृत संस्थान की शासी परिषद् के अध्यक्ष **श्री देवनन्दन प्रसाद यादव जी** ने इस ग्रन्थ की प्रस्तावना लिखने की कृपा की। उनके प्रति भी हम कृतज्ञताज्ञापन करते हैं। इस ग्रन्थ के संकलन सम्पादन तथा प्रकाशन में विद्यापीठ के अनुसन्धान-विभाग के प्रवाचक डॉ० रुद्रदेव त्रिपाठी तथा शोधव्याख्याता डॉ० चक्रधर बिजल्वान ने जो रुचिपूर्वक परिश्रम किया, वह प्रशंसनीय है। संस्थान के वर्तमान निदेशक श्री प्रभातचन्द्र शर्माजी तथा विद्यापीठ की स्थानीय प्रबन्धसमिति के अध्यक्ष संसद्-सदस्य श्रीराजाराम शास्त्री जी के शुभाशीर्वाद के बिना यह पुनीत कार्य सम्पन्न नहीं हो सकता था, अतः उनका भी मैं हार्दिक धन्यवाद करता हूँ।

इस ग्रन्थ के प्रकाशन का कार्य शाम प्रिंटिंग एजेन्सी के स्वत्वाधिकारियों ने बड़ी शीघ्रता से किया है, अतः वे भी धन्यवाद के पात्र हैं। ग्रन्थ के मुद्रण आदि में अवश्य ही कुछ त्रुटियाँ रह गई होंगी, उनके लिए अपने सुविज्ञ पाठकों से क्षमायाचना करते हुए मैं इस ग्रन्थ को दिल्लीस्थ श्री लालबहादुर शास्त्री केन्द्रीय संस्कृत विद्यापीठ परिवार की ओर से भगवान् महावीर की २५००वें निर्वाण पर्व पर उनके श्रीचरणों में सादर समर्पित करता हूँ।

नईदिल्ली
७ नवम्बर, १९७५

डॉ० मण्डन मिश्र
प्रधानसम्पादक तथा प्राचार्य

सम्पादकीयम्

भारतस्य राजधान्यां विराजमानमिदं विद्यापीठं संस्कृत-विद्याया अध्ययनाध्यापनाय तथैकस्यान्ताराष्ट्रियस्य संस्कृतसंस्थानस्य न्यूनतामपनेतुमखिलभारतीय-संस्कृत-साहित्य-सम्मेलनेन विजयदशम्यां १९६२ ईशवीयवत्सरे संस्थापितम् । अस्येद सौभाग्यमासीद् यदस्य शासननिकायस्याध्यक्ष्यमपि भूतपूर्व-प्रधानमन्त्रि-श्रद्धेयश्रीलालबहादुर-शास्त्रिभिः स्वीकृतं तथा तेषामेव नेतृत्वे 'अखिल-भारतीय-संस्कृत-विद्यापीठ' नाम्ना च पञ्जीकृतम् ।

स्वर्गत-श्रीशास्त्रिमहाभागानां प्रेरणया विद्यापीठं पर्याप्तं बलमाप्तवत् तथा तैः प्रधानमन्त्रिसदृशस्य गौरवपूर्णस्य पदस्य दायित्वं निर्वहद्भिरपि संस्थाया अस्या विकासे महती रुचिर्गृहीता । वाराणसेय-संस्कृत-विश्वविद्यालयस्य वाराणस्यां सम्पन्ने दीक्षान्तसमारोहे (२६ दिसम्बर १९६४ ई० वत्सरे) तथा २७ नवम्बर-१९६५ ईशवीयवत्सरे नेपालदेशस्य महाराजाधिराजश्रीमहेन्द्रमहाभागानामुपस्थितौ दिल्ल्यां सम्पन्नस्यास्य विद्यापीठस्य भवन-शिलान्याससमारोहे तैरिदं विद्यापीठमेकमन्ताराष्ट्रियसंस्थानं निर्मातुं घोषितम् । ते स्वजीवनस्यान्तिमसमयावध्यस्या-ध्यक्षा आसन् तेषां नेतृत्वे च द्वित्रवर्षात्मके समय एव संस्थानेनानेन देशस्य शिक्षण-संस्थासु स्वीयं महत्त्वपूर्णं स्थानं निर्मितम् ।

तेषां निधनानन्तरं विद्यापीठस्य सेवास्तथा स्व० श्रीशास्त्रिभिः सह विद्यापीठस्यैतिहासिक-सम्बन्धा-नवलोक्य भारतस्य प्रधानमन्त्रि-श्रीमतीइन्दिरागांधीमहाभागाभिरपि विद्यापीठस्य सभापतिपदं स्वीकृतं तथा ताभिः २अक्टूबर १९६६ वत्सरे विद्यापीठस्य भारत-सर्वकारद्वाराधिग्रहणस्यार्थ च श्रीशास्त्रिणां सेवाभ्यः श्रद्धाञ्जलि-समर्पणदृष्ट्याऽस्य 'श्रीलालबहादुरशास्त्री राष्ट्रिय-संस्कृतविद्यापीठ' नाम स्थापनायोद्घोषितम् । प्रधानमन्त्रिमहाभा-गानामाध्यक्ष्ये दिल्ल्या उपराज्यपाला डॉ० आदित्यनाथझामहानुभावाः कार्यवाहकाध्यक्षरूपेण विद्यापीठस्योन्नतौ महत्त्वपूर्णं योगदानं कृतवन्तः ।

प्रधानमन्त्रिश्रीमतीन्दिरामहाभागानां घोषणानुसारं भारतसर्वकारस्य शिक्षामन्त्रालयेनैकस्याः स्वाय-त्तसंस्था—(ऑटोनोमसबाडी)या रूपेण अप्रैल १९६७ ईशवीयवत्सरात् विद्यापीठस्याधिग्रहण कृतं तथाऽस्य सञ्चाल-नायैकस्याः सभायाः स स्थापनामप्यमकरोत्— यस्याः सभापतयो भारत-सर्वकारस्य नागरविमानन-मन्त्रिणो डॉ० कर्ण-सिंहमहोदयास्तथा श्रीचपलाकान्तभट्टाचार्या (भूतपूर्व-संसत्सदस्याः) आसन् । दि० २१-१२-१९७० ई० वर्षतोऽस्य विद्यापीठस्य 'राष्ट्रिय-संस्कृत-संस्थाने'नाधिग्रहणं विहितं तथाऽस्य व्यवस्थाया एकां 'स्थानीयप्रबन्ध-समिति'मस्थापयत् । तदा प्रभृत्येवास्य विद्यापीठस्य श्रीलालबहादुरशास्त्रीकेन्द्रीयसंस्कृतविद्यापीठ'मिति नाम विद्यते । साम्प्रतञ्चास्याः स्थानीय-प्रबन्ध-समितेः सभापतयः प्रो० राजारामशास्त्रिणः संसत्सदस्याः सन्ति ।

विद्यापीठस्य कार्यकलापाः

विद्यापीठस्य महल्लक्ष्यं संस्कृतस्यान्ताराष्ट्रियकेन्द्ररूपेण कार्यसम्पादनमस्ति । परं साम्प्रतिकानां साधनानां सौविध्यानां च दृष्ट्या निम्नाङ्कितानां प्रवृत्तीनां सञ्चालनं विद्यापीठस्य तत्त्वावधाने क्रियते—

(१) अनुसन्धान-प्रकाशन-विभागः ।
(२) पाण्डुलिपि-सङ्ग्रहः पुस्तकालयश्च ।
(३) स्नातकोत्तर-सङ्कायः ।
(४) प्रशिक्षण-सङ्कायः ।
(५) शारदीय-ज्ञान-महोत्सवायोजनमन्याः प्रवृत्तयश्च ।

एताः सर्वा अपि प्रवृत्तयः स्वे स्वे वर्त्मनि नित्यश उत्तरोत्तरं वर्धमानाः सत्यो राजधान्यां भारतीय-संस्कृते-र्गौरवानुरूपाणि संस्कृत-साहित्य-संवर्धनशालीनि कार्याणि च सम्पादयितुं सहायिका भवन्ति ।

अनुसन्धान-प्रकाशन-विभागः

एतासु प्रवृत्तिषु ई० सन् १९७३ तमे वत्सरे— 'अनुसन्धान-प्रकाशन-विभाग'स्य स्थापनयाऽत्र विविधशास्त्रेषु प्रायः शतं छात्राः वाचस्पति (पी-एच ०डी०) विद्यावारिधि (डी० लिट्०) शोधोपाधिभ्यां शोधकार्याणि सम्पादयन्ति । शिक्षामन्त्रालयद्वारा विद्यापीठद्वारा च कतिभ्यश्चिच्छात्रेभ्यो द्विशतरूप्यकाणां वृत्तयोऽपि दीयन्ते ।

साम्प्रतं चतुर्भ्यश्छात्रेभ्यो वाराणसेयसंस्कृतविश्वविद्यालयात् पदवीप्रदानमप्यभूत् । एवमेव राष्ट्रियसंस्कृत-संस्थानस्य पदवीप्राप्तये पञ्च तथा वा० सं० विश्वविद्यालयात् पदवीलब्धये त्रयः शोधप्रबन्धाः १९७४-७५ वर्षे प्रस्तुताः सन्ति ।

सहैवास्मिन् विभागे महत्त्वपूर्णानां ग्रन्थानां प्रकाशनमपि क्रियते । अद्य यावद् 'अखिलभारतीय-संस्कृत-साहित्यसम्मेलन'स्य तत्त्वावधाने कार्यं कुर्वता पञ्च ग्रन्थानां तथा ततः परं प्रायः पञ्चविंशति महत्त्वपूर्णग्रन्थानां च प्रकाशनं विहितम् । साम्प्रतं 'तैत्तिरीय-संहितायास्तदीयस्य सायणभाष्यस्य च हिन्द्यनुवादस्तथा 'देवीपुराण'स्य प्रकाशनं प्रवर्तते । वर्षद्वयादस्मादेव विभागाद् 'अध्ययनमाला' नाम्नैकस्य शोधनिबन्धात्मक-प्रकाशनस्य शुभारम्भः सञ्जातोऽस्ति यस्य प्रथम कुसुमं १९७२-७३ ई० वर्षे प्रकाशितम् । द्वितीय-तृतीयकुसुमरूपो विशेषाङ्कश्च स्व० म० म० श्रीपरमेश्वरानन्दशास्त्रि-स्मृतिग्रन्थः १९७३-७४ ई० वर्षे प्रकाशितः । चतुर्थ-पञ्चमकुसुमरूपेणायं "श्रीमहावीर-परि-निर्वाण-स्मृतिग्रन्थः" पाठकानां पुरत उपस्थाप्यत एव ।

एतदतिरिक्तमस्मिन् विभागे 'भारतीय-दर्शन-कोश'-निर्माण-योजनाऽपि स्वीकृता विद्यते, यस्याः पूर्तये सम्प्रति न्यायविषये पारिभाषिकशब्दानां सङ्कलनं प्रवर्तितमस्ति ।

सहैवानेन विभागेन शोधच्छात्राणां सौकर्याय प्रतिसप्ताहमेका सङ्गोष्ठी सम्पाद्यते यस्यामनुसन्धित्सवः स्वस्वविषयकान् निबन्धान् पठन्ति । तेषु तेषु विषयेषु च विविधाश्चर्चा भवन्ति । अस्मिन्नेव वर्षे विभागेऽस्मिन्

'अनुसन्धान-प्रशिक्षण-सत्र'स्याप्यारम्भोऽक्रियत यस्मिन् त्रिषु मासेषु चतुर्विंशतिसङ्ख्यकैर्विद्वद्भिः शोध-प्रक्रियाया विषयानधिकृत्यैकत्रिंशद्व्याख्यानानि प्रदत्तानि । तत्र प्रदत्तानां भाषणानां शीर्षकैः सह भाषणकर्तॄणां नामसूची निम्नाङ्किता विद्यते—

दिसम्बर १९७४ तो मार्च १९७५ पर्यन्तं
अनुसन्धान-प्रशिक्षणसत्रस्य
वक्तारो व्याख्यान-विषयाश्च

वक्ता	विषय
१—डॉ० नगेन्द्र	(१) अनुसन्धान की अर्थमीमांसा ।
२—डॉ० मण्डन मिश्र	(१) परम्परीण संस्कृत शिक्षा में नवीन प्रणाली से अनुसन्धान कार्य की विधियाँ व दिशाएँ ।
३—श्री अमीरचन्द्र शास्त्री	(१) गीता के परिप्रेक्ष्य में—शोध और योग । (२) साहित्य सम्बन्धी शोध के आयाम ।
४—डॉ० दयानन्द भार्गव	(१) संस्कृत अनुसन्धान की प्रकीर्ण समस्याएँ ।
५—डॉ० सत्यकाम वर्मा	(१) वैदिक अनुसन्धान की दिशाएँ । (२) भाषा-विज्ञान में अनुसन्धान की अपेक्षाएँ तथा दिशाएँ ।
६—डॉ० सुबेसिंह राणा	(१) शोधकार्य में अभिलेखों के उपयोग की प्रक्रिया ।
७—डॉ० कृष्णलाल नादान	(१) शोध प्रक्रियाएँ और पद्धति ।
८—डॉ० (श्रीमती) नम्बियार	(१) शोध-प्रबन्ध में पादटिप्पणियाँ जोड़ने की विधि ।
९—श्री सी० आर० स्वामिनाथन्	(१) पाण्डुलिपि-विज्ञान ।
१०—डॉ० रुद्रदेव त्रिपाठी	(१) शोधकार्य में रूपरेखा-निर्माण तथा प्रस्तावनाएँ । (२) शोधकार्य और अनुवाद की प्रक्रिया । (३) प्रूफशोधन एवं टंकण-सम्बन्धी कतिपय ज्ञातव्य तत्त्व ।
११—डॉ० सत्यपाल नारंग	(१) शोध उपकरण ।
१२—डॉ० योगेशदत्त शर्मा	(१) साहित्य सम्बन्धी अनुसन्धान की दिशाएँ ।
१३—डॉ० मधुसूदन मिश्र	(१) भाषाविज्ञान सम्बन्धी अनुसन्धान की प्रक्रिया एवं दिशाएँ ।
१४—डॉ० लालबहादुर शास्त्री	(१) जैन-साहित्य में शोध के आयाम ।
१५—डॉ० तीर्थराज त्रिपाठी	(१) व्याकरण सम्बन्धी शोधकार्य की अपेक्षाएँ व सीमाएँ ।
१६—श्री बृज विहारी स्वरूप	(१) शोध की सीमाएँ । (२) समस्या का चयन ।
१७—डॉ० ओमप्रकाश सिंहल	(१) अनुसन्धित्सुओं की अर्हताएँ ।

१८—डॉ० चक्रधर बिजल्वान	(१) तुलनात्मक अनुसन्धान की अपेक्षाएँ, सीमाएँ व दिशाएँ । (२) शोधकार्य में कोशों के उपयोग की प्रक्रिया ।
१९—श्री रामशरण शास्त्री	(१) संस्कृत नाटकों से सम्बन्धित अनुसन्धान की दिशाएँ ।
२०—श्री ओमप्रकाश शर्मा	(१) शोधकार्य में संस्कृत और हिन्दी साहित्य का पारस्परिक सम्बन्ध ।
२१—डा० हर्षनाथ मिश्र	(१) व्याकरण सम्बन्धी शोधकार्य की दिशाएँ । (२) काव्यशास्त्र सम्बन्धी अनुसन्धान की अपेक्षाएँ तथा दिशाएँ ।
२२—श्रीबलिराम शुक्ल	(१) न्यायशास्त्र सम्बन्धी अनुसन्धान की अपेक्षाएँ तथा दिशाएँ ।
२३—श्रीचन्द्रहास शर्मा	(१) प्रशिक्षण और अनुसन्धान ।
२४—श्रीविश्वप्रकाश	(१) काव्यशास्त्रीय ग्रन्थों से सम्बन्धित अनुसन्धान-कार्य की दिशाएँ ।

एतानि व्याख्यानानि यथावसरं संस्कृते हिन्द्यां वा प्रवर्तितानि । प्रशिक्षण-सत्रेऽस्मिन् प्रायः ४० छात्रा उपस्थिता अभूवन् । एतेषु ये पूर्णरूपेणोपस्थितिमदुस्तेभ्यो विद्यापीठादेकैकं प्रमाण-पत्रमपि प्रदत्तम् । अयमेव कार्यक्रमोऽस्मिन्नपि वर्षे प्रचलिष्यति नवीनाश्छात्राश्चानेन लाभान्विता भविष्यन्तीत्याशास्महे ।

स्मृतिग्रन्थ-निदर्शनम्

इदं तु सर्वविदितमेव यदेषमो भगवतो महावीरस्य पञ्चविंशतिशततमं निर्वाणवर्षमभिलक्ष्य न केवलं भारतदेश एवापि तु समग्रेऽपि विश्वेऽहिंसा-संयम-त्यागमयजीवन-सदृशानामुच्चादर्शाणां भावनायाः प्रचार-प्रसाराय 'श्रमणसंस्कृति' समुपासकैरभिनवान्यायोजनानि विहितानि । अयं 'जैनधर्मस्याभ्युदयस्याभूतपूर्वः प्रसङ्ग' इति विचार्यास्मिन् वर्षे यावच्छक्ति सर्वैरपि तदनुयायिभिः शासन-शासनाधिकर्तृभिश्च पूर्णेन हृदयेन सत्याहिंसा-संयम-तपः-प्रवृत्तीनां प्रतिजनं विकासकामनया सहयोगः प्रदत्तः । भगवतो महावीरस्योपदेशानां प्रतिगृहं ससम्मानं ग्रहणं भवेत् तथा सर्वोऽपि जनस्तान् स्वकीये जीवनेऽवतार्य तथा व्यवहरेदिति धिया नाना ग्रन्थानां स्मृति-ग्रन्थानां पत्र-पत्रिकाणां च प्रकाशनानि प्रतिज्ञातानि ।

विद्यापीठमिदं प्रारम्भादेव संस्कृत-शिक्षापद्धतौ जैन-दर्शनस्याध्ययनाध्यापनादिषु सततं जागरूकमेवास्ति । न केवलं शास्त्र्याचार्यकक्षास्वेवात्र छात्रा अधीयतेऽपि तु ते शोध-कार्येऽपि विशिष्टां रुचिं दर्शयन्ति । इतः शोधोपाधिप्राप्तये श्रीमुक्ताप्रसादपटेरियाजैनदर्शनाचार्येण **'जैनदर्शन आत्म-द्रव्यविवेचनम्'** इति विषयमवलम्ब्य वाराणसेय-संस्कृत-विश्वविद्यालयाद् विद्यावारिधि (पी-एच० डी०) रित्युपाधिः प्राप्तः । अस्मिन्नेव वर्षे श्रीदामोदरशास्त्रि-व्याकरणाचार्येण राष्ट्रिय-संस्कृतसंस्थानाद् वाचस्पति(पी-एच० डी०)रित्युपाधये स्वीयो **"भारतीयदर्शनपरम्परायां जैनदर्शनाभिमतं देवत्वम्"** इति शीर्षकः शोधप्रबन्धः समर्पितः । एवमेव 'संस्कृतसाहित्ये श्रीसमन्तभद्रस्य योगदान' तथा 'जैनपद्मपुराणस्य समीक्षात्मकमध्ययन'मित्यादिषु विषयेष्वपि केचन छात्राश्छात्राश्च शोधकार्याय तत्पराः सन्तीति प्रमोदावहमेव ।

वर्षेऽस्मिन् भगवतो महावीरस्य पञ्चविंशतिशततमनिर्वाण-महोत्सवावसरे समस्तस्यापि संस्कृतजगतस्तदनुरागिणाञ्च भावाञ्जलि-समर्पणमपि भवेदिति पावनया प्रेरणया सम्प्रेरितं **श्रीलालबहादुर-शास्त्री-केन्द्रीय-संस्कृत-विद्यापीठ**'मपि लोकमाङ्गल्यकर्तृष्वीदृशेषु कर्म्मसु प्रारम्भादेव प्रवृत्तिमत्त्वात् स्वान्तर्गत-**'अनुसन्धान-प्रकाशन-विभाग'**-

माध्यमेन प्रकाश्यमानाया **'अध्ययनमाला'**या विशेषाङ्करूपेण **'श्रीमहावीर-परिनिर्वाण-स्मृतिग्रन्थ'**स्य प्रकाशनाय निरचैषीत् । तदनुसारं चास्माकं प्राचार्यवर्येण प्रस्तुतस्य निर्णयस्य स्वीकृतिः प्रकाशनसमित्या प्राप्ता । ततः परं कार्यालयसम्बद्धेतरव्यवस्थापूर्वकं विदुषां लेखादिसम्प्राप्तये परिपत्राणि प्रेषितानि यथासमयं चास्य ग्रन्थस्य प्रकाशनमारब्धम् । सोऽयं ग्रन्थोऽद्य भवतां पुरस्ताद् विद्यते ।

अस्य ग्रन्थस्य **प्रथमे भागे**ऽन्तिमतीर्थङ्करस्य भगवतो महावीरस्य जीवन-चरित्रं सङ्कलय्य संस्कृतभाषायां 'श्रीमहावीर-चरितामृत'मिति नाम्ना प्रकाशितम् । श्रीमहावीरस्य चरित्राणि अर्द्धमागधी-संस्कृत-हिन्द्यादि-भाषासु नानारूपेण विविधाचार्यैर्निर्मितानि सन्ति, किञ्च लोकोत्तरचरित्रशालिनो जीवन-सागरस्य कस्मिन्नपि सामान्ये पात्रे समावेशोऽपि दुःशक एव । निखिलमपि वाङ्मयं वीक्ष्य कोऽपि तादृशं भगवतश्चरित्रमाकलयितुं कथं प्रभवेत् ? साम्प्रतं प्रवर्तमानानां सम्प्रदायानां मान्यता अपि विविधाः सन्ति यासां पूर्णज्ञानं विना कथं किमपि चरित्रं सङ्कलयेयमिति चिन्ता भूयो भूयो नैराश्यं भावयति स्म । परं महाकवेः कालिदासस्य रघुवंशीयं पद्यमिदं तदा मार्गदर्शकरूपेण स्मृतिगोचरतामगच्छत्—

अथवा कृतवाग्द्वारे वंशेऽस्मिन् पूर्वसूरिभिः ।
मणौ वज्रसमुत्कीर्णे सूत्रस्येवास्ति मे गतिः ॥ इति

पद्यमिदं स्मृत्वैव चरिताकलनाय पूर्वेषां विदुषां 'महावीर-चरित्र'-ग्रन्थाः सङ्गृहीताः । तेषु मुख्यतयाऽऽचार्य-श्रीनेमिचन्द्रशास्त्रि-ज्यौतिषाचार्यप्रणीतः 'तीर्थङ्कर महावीर और उनकी आचार्यपरम्परा', श्रीकामताप्रसादजैन-प्रणीतः 'भगवान् महावीर' शतावधानि-पं० श्री धीरजलालटोकरशीशाह-प्रणीता 'श्रीमहावीर-वचनामृत'-ग्रन्थस्था 'भगवान् महावीर [जीवनरेखा]' ग्रन्थाश्चरित्रग्रथने सहायका अभूवन् । आगम-परिचयाय डॉ० जगदीशचन्द्रजैनरचितः 'प्राकृत साहित्य का इतिहास' ग्रन्थस्तथाऽऽगमवाचनाविषयालेखने पं० मुनिश्रीअभयसागरगणि-विरचित- आगमना अजवालां' नामकं गुर्जरभाषायां प्रकाशितं पुस्तकं च मार्गदर्शकमभूताम् । अत एतेषामुपकारभरं स्वीकरोमि ।

द्वितीये भागे जैनधर्मस्य वर्तमानाचार्याणां मुनीनां च लेखाः समाविष्टाः सन्ति । येषु 'विश्वधर्मः, जैनाचार्यैः संस्कृते स्वतन्त्रग्रन्थानां प्रणयनं, भगवतो महावीरस्योपदेशा अस्माकं कर्तव्यं च, भगवतो महावीरस्य जीवनदर्शनं, श्रीमद्यशोविजयमहाराजस्य संक्षिप्तं व्यक्तित्वं कृतित्वं च तथा जैनमतानुसारमभावप्रमेयमीमांसादिविषयात्मका लेखाः संस्कृत-हिन्दीभाषयोः सन्नद्धाः सन्ति । अस्य भागस्याभिधानम् **'आर्हत-धर्म-सुषमा'** इति कल्पितम् ।

तृतीये भागे—चतुस्त्रिंशल्लेखाः प्रकाशिताः । एतेषु क्रमशो जैन-दर्शन-सम्प्रदाय-व्याकरण-धर्म-चरित्रभाषा-मानववाद-संस्कृति-स्तोत्र-नारी-समाजवाद-श्रमणक-योग-मीमांसा-चरित्र-मन्त्रशास्त्राचार-विचारादयो विषया विभिन्नैर्विद्वद्भिश्चर्चिताः सन्ति । अस्य भागस्य नाम **'जैनवाङ्मयानुशीलन'**मिति निर्धारितम् ।

एवं सरल-सरस-सुर-सरस्वती-समभ्येतॄणां विदुषां परमेण सौहार्देन सहयोगेन च **'श्रीमहावीर-परिनिर्वाण-स्मृतिग्रन्थो'**ऽयं प्राचीनार्वाचीन-साहित्य-समीक्षाऽनुसन्धान-विषय-वस्तु-परीक्षण-साम्प्रदायिकाचार-वर्णनादि-विषयैर्यथायथं सम्भूष्य स्वसीम साधनानि च विचार्य त्रिषु भागेषु सुसंयोज्य प्रकाशितः ।

जैनसाहित्यं जैनेतिहासं जैनदर्शनं तदन्तर्गतानि नानाविधानि तदङ्गानि चाधिकृत्य जैनविद्वद्भिरनेके ग्रन्थाः प्रकाशिताः सन्ति तत्रापि विचारणायां सत्यां समग्रस्य जैनसाहित्यस्य मुख्यत्वेन द्वौ प्रकारौ भवतः (१) सार्वजनीनं

जैनसाहित्यं (२) साम्प्रदायिकं जैनसाहित्यञ्चेति। अनयोः प्रकारयोर्यत् साहित्यं विद्यते तत् तु प्राकृत-संस्कृत-देश्य-भाषादिषु लिखितं सदनेकरूपतां धारयति। सार्वजनीने साहित्ये न केवलं लोकोपयोगिनः शास्त्रीयाश्च ग्रन्था एव स्वयं जैनविद्वद्भिर्निर्मिताः परमन्यैराचार्यैः प्रणीतेषु ग्रन्थेषु स्वज्ञानप्रभाविकाः पाण्डित्यमण्डिताष्टीका-प्रटीका अपि विरचिताः। परःसहस्रं ग्रन्था अद्य जैनवाङ्मयस्य गौरवं वर्धयन्ति। तेभ्य एवात्र यत् किञ्चित् सङ्गृह्य पुरस्कृतं विद्यते। मन्ये तदिदं विदुषां प्रमोदाय ज्ञानवर्धनाय चावश्यं सहयोगि भविष्यतीति।

अस्य स्मृतिग्रन्थस्य सम्पादन-प्रकाशन-सौविध्यप्रदानाय आचार्याः प्रधानसम्पादकाश्च **डॉ० मण्डनमिश्र-महाभागाः** सर्वदा सहायका अभवन्। एतेषां सौमनस्येन विभागस्य सर्वाणि कार्याणि प्रगतिमन्ति विद्यन्ते पदे पदे च मार्गदर्शनपूर्वकं सर्वासु प्रवृत्तिषूत्तरोत्तरं विकासाय ते प्रेरयन्तीति तेषामुपकृति-स्मरणपूर्वकमाभारमूरीकरोमि। 'श्रीमहा-वीरचरितामृत'-लेखने विविधग्रन्थप्रदानपूर्वकं विचार-विमर्शदानाय सुहृद्वरश्रीदामोदर-शास्त्रिणेऽस्यैव विद्यापीठस्य जैनदर्शनव्याख्यातृवर्याय च धन्यवादान् वितीर्यात्र लेखने पूर्वरूप-निरीक्षणे वा जातानां त्रुटीनां कृते क्षमायाच्ञापूर्वकं संशोधनाय प्रार्थयन् विरमामीत्यलं पल्लवेन।

संस्कृतविद्यापीठम्	विदुषामाश्रवः
नईदिल्ली-२१	**डॉ० रुद्रदेव त्रिपाठी**
७ नवम्बर, १९७५ ई०	सम्पादकः

प्रथमो भागः

श्रीमहावीर-चरितामृतम्

श्रीमहावीर-चरितामृतम्

[विषयानुक्रमणिका]

—०—

प्रणति-मङ्गलम्

(१)

नमः श्रीवर्द्धमानाय निर्धूत-कलिलात्मने ।
सालोकानां त्रिलोकानां यद्विद्या दर्पणायते ॥[१]

(२)

तव जिनशासन-विभवो, जयति कलावपि गुणानुशासन-विभवः ।
दोष-कशासन-विभवः, स्तुवन्ति चैनं प्रभा-कृशासनविभवः ॥[२]

(३)

कीर्त्या महत्या भुवि वर्द्धमानं त्वां वर्द्धमानं स्तुतिगोचरत्वम् ।
निनीषवः स्मो वयमद्य वीरं विशीर्ण-दोषाऽऽशय-पाश-बन्धम् ॥[३]

(४)

दया-दम-त्याग-समाधिनिष्ठं नय-प्रमाण-प्रकृताञ्जसार्थम् ।
अधृष्यमन्यैरखिलैः प्रवादैर्जिन त्वदीयं मतमद्वितीयम् ॥[४]

(५)

सर्वान्तवत्तद्गुण-मुख्य-कल्पं सर्वान्तशून्यं च मिथोऽनपेक्षम् ।
सर्वापदामन्तकरं निरन्तं सर्वोदयं तीर्थमिदं तवैव ॥[५]

(६)

कामं द्विषन्नप्युपपत्तिचक्षुः समीक्षतां ते समदृष्टिरिष्टम् ।
त्वयि ध्रुवं खण्डितमानशृङ्गो भवत्यभद्रोऽपि समन्तभद्रः ॥[६]

(७)

प्रसिद्धाशेषतत्त्वार्थ—प्रतिबुद्धैकमूर्तये ।
नमः श्रीवर्द्धमानाय भव्याम्बुरुहभानवे ॥[७]

(८)

स्थेयाज्जातजयध्वजाप्रतिनिधिः प्रोद्भूतभूरिप्रभुः,
प्रध्वस्ताखिलदुर्नयद्विषदिभः सन्नीतिसामर्थ्यतः ।
सन्मार्गस्त्रिविधः कुमार्गमथनोऽर्हन्वीरनाथः श्रिये,
शश्वत्संस्तुति-गोचरोऽनघधियां श्रीसत्यवाक्याधिपः ॥[८]

---

१. रत्नकरण्डश्रावकाचारे, समन्तभद्रः,
२. स्वयम्भूस्तोत्रे समन्तभद्रः,
३-६. युक्त्यनुशासने समन्तभद्रः,
७. न्यायविनिश्चये, अकलंकः,
८. युक्त्यनुशासनटीकायाम्, विद्यानन्दः,

(९)

अनन्तविज्ञानमतीतदोषमबाध्यसिद्धान्तममर्त्यपूज्यम् ।
श्रीवर्द्धमानं जिनमाप्तमुख्यं स्वयम्भुवं स्तोतुमहं यतिष्ये ॥[९]

(१०)

अनन्तदर्शनज्ञानवीर्यानन्दमयात्मने ।
नमोऽर्हते कृपाक्लृप्तधर्मतीर्थाय तायिने ॥[१०]

(११)

सिद्धेर्धाम महारिमोहहननं कीर्तेः परं मन्दिरम्,
मिथ्यात्वप्रतिपक्षमक्षयसुखं संशीतिविध्वंसनम् ।
सर्वप्राणिहितं प्रभेन्द्रभवनं सिद्धं प्रमालक्षणम्,
सन्तश्चेतसि चिन्तयन्तु सुधियः श्रीवर्द्धमानं जिनम् ॥[११]

(१२)

सद्दृष्टिज्ञानवृत्तात्मा मोक्षमार्गः सनातनः ।
आविरासीदतो वन्दे तमहं वीरमच्युतम् ॥[१२]

(१३)

जयति विजितरागः केवलालोकशाली, सुरपतिकृतसेवः श्रीमहावीरदेवः ।
यदसमसमयाब्धेश्चारुगाम्भीर्यभाजः, सकलनयसमूहा बिन्दुभावं भजन्ते ॥ [१३]

(१४)

श्रीवीरः स जिनः श्रिये भवतु यत्स्याद्वाददावानले,
भस्मीभूतकुतर्ककाष्ठनिकरे तृप्यन्ति सर्वेप्यहो ।
संशीतिव्यवहारलुब्धनिकरानिष्ठाविरोधप्रमा-
वन्ध्यासम्भवसंकरप्रभृतयो दोषाः परै रोपिताः ॥[१४]

(१५)

स श्रीवीरजिनो जीयाद्यस्य पादनखांशवः ।
विकारो भवराजीवराजेस्तरुणभानवः ॥

—उत्तराध्ययनसूत्रलघुवृत्तौ

(१६)

यन्नाममात्रवशतोऽपि शरीरभाजां नश्यन्ति सामजघटा इव दुष्कृतौघाः ।
पादाग्रलाञ्छितमृगेन्द्रभुवा भियेव देवः स वः शिवसुखं वितनोतु वीरः ॥

—विवेकमञ्जरीवृ

९. अन्ययोगव्यवच्छेदिकायाम्, हेमचन्द्रः,
१०. प्रमाणमीमांसायाम्, हेमचन्द्रः,
११. प्रमेयकमलमार्तण्डे, प्रभाचन्द्राचार्यः,
१२. तत्त्वार्थसूत्रे, प्रभाचन्द्रः,
१३-१४. षड्दर्शनसमुच्चयटीकायाम्, गुणरत्नसूरिः ।

श्रीमहावीर-चरितामृतम्

—डा० रुद्रदेवत्रिपाठी

तीर्थङ्कर-परम्परा भगवान् महावीरश्च

तित्थयरा चउवीस वि केवलणाणेण दिट्ठसव्वाट्ठा ।
पसियंतु सिवसरूवा तिहुवण-सिरसेहरा मज्झं ॥

श्रीवीरसेनाचार्यस्य 'जयधवला'यां प्रोक्ताया अस्या गाथाया अनुसारं 'तीर्थङ्कराः केवलज्ञानेन दृष्टसर्वार्थाः शिवस्वरूपास्त्रिभुवनशिरःशेखराश्च भवन्ति' । प्रत्येकमवसर्पिण्युत्सर्पिणीकाले च चतुर्विंशति-तीर्थङ्करा भवन्ति । ते हि तदानीन्तने काले समस्तेषु महापुरुषेषु प्रधाना धर्म-दर्शनस्य स्वरूप-निर्धारका वीतरागा अहिंसा-समता-सहिष्णुताद्युपासकाः स्याद्वादस्योदारया चिन्तनपद्धत्या सर्वधर्मसमभाव-बोधका आत्मशोधनस्य सुपरीक्षित-मार्ग-प्रवर्तकाश्च भूत्वा सकलं जीवजातं मनसो नैर्मल्याय सम्यक्त्वमुपदिशन्ति ज्ञान-विज्ञान-सदाचाराऽऽस्थाऽऽत्मशोधन-प्रक्रियाभिश्च परमात्मतत्त्वोपलब्धये च 'तीर्थं' प्रवर्तयन्ति । तीर्थप्रवर्तनादेव ते 'तीर्थङ्करा' इत्युदीर्यन्ते ।

जैन-परिभाषानुसारं तीर्थशब्दस्यार्थो **'धर्मशासन'**मित्यस्ति । व्युत्पत्तिदृष्ट्या—तीर्थशब्दः √तॄ धातोः थक् प्रत्ययान्निष्पन्नः । **'तरति पापादिकं यस्मादिति तीर्थम्'** अथवा **'तरति संसारमहार्णवं येन तत् तीर्थम्'** इत्येवं शब्द-कल्पद्रुमकारः प्रतिपादयति तीर्थशब्दम् । इत्थमस्याभिधागतोऽर्थः किल घट्टः सेतुर्गुरुर्वाऽस्ति लाक्षणिकोऽर्थश्च **'धर्म'** इति । **'तीर्थं करोतीति तीर्थङ्कर'** इति तु स्पष्टमेव । तीर्थङ्करा वस्तुतः कस्यापि नवीनस्य धर्मस्य सम्प्रदायस्य वा प्रवर्तनं न कुर्वन्ति, परं ते तु— 'अनादिनिधनस्यात्मधर्मस्य साक्षात्कारं विधाय वीतरागभावेन तस्य पुनर्व्याख्यानं प्रवचनं वा विदधति, अत एव ते मानवसभ्यतायाः संस्थापका नेतारो भवन्ति । ते हीदृशाः शलाकापुरुषाः सन्ति ये सामाजिकीं चेतनां विकासयन्ति मोक्षमार्गं च प्रवर्तयन्ति । संसाररूपायाः सरितस्ताराय धर्मशासनरूपसेतु-निर्मातारः सम्यग्ज्ञान-सम्यग्दर्शन-सम्यक्चारित्ररूप-पोत-निर्मातारो वा तीर्थङ्करा उच्यन्ते ।

तीर्थङ्कर-शब्दोऽयं नास्ति रूढः । अयं तु महिमशालिने दयालवे निःस्वार्थाय निर्भीकाय सर्वज्ञाय जितेन्द्रियाय निर्मल-विश्वासधारिणे च प्रयुज्यते । पदमिदमात्मविकासस्य चरमोत्कर्ष-प्रतीकम् । अतस्तीर्थङ्करः स भवति यो हि विशिष्टो वीतरागः सर्वज्ञो हितोपदेष्टा च संसार-सागराद् जनानामुद्धाराय सन्मार्गमुपदिशति । तस्मादेव तीर्थङ्करो मोक्षमार्गस्य प्रवर्तको युगपुरुषो भवति ।

जैनविचारकाणां दृष्ट्या संसारोऽयमनादिकालादेव सततं गतिशीलो विद्यते । कालचक्रानुसारमुत्कर्षमयाय कालाय 'उत्सर्पण'स्य तथाऽपकर्षमयाय कालाय 'अवसर्पण'स्याभिधानं प्रदत्तम् । एतयोरुत्सर्पणयोः सुषम-दुःषमादयः

षड्-षड् भेदा भवन्ति। उत्सर्पणकाले प्राणिनामुत्कर्षा अवसर्पणकाले च ह्रासाः सञ्जायन्ते। परं सुषम-दुःषम-कालस्यागमनेन सहैव विचार-सङ्घर्षाः कषायवृद्धयः क्रोध-लोभ-प्रपञ्चस्वार्थाहङ्कार-वैरादीनां परम्पराः प्रादुर्भवन्ति। तदा मानवसमाजादेव कतिपये विशिष्ट-प्रतिभा-सम्पन्ना जना उद्भवन्ति ये जनान् शान्तेः पन्थानं दर्शयन्ति।

एते विशिष्ट-बल-बुद्धि-प्रतिभासम्पन्ना जना मानव-समाजे कुलानि स्थापयन्ति। ते च—

कुलानां धारणादेते मताः कुलधरा इति।
युगादि-पुरुषाः प्रोक्ता युगादौ प्रभविष्णवः॥

—महापुराण० आदिपुराणे ३।२१२-१

एतदनुसारं 'कुलकराः—कुलधरा युगपुरुषा'श्चेति प्रोच्यन्ते। एते कुलकरा मानवसभ्यतायाः सूत्रधारा ग्राम-नगरादीनां संस्कृतेर्जनकाश्च भवन्ति। एतेषां संख्या चतुर्दश मन्यते। कुलकराणां स्थित्या सर्वा अपि जनसाधारणस्य जीवनावस्थाः सुचारुरूपेण व्यवस्थिता भवन्ति तदाऽऽध्यात्मिक-क्षुधोपशान्तये चतुर्विंशति-तीर्थङ्कराः, द्वादश चक्रवर्तिनः, नव बलभद्राः, नव नारायणा नव च प्रतिनारायणा एवं त्रिषष्टिशलाकापुरुषाः प्रादुर्भवन्ति ये सर्वविधायां सामाजिक-व्यवस्थायां वैयक्तिकजीवनोत्थाने च सहायका भवन्ति।

आद्यतीर्थङ्करः श्रीऋषभदेवः

तीर्थङ्करेषु 'श्रीऋषभदेव'स्य नाम सर्वप्रथममायाति। एतैरात्मविद्याया नेतृत्वं विहितम्। लोकेभ्यः कृषिशिक्षया सह जीवनोपयोगिनां षट्कर्मणामपि शिक्षा तैरेव प्रदत्ता। प्रत्येकं कल्प-कालस्य समानमेव जैनधर्मस्य प्रवर्तनमपि तेषामेव पुण्यं कर्माभूत्। सहयोग-सहास्तित्व-सहृदयता-सहिष्णुता-सुरक्षा-सौहार्द-समानतानां पाठान् पाठयित्वा गुणकर्मानुसारिण्या व्यवस्थायाः प्रतिपादनं त एवाशिक्षयन्। अहिंसा-दयावृत्ति-संयम-रत्नत्रयादीनामाराधनाय ते विशिष्य प्रेरितवन्तः।

श्रीऋषभदेवमहाराजानां जननी मरुदेवी पिता च श्रीमान् नाभिराज आस्ताम्। एतेषां जन्मनः समकालमेव सर्वत्र शान्तेः साम्राज्यं प्रासरत्। समस्तस्यापि जगतः कल्याणाय धर्मामृतस्य वर्षाकरणाद् वृषभदेवः, धर्मस्याद्यप्रवर्तनाच्च 'आदिनाथ'नाम्नाऽपि जनास्तान् स्मरन्ति। इक्ष्वाकुवंश-प्रभवानामेतेषां विवाहानन्तरं शतं पुत्रा ब्राह्मी सुन्दरी चेति पुत्रीद्वयं चाभवन्। एतैरसङ्ख्यात-वर्षावधि राज्यं विहितम्। धर्मानुकूला राज्यव्यवस्था सञ्चालिता तथाऽन्ते विरज्य श्रमणदीक्षाऽङ्गीकृता। अनेके राजानः सामन्ता महापुरुषाश्च तैः सहैव दीक्षिता अभवन। घोरं तपः प्रतप्यान्ते केवलज्ञानं सम्प्राप्ता लोकेभ्यश्च शान्तेरुपदेशान् वितरितवन्तः।

श्रीऋषभदेवानन्तरं क्रमेण—**अजितनाथ-सम्भवनाथ-अभिनन्दन-सुमतिनाथ-पद्मप्रभ-चन्द्रप्रभ-पुष्पदन्त-शीतल-श्रेयांस-वासुपूज्य-विमल-अनन्त-धर्म-शान्तिनाथ-कुन्थु-अरनाथ-मल्लि-मुनिसुव्रत-नमि-नेमि-पार्श्वनाथ**—नामान एकविंशतितीर्थङ्करा अभवन्। एते सर्वेऽपि सत्यस्यान्वेषका आत्मसाक्षात्कार-सम्पादका आसन् स्वीयाभिरन्तर्दृष्टिभिर्मानवानां तात्कालिकीनां समस्यानां च समाधानानि प्रास्तुवन्,। अनेकान्ताहिंसासमताप्रभृतितत्त्वानां प्रवर्त्तनेन शान्तेर्मार्गदर्शनञ्चाकुर्वन्।

तीर्थङ्करः श्रीपार्श्वनाथः

त्रयोविंशतितम-श्रीपार्श्वनाथ-तीर्थङ्कराणां जन्म वाराणस्यामभूत्। तेषां माता महाराज्ञी वामादेवी जनकश्च महाराजोऽश्वसेन आसीत्। जीवनस्य त्रिंशत्तमे वर्षे गृहत्यागानन्तरमेते सम्मेदशिखर-नाम्नि पर्वते तपश्चरणमकुर्वन्। पर्वतोऽयं साम्प्रतमपि 'पार्श्वनाथ-पर्वत'नाम्ना सुप्रसिद्धो विद्यते। एतैः केवलज्ञानं सम्प्राप्य सप्तति-

वर्षपर्यन्तं श्रमणधर्मस्य प्रचारः कृतः । जैन-पुराणानुसारं श्रीपार्श्वनाथभगवतां निर्वाणं श्रीमहावीरस्य निर्वाणात् २५० वर्षेभ्यः पूर्वमभवत् । श्रमणपरम्परायामेतेषां प्रभावोऽतीव गभीरोऽस्ति । क्षमाधारायाः प्रवाहकानामेतेषां प्रभावातिशयेन श्रमणसंस्कृतेः पर्याप्ता समुन्नतिरभवत् । निर्ग्रन्थ-सम्प्रदायस्य तपस्विता-रूक्षता-जुगुप्सा-प्रविविक्ततारूपतपश्चतुष्टयमप्येतेषां समये सुप्रवर्तितमभूत् ।

एवं तीर्थङ्कर-परम्परेयं वैज्ञानिकदृष्ट्या सत्यान्वेषक-परम्परेव प्रामुख्यमभजत् । अस्यामेव परम्परायां चरमतीर्थङ्कररूपेण भगवतः श्रीमहावीरस्य जन्म रूढिवादस्यान्धविश्वासस्य च निरोधपूर्वकं जनेभ्यो वास्तविकं मार्गं दर्शयितुमभवत् । विश्वबन्धुत्वस्य सुप्रसाराय सुप्रचाराय तीर्थपरम्परायाश्च ध्वस्तप्रायाणां घट्टानां पुनरुद्धाराय तथा सहजकरुणायाः सर्वत्र विस्ताराय श्रीमहावीरस्याविर्भावः सर्वथाऽऽवश्यकः सामयिकश्चासीत् ।

पूर्वकालिक्यः परिस्थितयः

भारतस्य प्राचीनमितिवृत्तं महता गौरवेण गर्भितं विद्यते । अस्य धरायां महर्षयो महापुरुषाश्च स्वतपःपरम्पराभिः प्रभूतं तेजः सम्प्राप्य भूयसः कल्याणकरान् उपदेशान् उपदिष्टवन्तः । तेषूपदेशेषु नीतिका धार्मिका आध्यात्मिकाश्च नैकश उपदेशा महत्त्वभाजः सन्ति येषां परिशीलनेन सकलस्यापि जनिमतो जीवनं न केवलमात्मकल्याणाय, अपितु परेषामपि हिताय भवति । एवंविधेषु महात्मसु भगवतो महावीरस्याभिधानं विश्वप्रसिद्धं विद्यते ।

श्रीमहावीरस्य जन्मकालः षड्विंशतिशतवत्सरेभ्यः पूर्वतनो भारतीयसंस्कृतेरितिहासे सांस्कृतिक्या दृष्ट्या नातिसमीचीन आसीदिति तद्विदां वादः । तं कालमितिहासज्ञाः 'तमःपूर्णः काल' इति प्रचक्षते । तदानीं सर्वतो विसारी हिंसायाः प्रसारः, असत्यस्य प्रचारः, अन्यायस्याधारः, विषमताया विचारः शोषणस्य च सञ्चारश्चिरं रमते स्म । धर्मस्य नाम्ना नैके मार्गा आविष्कृता आसन् येषु विकृतीनां बहुलः प्रवेशो जनानां भ्रान्ते पथि प्रेरणायालमभवत् । जीवनस्य वास्तविकं तत्त्वं विस्मृत्य मानवा भौतिकीष्वेवैषणासु लिम्पन्ति स्म ।

तेषु दिवसेषु दार्शनिकस्य चिन्तनस्य स्थानमधिगृहीतमभूद् वराक्याऽन्धश्रद्धया । चार्वाकस्य विचार-सरणिः सवेगं प्रसरन्ती सकलस्यापि लोकस्य जीवन-धोरणीं विचित्रे वर्त्मनि समुपस्थापयति स्म । पूर्णकाश्यपस्याघोषोऽकर्मण्यतावादं, भगवतस्तथागतस्य 'यत् क्षणिकं तत् सत्' तथा 'सर्वमनित्य'मित्याद्युपदेशाः क्षणिकवादं, साङ्ख्यदर्शनस्य 'आत्मनः कूटस्थत्वं नित्यत्वं' चेति नित्यत्ववादं, गोशालकस्य नियतिवादं, अजितकेशकम्बलस्योच्छेदवादं, प्रक्रुद्धकात्यायनस्यान्योन्यवादं, सञ्जयवेलट्ठिपुत्रस्य विक्षेपवादं च तत्तन्मतानुसर्त्तारः सम्प्रचार्य स्व-स्व-प्रतिभा-प्रभाव-भाविता जनान् वैचारिकेषु पञ्जरेषु पूरयित्वा यथारुचि बुद्धिकेलीः स्फोरयन्तः किमपि चित्रमेव वातावरणं समसृजन् । सत्यमेवैवं स आसीत् चिन्तनेऽपि सङ्क्रमणकालः ।

आर्थिकस्थितिदृष्ट्या तीर्थङ्करस्य श्रीमहावीरस्य जन्मकाले भारतेऽर्थसङ्कटो नासीत् । तदानीन्तनं भारतं पूर्णं समृद्धिमत् सुसम्पन्नं सुखि च समभवदिति तात्कालिक-जैन-बौद्धादि-साहित्य-पर्यालोचनेन प्रतीयते । सर्वत्राभरण-वसन-शिल्पवस्तुजात-वर्णनैर्जनानामार्थिकी स्थितिः सन्तोषावहाऽभूदिति ज्ञायते । क्रय-विक्रयाभ्यां रौप्यमापक-स्वर्ण-रजत-ताम्रमुद्राणां प्रयोगाः पणार्द्धपण-पादपणाष्टभागपण-रौप्यमापक-धरण-रूपेण प्रचलिता आसन् । कृषि-वाणिज्य-पशु-पालन-शिल्पादय आयानां साधनान्यवर्तन्त । आमोद-प्रमोद-सामग्रीणां बाहुल्यमपि कूप-वापिका-स्ननागार-सभा-गृह-नाट्यशालादिभ्योऽनुमातुं शक्यते ।

परं सामाजिकी स्थितिर्नाभूत् सन्तोषावहा । सर्वत्र जातिवादस्य सम्पोषः समाजं मुख्यतया ब्राह्मणवादं प्रत्याकर्षत् । यज्ञानां प्रामुख्यं सर्वत्र व्याप्तिमदवर्तत तत्रापि बलिविधानानि स्वेच्छाचारान् वर्धयन्ति स्म । स्वार्थलो-

लुप्ता हिंसाविश्वस्तिभाजश्च यथेच्छं हिंसाकर्मसु प्रवृत्ताः सन्त आत्मन ईप्सितानि साधयितुं सक्षमा अभवन् । **वर्णानां ब्राह्मणो गुरुरिति** भावनया सर्वोऽपि लोको वर्णाश्रमपद्धतौ ब्राह्मणमेव गुरुत्वेनामन्यत । नारीणां स्वातन्त्र्यं कुण्ठितमेवातिष्ठत् । **'न स्त्री स्वातन्त्र्यमर्हती'**त्येतादृश्य उक्तयस्तासां सर्वविधे विकासे बाधिका भवन्ति स्म । शूद्रादिवर्णानां दशा च शोचनीयतामेव गता प्रत्यभात् ।

राजनीतिकी व्यवस्था विशृङ्खलप्राया सती जनानावर्त्त-विवर्त्तयोरन्तराले संस्थाप्य मानसमस्वास्थ्यं समपादयत् । स्थिरत्वं क्वापि नास्थात् । अनेकत्र भागेषु प्रजातन्त्रात्मकानि गणराज्यानि स्थापितान्यासन् येषु विधानानुसारं प्रतिनिधयो निर्वाचनमाध्यमेन विजित्य राज्यमण्डलस्य सदस्यतामभजन्त । जनानां हिताय ते प्रायतन्त । तदानीन्तनेषु गणराज्येषु 'लिच्छवि-शाक्य-मल्ल-कोल्य'-प्रभृतीनि गणराज्यानि प्रधानानि व्यराजन्त । गणराज्यातिरिक्तं मगधोत्तर-कोसलवत्सावन्ति-कलिङ्ग-वङ्गाङ्ग-प्रभृतीनि राज्यतन्त्राण्यासन् । एतेषु परस्परं स्नेहोऽपि व्यलसत् परं प्रजाजनाः स्वातन्त्र्यं नानुभवन्ति स्म ।

एवं सर्वत्र पाखण्ड-प्रचुरतायाः स्वार्थस्य वादानां च झञ्झावातः सर्वानुद्वेल्लयन्नेवातिष्ठत् । एतामवस्थां श्रीपार्श्वनाथ-परम्पराया अन्तिमः प्रतिनिधिः श्रीकेशिकुमार एवं व्यवर्णयत्—

अंधकारे तमे घोरे चिट्ठंति पाणिणो बहू ।
को करिस्सइ उज्जोयं सव्वलोगम्मि पाणिणं ॥

—उत्तराध्ययन० २३।७३

भगवतो महावीरस्य युग एव चीनदेशे लाओत्सेः कन्फ्यूशियसश्च, ग्रीकदेशे पेरामिण्डस् इम्पेडोलस् च, ईरानदेशे जरथुस्त्रः, भारतदेशे च गौतमबुद्धः सर्वेऽप्येते मानवधर्मस्य संस्कृतेश्च महान्तः प्रसारका अभूवन् । सर्वेषामेतेषां स्वानि स्वानि चिन्तनानि, अनुभवास्तथा प्रयोगा अभवन् । सर्वेऽपि परमानन्दस्य सत्यस्य वा गवेषणाय सकलं सांसारिकं सौख्यं विसृज्य वैराग्यं प्रति वर्धमाना आसन् । एतेषां साधना-मार्गा यद्यपि भिन्न-भिन्ना अवर्तन्त तथापि लक्ष्यं समेषामेकमेवाभूत् । एवं सत्यपि सकलानां लक्ष्यविषयिण्यः परिभाषाः केन्द्र-बिन्दवश्चैकत्वं नाभजन् । सर्वेषां प्रवृत्तयोऽपि विभिन्ना अभूवन् । तथापि तदानीन्तनाः सर्वेऽपि महापुरुषाः मानवस्य सत्तां सर्वोन्नतामेवोदघोषयन् ।

तस्मिन् काले सर्वोऽपि मानवगणः प्राचीना रूढिपरम्पराः परिवर्तयितुं क्रियाशीलोऽवर्तत । प्रत्येकं विचारकः स्वार्थानामन्धविश्वासानां रूढिवादानाञ्च ध्वंसन-पूर्वकं मानवताया नवीनां प्रतिष्ठां च कर्त्तुं कृतसङ्कल्प इवातिष्ठत् । अशान्तेरसन्तोषस्य च प्रपुष्टं प्रसारं निरोद्धुं कस्यापि महत्त्वशालिनः प्रतिभावत आवश्यकतैव मन्ये भगवतो महावीरस्यविर्भावाय प्रेरयित्री समजायत ।

अत एव भगवतो महावीरस्य प्रादुर्भावः सत्यमेव लोकमङ्गलायाभवत् । येन जगतो जीवनस्य च गहनं तलं प्रविश्य तत्रैव न स्थितमपि तु ततोऽग्रे वर्धनाय तदपि लङ्घितम् ।

जन्मस्थानं वंश-परिचयश्च

भगवतो महावीरस्य जन्मस्थानमधिकृत्य 'कल्पसूत्र'-प्रोक्तैः 'विदेहे' 'विदेहजच्चे' 'विदेहसुकुमाले'-प्रभृतिविशेषणैस्तथा 'दशभक्ति'[1]हरिवंशपुराणादिषु समागतैः 'सिद्धार्थनृपतितनयो भारतवास्ये विदेहकुण्डपुरे' 'भरतेऽस्मिन्

१. सिद्धार्थनृपतितनयो भारतवास्ये विदेह-कुण्डपुरे ।
देव्यां प्रियकारिण्यां सुस्वप्नान् सम्प्रदर्श्य विभुः ॥

—निर्वाणभक्ति० ४

विदेहाख्ये विषये भवनाङ्गणे । राज्ञः कुण्डपुरेशस्य वसुधाराऽपतत् पृथु'रित्यादि-वर्णनैश्च प्रायो निश्चितमेवास्ति यद् विदेहराज्यमेव तदीया जन्मभूमिरभूदिति ।

तदानीं स्थापितेषु वृजिसङ्घः (वज्जीसङ्घः) सर्वतो बलशाली प्रतिष्ठितश्चासीत् । तस्मिन् 'विदेह-लिच्छवि-ज्ञातृक-वज्जि-उग्र-भोग-कौरव-इक्ष्वाकु-संज्ञका'न्यष्टौ कुलानि सम्मिलितान्यासन् । एतेषु ज्ञातृकक्षत्रियाणां राजधानी कुण्डपुरं[१] कुण्डग्रामो वाऽभूत् । इममेव ग्रामं 'क्षत्रियकुण्ड'नाम्नाऽपि व्यवहरन्ति स्म । इदं च नगरं वैशाल्या उपनगरेष्वेकमभूत् तथा 'क्षत्रिय-कुण्ड'-'ब्राह्मण-कुण्ड'नामभ्यां द्वयोर्भागयोर्विभक्तं व्यराजत । क्षत्रियकुण्डसन्निवेशो ब्राह्मणकुण्डसन्निवेशादुत्तरस्यां स्थित आसीत् । क्षत्रियकुण्डग्रामे ज्ञातृकवंशीयाः क्षत्रिया वसन्ति स्म । महाकविः 'असगः' उपनगरस्यास्य वैशिष्ट्यमेवमवर्णयत्—

तत्रास्त्यथो निखिलवस्त्ववगाहयुक्तं भास्वत्कलाधरबुधैः सवृषं सतारम् ।
अध्यासितं वियदिव स्वसमानशोभं, ख्यातं पुरं जगति कुण्डपुराभिधानम् ॥
प्राकारकोटिघटितारुणरत्नभासां, छायामयैः परिगता पटलैः समन्तात् ।
आभाति वारिपरिखा नितरामनेकां, सन्ध्याश्रियं विदधतीव दिवापि यत्र ॥
धौतेन्द्रनीलमणिकल्पितकुट्टिमेषु, यत्रोपहार-रचितान्यसितोत्पलानि ।
एकीकृतान्यपि सलीलतया प्रयान्ति, व्यक्तिं पतद्भ्रमर-हुङ्कृतिभिः समन्तात् ॥
जैत्रेषवः सुमनसो मकरध्वजस्य, निस्तेजिनाम्बुजरुचो शशलक्ष्मभासः ।
अप्रावृषोर्नवपयोधरकान्तियुक्ता, यस्मिन् विभान्त्यसरितः सरसा रमण्यः ॥
अत्युन्नताः शशिकरप्रकरावदाता, मूर्धस्थरत्नरुचिपल्लवितान्तरिक्षाः ।
उत्सङ्गदेशसुनिविष्टमनोज्ञरामाः, पौरा विभान्ति भुवि यत्र सुधालयाश्च ॥
लीलामहोत्पलमपास्य कराग्रसस्थं, कर्णोत्पलञ्च विगलन्मधु यत्र भृङ्गाः ।
निःश्वाससौरभरता वदने पतन्ति, स्त्रीणां मुहुर्मृदुकराहतिभीप्सवश्च ॥

(वर्धमानचरितस्य १७सर्गे ७-१२ पद्यानि)

एवंविधैर्वर्णनैः सिद्धं भवति यत् 'कुण्डपुरं' तदानीं सर्वाभिः सम्पद्भिर्विभूषितं नगरमासीत् । तच्च 'हरिवंशपुराण'स्य 'एकमेव सदा धत्ते यत्समस्ताकरश्रिय'मित्युक्तिं सर्वथा चरितार्थयति स्म । साम्प्रतं कुण्डपुरमिदं 'वसाढ़'-नाम्ना ख्यातमस्ति । इदमेव महिमशालि नगरं भगवतो महावीरस्य जन्मस्थानमासीदिति—

धन्यं कुण्डपुरं धन्या च तदीया धरित्री ।

अस्यामेव धरित्र्यां विदेहाद्यष्टकुलेषु इक्ष्वाकुवंशस्यैव शाखाभूतं शुद्धार्यकुलरूपेण सुप्रख्यातं 'ज्ञातृक-क्षत्रिय' कुलमवर्तत । एतेषां ज्ञातृक-क्षत्रियाणां निवासस्थानानि प्रामुख्येन वैशाली-कुण्डग्राम-कोल्लगसन्निवेशेषु समभवन् । ज्ञातृवंशोऽयं प्राकृतापभ्रंशभाषयोः 'णाय(नात-नाथ)वंश' इति रूपेण व्यवहृतः । बौद्धग्रन्थेषु कुलमिदं 'निगंठ-नातपुत्ता'-दिशब्दैः परिचायितम् । ज्ञातृक-क्षत्रियाः प्राचीनात् कालादेव जैनधर्मोपासका आसन् स्वसमये च विशिष्टाः सम्माननीयाः सुप्रतिष्ठिता राजकुलरत्नभूताश्चावर्तन्त ।

---

१. अथ देशोऽस्ति विस्तारो जम्बूद्वीपस्य भारते । विदेह इति विख्यातः स्वर्गखण्डसमः श्रिया ॥
तत्राखण्डलनेत्राली-पद्मिनी-खण्डमण्डनम् । सुखाम्भः कुण्डमाभाति नाम्ना कुण्डपुरं पुरम् ॥
—तत्रैव, १।२११-२२२।;

अत्रेदमपि स्पष्टीकरणमावश्यकं प्रतीयते यद् वज्जीगणतन्त्रात्मके तन्त्रे नेके लघु-दीर्घा राजानः संयुक्ता आसन् । बौद्धग्रन्थ—'**जातक-अट्ठकथा**'या अनुसारं तेषां राज्ञां संख्या ७७०७ मिताऽभूत् । परमियत्-संख्यावन्तो नृपतय एकत्र सम्मिल्य देशस्य कार्य-सञ्चालनं कर्तुं कथं प्रभवेयुरतस्तेषु केषाञ्चन जनानां कार्य-सञ्चालनाय विशेष-रूपेण चयनमक्रियत । ते यथासमयं वैशाल्याः सङ्घागारनामके राजभवने सम्भूय चर्चा विचारणाः कुर्वन्ति स्म तथा राजकीयानां सामाजिकीनां च कार्यप्रणालीनां निर्धारणानि विदधति स्म । एतेषां निर्णयानामनुसारमेव विदेहस्य शासनं प्राचलत् । सङ्घागारे विहितानां निर्णयानां व्यवस्थितरूपेण पालनं भवेत् तदर्थं निरीक्षणाय तथाऽन्येषां कार्य-कलापानां व्यवस्थापनाय पूर्वोक्तेषु नृपतिष्वष्टानां भूपतीनामेका समिद् निर्मिताऽभूद् यस्यां शुद्धा आर्यवंश्याः सम्मानिताः कुलीना राजानः प्रतिनिधित्वेनागृह्यन्त । तत्र च ज्ञातृवंशाय प्राथम्यं दीयते स्म ।

बौद्धसाहित्यस्यातिप्राचीने '**महावस्तु**'नाम्नि ग्रन्थेऽस्य ज्ञातृवंशस्य वर्णनं भगवता बुद्धेनेत्थमकारि—

स्फीतानि राज्यानि प्रशास्यमाना सम्यग् राज्यानि करोति ज्ञातयः ।
तथा इमे लेच्छवि-मध्ये सन्तो देवेहि शास्ता उपमामकासि ॥

अत्र भगवान् बुद्धो गङ्गामवतीर्य वैशालीं प्रति गच्छति स्म तदा तेषां स्वागताय वैशालीसङ्घस्य लिच्छविप्र-भृतिक्षत्रियाः शोभायात्रां निर्माय पुर आयान्ति स्म तदा तैर्वर्णितं यद् 'एते क्षत्रियाः स्वागतार्थमायान्ति, एषु ये ज्ञातृनामकाः क्षत्रियाः सन्ति ते विशालस्य स्वकीयराज्यस्य शासनं साधुतया सम्पादयन्ति किञ्चैते लिच्छविगणस्य क्षत्रियेषु तथा प्रतिष्ठिताः सन्तः शोभन्ते यथा शास्तृषु देवाः शोभन्त इति ।'

ईदृशं महान्तं प्रतिष्ठाशालिनं परमपवित्रं धर्मनिष्ठं सुसंस्कृतं ज्ञातृवंशं भगवान् महावीरः स्वजन्मना सम्भूष्य भूयोऽपि तद्गौरवमवर्धयत् ।

महाराजः श्रीसिद्धार्थो महाराज्ञी त्रिशला च

कुण्डपुरस्य शासनं बहोः कालाद् ज्ञातृवंशीयाः क्षत्रिया एव चालयन्ति स्म । तेषु भगवतो महावीरस्य पिता-महः '**श्रीसर्वार्थ-महाराजाः**' शासनप्रमुखरूपेण प्रजानां हितानि साधयन्तः स्वीयां प्रजावत्सलतां प्राचीकटन् राज्य-व्यवस्थायाः शुचित्वेन शासन-पद्धतिं समभूषयन् स्वकीयैः सदाचारैः सद्व्यवहारैश्च सकलानपि लोकान् सन्मार्गे प्रावर्तयन् । तेषां धर्मपत्नी '**महाराज्ञी श्रीमती**' धर्मपरायणा मातृवात्सल्यप्रतिमूर्तिरिव सर्वेषां प्रजाजनानां परमादर-णीया समवर्तत । एतयोरेव पुत्ररूपेण 'श्रीसिद्धार्थ'स्य जन्माभवत् । सति काले च श्रीसिद्धार्थ-महाराजः स्वकीयेन बुद्धिकौशलेन विद्यावैभवेन च संयुक्तः सन् पित्रा शासन-प्रमुखपदेऽभिषिक्तः । शासनप्रमुखपदे स्थिताः श्रीसिद्धार्थ-नरेन्द्राः स्वीयैर्गुणैः सर्वानतिशय्य ज्ञातृकुलस्य प्रतिनिधिरूपेण वज्जीनां सङ्घे सर्वोच्चायां समितौ व्यराजन्त । अस्मात् प्रभावातिशयादेव विदेहस्य क्षत्रियसमाजे तेषां प्रतिष्ठाऽत्यन्तं स्थितिमत्यवर्तत ।

'**श्रीसिद्धार्थमहाराजा**' यदा शासनप्रमुखा आसँस्तदा तेषां राज्यव्यवस्थात इतिहासस्य कलुषितानि पृष्ठानि समुज्ज्वलान्यभूवन् । ते शस्त्र-विद्यायां शास्त्रेषु च पारदृश्वानो धर्मज्ञा विद्यानुरागिणो बुद्धिमन्तः प्रभावशालिनश्चा-वर्तन्त । महाकवि-'पुष्पदन्त' विरचिते '**वीरजिणिंद-चरिउ**'नामके काव्ये सिद्धार्थनरेन्द्रवर्णनमित्थमुपलभ्यते—

कुंडउरि राउ सिद्धत्थु सहिउ । जे सिरिहरु मग्गण-वेस रहिउ ॥
अकवाल-चोज्जु जो देउ रुद्दु । अमहिउ सुरेंहिं जो गुण-समुद्दु ॥
ण गिलिउ गहेण जो समर-सूरु । जोधम्माणंदु सधर दूरु ॥

जो णरु अविहंदलि दलिमल्लु । जो पर-णर-णाहहु जणइ सल्लु ।।
अणिवेसिय णिय मंडल-कुरंगु । जो भवणइंदु अविहंडियंगु ।।
जो कामधेणु पसु-भाव-चुक्कु । जो चिंतामणि चिंता-विमुक्कु ।।
अणवरय-चाइ चाएण धण्णु । असहोयर-रिउ सयमेव कण्णु ।।
दो बाहु वि जो रणि सहसबाहु । सुहि-दिण्ण-जीउ जीमूयबाहु ।।
दालिद्दहारि रायाहिराउ । जो कप्परुक्ख णउ कट्ठभाउ ।।

एतदनुसारं त आत्महितैषिणः श्रीधराः सन्तोऽपि न वामनावतारसम्बन्धि-याचकवेषधारिणः, दुःखिभ्यः शम्भुरिव दानदातारः सन्तोऽपि न रुद्रवत् कपालधारिणः, गुणानां समुद्राः सन्तोऽपि न समुद्रवद् देवैर्मथिताः, समरे सूर्याः (शूरा) सन्तोऽपि न केतुग्राहवन्तः, धर्मे मुदं मन्यमाना धनुर्धरा अपि न युधिष्ठिरवद् वनवासं श्रिताः, सुमल्लानां विजेतारो नराः सन्तोऽपि नार्जुनवद् बृहन्नलावेषधरा आसन् । शत्रुहृदयशल्यभूतास्ते भूतलमवतीर्णा इन्द्र-चन्द्र-कामधेनु-चिन्तामणि-कर्ण-सहस्रबाहु-जीमूतवाहन-कल्पवृक्ष-सदृक्षाः सन्तोऽपि न तत्तद्गतदोषवन्तोऽभूवन्निति ।

तेषु दिवसेषु वैशाली-गणतन्त्रमपि सर्वाधिकं शक्तिशालि लोकप्रियञ्चाभूत् । गणतन्त्रस्यास्य राजधानी 'वैशाली'नगरमासीत् तच्च—'सिंधु-विसइ वइसालि-पुरवरि । घर-सिरि-ओहमिय-सुर-वर-घरि ।।' इति महावीर-चरितानुसारं देव-विमानवदुत्तुङ्गैः प्रासादैः परिभूषितमद्योतत । एतस्याधिनायको महाराजश्चेटकः उत्तरपुराणा-नुसार—

सिन्ध्वाख्य(ढच)विषये भूभृद् वैशालीनगरेऽभवत् ।
'चटेका'ख्योऽतिविख्यातो विनीतः परमार्हतः ।।७५।।३४।।

अतिविख्यातो विनीतः परमार्हतश्चासीत् । काशी-कौशलस्य नव लिच्छवीनां नव मल्लराज्ञां चाधिनायकोऽपि महाराजश्चेटक एवाभूत् । अस्य पितुर्नाम 'केक' इति मातुर्नाम च 'यशोमती'ति स्मर्यते । वशिष्ठगोत्रो लिच्छवि-क्षत्रियोऽयं स्वकीय-कुलाभिमान-पराक्रमाभ्यां विराजमानो धर्मेण राज्यं प्रशासति स्म । अस्य धर्मपत्नी श्रीमती 'सुभद्रा' ऽवर्तत या हि यथाकालं धनदत्त-धनभद्रोपेन्द्र-शिवदत्त-हरिदत्त-कम्पन-प्रयङ्ग-प्रभञ्जन-प्रभास'-प्रमुखान् दश पुत्रान् प्रियकारिणी-त्रिशला-मृगावती-सुप्रभा-प्रभावती-चेलिनी-ज्येष्ठा-चन्दना-प्रभृतीश्च सप्त कन्या अजनयत् ।[1]

तासु कन्यासु 'त्रिशला'ऽतीव कोमलस्वभावा मृदुल-वचना परमप्रज्ञाशालिनी विशालहृदयाऽवर्तत । सर्वेषां प्रियकरणेन प्रियव्यवहारेण च सा 'प्रियकारिणी' नाम्नाऽपि प्रसिद्धि प्राप्ताऽऽसीत् । श्रीजिनसेनाचार्यैर्हरिवंशपुराणे—

---

१. द्रष्टव्यम्— धणयत्तउ धणभद्दु उविंदउ । सुहयत्तउ हरियत्तु णियंगउ ।।
कंभोयक कंपणउ पयंगउ । अवरु पहंजणु पुत्तु पहासउ ।।
धीयउ सत्त रूव-विण्णासउ ।
सेयंसिणी सुहव पियकारिणि । अवर मिगावइजणहारिणि ।।
सुप्पह देवि पहावइ चेलिणि । बालमराल लीलगइ-गामिणि ।।
जेट्ठ विसिट्ठ भडारी चंदण । रूव-रिद्धि-रंजिय-संकंदण ।।
(—वीर जिणिंदचरिउ, सन्धि—५)

उच्चैः कुलाद्रि-सम्भूता, सहजस्नेहवाहिनी ।
महिषी श्रीसमुद्रस्य, तस्यासीत् प्रियकारिणी ॥
चेतश्चेटकराजस्य, यास्ताः सप्त शरीरजाः ।
अतिस्नेहाकुलं चक्रुस्तास्वाद्या प्रियकारिणी ॥

इत्यादि-पद्यैस्त्रिशलाया गौरवं वर्णितम् । एवं सौजन्य-सौशील्य-गुण-गण-मण्डितायास्त्रिशलाया विवाह-संस्कारः श्रीमता चेटकराजेन पूर्वपरम्पराऽनुसारं तदानीं कुण्डपुरस्य प्रधानशासकरूपेण ख्यातिङ्गतेन महाराज-श्रीसिद्धार्थेन सह सम्पादितः। वैशाल्याः राजवंशेन सहोभयोः कुलयोः कीर्तिरतितरां व्यापृता । द्वयोर्महत्कुलयोः सम्मिलनमिदं विदेहस्येतिहासेऽमरीं गाथां प्रसारयितुं सफलमभूत् । महाराजः श्रीसर्वार्थः श्रीचेटकराजश्च परस्परमेतेन सम्बन्धेन परमां सन्तुष्टिमन्वभूताम् ।

प्रियकारिणी महाराज्ञी त्रिशला स्वीयैरनुपमैर्गुणैर्महाराजश्रीसिद्धार्थस्य मनो जितवती । धर्मवत्सलो महा-राजश्च प्रियकारिणीं धर्मपत्नीं सम्प्राप्यात्मानं धन्यममंस्त । समग्रमपि कुण्डपुरं सहजेनानन्देन तरङ्गितमभवत् । सर्वाः प्रजाश्चैतेन वैवाहिक-मङ्गलेन प्रमुदिता अभूवन् । स्वर्ण-सुरभि-संयोगोऽयं सर्वेषामानन्दवर्धनायालमभवत् ।

महाराजः श्रीसिद्धार्थो महाराज्ञी श्रीमती त्रिशलादेवी च कुण्डपुरस्य सप्ततलालङ्कृते नन्द्यावर्त-नाम्नि राज-प्रासादे सुखेनावसताम् । कुण्डपुरं तदानीं देवेन्द्रस्यामरावत्या अपि विशिष्ट समृद्धिमद् प्रत्यभात् । श्रीसिद्धार्थनरेन्द्र-प्रशासने तत्रत्याः सकला अपि प्रजाः परमेण धार्मिकजीवनेन कालं यापयन्ति स्म । हिंसाया व्यसनस्य च सर्वत्र विलोप एवासीत् । जनाः श्रमणसंस्कृतेः पालने दत्तचित्ता अभवन् । सर्वे धर्ममुखेनैवार्थ-काम-पुरुषार्थानामुपलब्धये प्रयत्नशीला आसन् ।

राजप्रासादस्य शीर्षभागे जिनेन्द्रस्य चैत्यालय आसीद् यत्र राजपरिवारः सश्रद्धं परमात्मानमुपास्ते स्म । त्रयोविंशतितमतीर्थंकरस्य भगवतः श्रीपार्श्वनाथस्य धर्मशासनोपासको महाराजः श्रीसिद्धार्थो धर्मात्मा दयालुर्व्यसनहीनश्च सन् राजधर्मस्य पालने स्वात्मकल्याणसाधने च दत्तचित्तोऽभूत् ।

प्राप्ते काले देवेन्द्रः स्वकीयेनावधिज्ञानेन भगवतो महावीरस्य जन्मास्मिन्नेव कुण्डपुरे भविष्यतीति विज्ञाय कुबेरं कुण्डपुरस्य शोभाभिवृद्धये समादिशत् । कुबेरस्तत्र पञ्चदशमासेभ्यः पूर्वं रत्नवृष्टिमकरोत् । सर्वत्र शोभायाः समृद्धेश्च साम्राज्येन धरित्री पुलकिता व्यराजत् ।

त्रिशलादेव्याः स्वप्नदर्शनम्

कतिपयमासानन्तरं अच्युत-स्वर्गात् प्रच्युतो भूत्वा तीर्थङ्कर-महावीरस्य जीवस्त्रिशलादेव्या गर्भं प्रविष्टः । तद्दिनमाषाढशुक्लषष्ठ्या आसीत् । महाराज्ञी प्रियकारिणी नन्द्यावर्त-राजप्रासादस्याभ्यन्तरवर्तिनि प्रकोष्ठे हंसतूलिकादि-विभूषिते रत्नपर्यङ्केऽर्धनिद्रितावस्थायां प्रसुप्ताऽभूत् । रात्रेरन्तिमे प्रहरे महाराज्ञी महत्या विभूतेरुदयसूचकान् षोडश[1] स्वप्नानपश्यत् । तेषु—

१—चतुर्दन्तः प्रोन्नतो गजः ।
२—श्वेतवर्णः प्रोन्नतस्कन्धो वृषभः ।

---

१. एतेषां स्वप्नानां संख्या श्वेताम्बर-सम्प्रदाये चतुर्दश वर्तते । तदनुसारं सिंहासन-देवविमान-नामनी अधिके वर्तेते । कतिपयेषु स्वप्ननामस्वप्यन्तरं मिलति परं भावे नास्ति वैषम्यम् ।

३—समुच्छलन् सिंहः ।
४—कमलसिंहासने स्थिता लक्ष्मीः ।
५—सुरभिते मन्दारपुष्पाणां द्वे माले ।
६—नक्षत्रैः परिवेष्टितश्चन्द्रः ।
७—उदयाचले समुदीयमानः सूर्यः ।
८—स्वच्छजलपूरितौ स्वर्णकलशौ ।
९—जलाशये क्रीडारतं मत्स्ययुगलम् ।
१०—स्वच्छसलिलभरितो जलाशयः ।
११—गम्भीरघोषपूर्णः सागरः ।
१२—मणिजटितं सिंहासनम् ।
१३—रत्नैः प्रकाशमानं देवविमानम् ।
१४—धरणेन्द्रस्य गगनचुम्बि विशालं भवनं—नागविमानम् ।
१५—रत्नानां विपुलो राशिः ।
१६—निर्धूमो वह्निः ।

स्वप्न-वेलायां हस्तनक्षत्रमासीद् यन्मङ्गलस्य विभूतेश्च प्रतीकमस्ति। स्वप्नदर्शनानन्तरं त्रिशलाया निद्रा भग्ना। सा व्यचिन्तयत्—अद्यावधि पूर्वमीदृशाः स्वप्ना न कदापि मया दृष्टाः । मम मनसि हर्ष उत्तरोत्तरं वर्धते, यन्मया जागरितावस्थायामपि कदाचिन्न कलितं तत्स्वप्ने कथमायातं ? मया विलोकिता एते स्वप्नाः सामान्या न सन्ति, अवश्यमेव भविष्यति स्वप्नानां मधुराणि फलानि भविष्यन्ति ।

त्रिशलाया मुखमण्डलं दिव्यया दीप्त्या भासितम् । तस्या हृदये दिव्यस्य ज्ञानस्याजस्रस्रोतः प्रावहत् । तस्याः पुण्यानां कमलानि विकस्वराण्यभूवन् । प्रत्यङ्गमस्फुरत् कल्याणमयानि सूचनानि च पुरः प्राचीकटन् ।

यथायथा त्रिशला स्वप्नानां विषये विचारयति स्म तथा तथा तस्या मानसिकी स्थितिर्विचारपरम्परायामतितरां व्यापृताऽभूत् । तदीया चिन्तनधारा स्वप्नानां फलावबोधायाऽऽकुलिता समजायत । प्रान्ते दृष्टस्वप्नानां फलज्ञानाय सा महाराजं श्रीसिद्धार्थं प्रति गन्तुमैच्छत् ।

आवश्यककर्म-निवृत्त्यनन्तरं सहर्षमाभरणानि धारयित्वाऽऽनन्दातिरेकेण प्रफुल्लवदना सा राजसभायामगच्छत् । तत्र च पारिषद्यानामभिवादनं स्वीकुर्वाणा महाराजश्रीसिद्धार्थेनाभिनन्दिता जय-जयारावेण सह भूपतेरर्धासनमभूषयत् । कुशलप्रश्नानन्तरं प्रातरेव राजसभायामागमनकारणं ज्ञातुकामेन महाराजेन पृष्टम् —

देवि, सहसाऽत्रागमने किं कारणम् ? सत्यावश्यके कारणे कस्मान्नायञ्जनोऽन्तरेवाकारितः ?

देवी त्रिशला मधुरेण स्वरेण व्यज्ञापयत् । स्वामिन् ! अद्य मया निशीथिन्याश्चतुर्थे यामे षोडश स्वप्नाः दृष्टाः । तेषां फलं जिज्ञासमानाऽहमुत्साहाधिक्येन प्रेरिता स्वयमेवोपस्थिताऽस्मि । निमित्तशास्त्रेषु तुरीये यामे विलोकितानां स्वप्नानां फलानि भविष्यत्सूचकानि भवन्तीति श्रूयते । अतः कृपयैतेषां फलानि निबोधयतु ।

महाराजः श्रीसिद्धार्थस्त्रिशलादेव्या वर्णितान् स्वप्नान् समाकर्ण्य प्रावोचत्—"देवि ! तव गर्भादेका महती विभूतिः प्रादुर्भविष्यति यस्या अस्तित्वमात्रेणात्र हिंसाऽसत्यपरिग्रह-सङ्घर्षात्याचारादीनामन्तो भविष्यति । त्रिशले!

त्वमतीव सौभाग्यशालिन्यसि यत् तव कुक्षेरेकमपराजितं ज्योतिः प्रादुर्भविष्यति । युगान्यागमिष्यन्ति गमिष्यन्ति च, परं तव सूनोः कीर्ति-गाथा सर्वत्र सदैव गुञ्जिता स्थास्यन्ति । स देवानां देवः सर्वेषां श्रद्धा-पात्रं भविष्यति । इन्द्रादयोऽपि तच्चरण-वन्दनाय लालायिताः स्थास्यन्ति । ऋद्धयः सिद्धयश्च तच्चरणयोर्लुठिष्यन्ति । स हि लोक-कल्याणाय स्वीयानि सुखानि परित्यज्यात्मसाधनां करिष्यतीति ।"

एतेषां स्वप्नानां प्रतीकरूपेणैतेऽर्था मन्यन्ते —

(१) **गजः**—तीर्थनायकस्य, (२) **श्वेतवृषभः**—सत्यप्रवर्तकस्य, (३) **सिंहः**—अनन्तोर्जायाः, (४) **मन्दार-पुष्पमाले**—दिग्दिगन्तेषु यशःसुरभि-विस्तारस्य, (५) **लक्ष्मीः**—देवेन्द्रैर्वन्दनीयस्य, (६) **चन्द्रः**—अमृतवर्षणस्य, (७) **सूर्यः**—दिव्यज्ञानप्राप्तेः, (८) **जलपूर्णः कलशः**—करुणायाः प्रसारस्य, (९) **मत्स्ययुगलम्**—अनन्तसौख्योपलब्धेः, (१०) **जलाशयः**—संवेदनशीलतायाः (११) **सागरः**—हृदयस्य विशालतायाः, (१२) **मणिमयं सिंहासनम्**—वर्चस्व-प्रभु-त्वयोः, (१३) **देव-विमानम्**—कीर्तेः, (१४) **धरणेन्द्रभवनम्**—अवधिज्ञानस्य, (१५) **रत्नानां निचयः**—अनन्तगुणानां तथा (१६) **निर्धूमोऽग्निः**—निर्वाणस्येति ।

एवं विशिष्टनिमित्तज्ञ-श्रीसिद्धार्थनरेन्द्रमुखात् फलानि ज्ञात्वा महाराज्ञी त्रिशलाऽऽत्मानं धन्यधन्यं मन्यमाना सोत्कण्ठं प्रतीक्षमाणाऽस्थात् । तस्या मनो भाविनो बालकस्य वैशिष्ट्यानि विचिन्त्यात्यन्तं शान्तिमवापत् ।

गर्भ-कल्याणकम्

पुण्योदयेन संसारस्य समस्तं वैभवं प्राप्यते । पुण्यात्मनो गृहे लक्ष्मीर्दासीभूय वसति कुवेरः कैङ्कर्यं कुरुते जागतिकं सर्वं सौख्यजातं हस्तामलकमिव सम्पद्यते । महाराजश्रीसिद्धार्थस्य महाराज्ञ्यास्त्रिशलायाः पुण्यवैभवस्य च किं कथनीयम् ? ययोः प्रासादे चरमतीर्थङ्करश्रीमहावीरस्य जीवोऽच्युतात् स्वर्गात् प्रच्युतो भूत्वा पुत्ररूपेण जन्म ग्रहीताऽभूत् । यदा श्रीमहावीरस्य जीवस्त्रिशलाया गर्भेऽवतरितस्तदा स्वर्गे देवेन्द्रस्त्रिशलायाः सेवायै चिन्तितः । तेन देवाङ्गनाः कुण्डपुरं प्रवेशिताः । सर्वत्र सुखसमृद्धीनां विलासा व्यजृम्भन्त । जैनशास्त्रेषु वर्णितमस्ति यद् देवेन्द्रस्याज्ञया ५६ षट्-पञ्चाशद् दिक्कुमारिका राजमातरं सेवितुं प्रवृत्ता आसन् । ता देवीं त्रिशलां प्रसादयितुं रसपूर्णाः काव्यगोष्ठ्य आचरन्ति स्म माता त्रिशला च यथाऽवसरं समुपस्थापितानां प्रहेलिकानां प्रश्नानां चोत्तराणि महत्या प्रज्ञया ददाति स्म । तेषूत्तरेषु तस्याः प्रज्ञया सह गर्भस्थस्य बालकस्यापि दिव्यप्रतिभाया दर्शनानि भवन्ति स्म । तेजःपुञ्जे भगवति गर्भमागते सति महाराजस्य तथाऽन्येषां कुटुम्बिजनानां यशस्तेजः-पराक्रम-वैभवानां पूर्णो विस्तारः समभवत् । मातुः प्रतिभा प्रदीप्ताऽभूत् । प्रजाजनाश्च सर्वविधसुखसुविधानामनुभवमकुर्वन् ।

महाराजश्रीसिद्धार्थस्य गृहाङ्गणं देव-देवाङ्गनानां क्रीडास्थलमिवावर्तत । महावीरस्य गर्भकल्याणकोत्सव-सम्पादनाय न केवलं मनुष्या एवापि तु चतुर्निकायस्य देवा अपि समुत्सुका आसन् । वैशाल्याः समस्तानां नगराणामुप-नगराणां च कृषिसम्पदाऽवर्धत । गोधनाश्वधन-गजधनानि निरन्तरं वृद्धिमगच्छन् । क्षेत्रेषु सर्वत्र शाद्वलत्वमशोभत । पशवः पक्षिणश्च पारस्परिकं वैरं विसृज्य प्रेम्णाऽवसन् । प्रियकारिण्यास्त्रिशलायाः शोभासंवृद्ध्यै श्रीदेवी, लज्जाभि-वृद्ध्यै ह्रीदेवी, धैर्योत्कर्षाय धृतिदेवी, स्तुतिगानाय कीर्तिदेवी, विवेक-विचारादीनां संरक्षणाय बुद्धिदेवी, धन-धान्य-प्रवृद्ध्यै च लक्ष्मीदेवी संलग्नाऽभूत् । मातुस्त्रिशलायाः सेवायै राजप्रासादस्य परिचारिकास्त्ववर्तन्तैव सहैव स्वर्गस्य देवाङ्गना अपि शुश्रूषायै सम्प्राप्ता आसन् ।

प्रसङ्गोऽयं **'वीरजिणिंदचरिउ'** काव्येऽतीव काव्यात्मना वर्णितः । यथा—

दुवई— कय विब्भम-विलास परमेसरि बालमराल-चारिणी ।
कंकण-हार-दोर-कडिसुत्तय-कुंडल-मउड-धारिणी ॥
चंदक्क-कंति संपण्णकित्ति । सिरि हरि सलच्छि दिहि पंकयच्छि ।
सइ कित्ति बुद्धि कम-गब्भ-सुद्धि । आसाढ-मासि ससियर पयासि ।
पक्खंतरालि हय-तिमिर-जालि । दिस-णिम्मलम्मि छट्ठी-दिणम्मि ।
संसार-सेउ थिउ गब्भि देउ । सम्पण्ण हिट्ठि- कय-कणय-विट्ठि ।
जक्खेण ताम णवमास जाम । मासम्मि पत्ति चित्ता णिउत्ति ॥

इत्यादि ।

अयमस्याशयो यद्—'तीर्थङ्करस्य भगवतो महावीरस्य गर्भावतरणानन्तरं विभ्रम-विलासैर्विभूषिताभिर्बालहंसचारिणीभिः कङ्कण-हार-दोरक-कटिसूत्र-कुण्डल मुकुटादिधारिणीभिश्चन्द्रसूर्य-सदृश-कान्तिमतीभिः कमलनयनाभिः श्री-ह्रीलक्ष्मी-धृति-कीर्ति-बुद्धिप्रभृतिभिर्देवीभिः स्वयमागत्य महाराज्याः गर्भकल्याणकं सम्पादितम् । आषाढमासस्य शुक्लपक्षीय-षष्ठीदिनादारभ्य नव मासावधि धरणेन्द्रयक्षः स्वर्णवृष्टिं सम्पादयति स्म ।' इत्यादि ।

समस्तमप्यन्तःपुरं हर्षपूर्णं व्यराजत । देव्यास्त्रिशलाया मनोरञ्जनाय विविधाः सामग्रचः सज्जीकृताः । प्रतिक्षणं तस्याः सुविधायै ध्यानं दीयते स्म । सेवार्थमुपयाता देव्यः सङ्गीतेन नृत्येन नव-नवेन च रूपकेण देव्या मनो विनोदयन्ति स्म । कदाचिद् भित्तिषु काष्ठफलकेषु वस्त्रेषु च विद्धचित्राणि अविद्धचित्राणि रसचित्राणि वा निर्माय देवीं प्रसादयन्ति स्म । कदाचिच्च लोकजीवनस्य प्रेरणामयीं लीलां वर्णयित्वा लोकगीतानि गात्वा प्रकृतेः पुण्यानि वर्णनानि प्रस्तुत्य च मातरं ता अन्वरञ्जयन् ।

एवं नृत्यगोष्ठी-संगीतगोष्ठी-नयगोष्ठी-शास्त्रगोष्ठीप्रभृतिभिस्त्रिशलाया मनसि रस-माधुर्यस्य सञ्चारः क्रियते स्म । महाराजः श्रीसिद्धार्थोऽपि गर्भवत्यास्त्रिशलाया दोहद-पूरणे पूर्णतया सावधान आसीत् । मातुस्त्रिशलाया अपि मन आमोद-प्रमोदैः शास्त्रचर्चा-तत्त्वचर्चाभिश्च नितरां पावनतामगाहत । मातुः पवित्राणां संस्काराणां प्रभावो गर्भस्थे शिशावपि पतति स्मैव । तदिदं गर्भकल्याणकं सर्वेषां कल्याणायाभवत् ।

जन्मकल्याणकम्

रवि-रश्मयो भूमेः स्पर्शाय प्रवृद्धाः । तमस आवरणं सहसा विद्रुतम् । सर्वे सर्वेभ्यः प्रत्यक्षीभूताः । अस्पष्टतायाः साम्राज्यं समाप्तम् । स्पष्टता सर्वत्र व्यापृता सती सर्वान् प्रेरयति स्म । एवंविधे पुण्यमये काले प्रियंवदा दासी समुपागता । प्रणम्य च सिद्धार्थमहाराजं पुत्रजन्मनः सूचनमकरोत् । समाकर्ण्य प्रियंवदाया वचनानि महाराजः परमानन्दमविन्दत् । प्रियंवदायै बहुमूल्यान्याभूषणान्युपहाररूपेण वितरितानि दासीकर्मणा च सा सर्वस्मै कालाय विमुक्ता । नव मासोत्तरमष्टदिनानां गर्भावधि-समाप्त्यनन्तरं चैत्रशुक्लत्रयोदश्यामुत्तराफाल्गुनी-नक्षत्रे मध्यरात्रिसमये ग्रहाणामुच्चस्थितौ[1] शिशोः प्रादुर्भावः सर्वत्र हर्षप्रकर्ष-वर्षकः समजायत । विश्ववन्द्य—**तीर्थङ्करश्रीमहावीरस्य** जन्मसमये चतुर्थकाले दुःषम-सुषमयोः पञ्चसप्ततिवर्षोत्तरं त्रयो मासा अवशिष्टा अभूवन् । कुण्डपुरस्य धरा कृतकृत्यतां श्रिता ।

---

१. चैत्रसितपक्ष-फाल्गुनि-शशाङ्कयोगे दिने त्रयोदश्याम् ।
जज्ञे स्वोच्चस्थेषु ग्रहेषु सौम्येषु शुभलग्ने ॥५॥

—निर्वाणभक्तौ पूज्यपादाचार्यः ।

तीर्थङ्करवर्द्धमानस्य वपुः काञ्चनीमाभां धारयदासीत् । मुखमण्डलेऽगणितानां सूर्याणां दीप्तयोऽरोचन्त । नवजातस्य शिशोः कान्त्या सकलोऽपि राजप्रासादस्तन्महिम्ना च सकलमपि भूमण्डलं व्यद्योतत ।

सौधर्मेन्द्रस्य सिंहासनं प्राकम्पत तथा भवनवासिदेवानामावासेषु घण्टाध्वनिरभवत् । अवधिज्ञानेन देवैर्ज्ञातं यत् कुण्डग्रामेऽन्तिमतीर्थङ्करस्य भगवतो महावीरस्य जन्म सम्पन्नम् । ते हर्षनिर्भरमानसाः समस्तेन परिवारेण परिवृताः कुण्डपुरं प्राप्ताः । नन्द्यावर्तप्रासादमागत्य सौधर्मेन्द्रेण परिक्रमाऽऽचरिता तथा प्रियकारिण्याः स्तुतिर्गीता ।

इन्द्राणी प्रसूतिगृहं प्राप्ता । तया मातुः सान्त्वनायै मायामयो बालस्तत्र शायितस्तथा तीर्थङ्करं वर्धमानं क्रोडे नीत्वा बहिरायाता शिशुश्च सौधर्मायार्पितः । स चैरावतोपरि स्थित्वा सकलेन देवपरिवारेण सह सुमेरुपर्वतस्य रत्नमय्यां पाण्डुक-शिलायां तं संस्थाप्य क्षीरोदर्णनिर्मलेन जलेन तमभ्यषेचयत् ।

अभिषेकानन्तरं सुरराजः श्रीवर्द्धमान वैशाल्या राजमार्गेण कुण्डपुरमानीतवांस्तथेन्द्राणी पूर्ववदेव प्रसूतिगृहं गत्वा तं शिशुं मातुः प्रियकारिण्याः पार्श्वेऽशाययत् ।

शिशोर्महावीरस्य जन्मनैव राज्ञः सिद्धार्थस्य बलं वैभवं चावर्द्धताम् । सर्वत्र महाराजस्योदाराशयतायाः ख्यातिः प्रसृता ।

नामकरणमहोत्सवः

महाराजः श्रीसिद्धार्थः शुभेऽहनि मङ्गले मुहूर्ते मङ्गलमयस्य जगतो मङ्गलायाविर्भूतस्य शिशोर्नामकरणोत्सव-सम्पादनेच्छया समस्तान् बन्धुबान्धवान् स्वेष्टमित्राणि च समामन्त्र्य बालकस्य नामकरण-विधिं समपादयत् । उत्सवे समागताः सर्वेऽपि प्रियजना नयनाभिरामं बालं विलोक्य परमं मुदमविन्दन् मङ्गलोपहारांश्च समार्पयन् । तेषां सत्कार-विधिमभिलक्ष्य विविधा आमोद-प्रमोदा अभवन् प्रतिदानेन च महाराजस्तान् समतोषयत् ।

तस्मिन्नवसरे महाराजोऽकथयत्—"अयं शिशुर्महाभागोऽस्ति । अयं यस्माद् दिनात् त्रिशालाया गर्भमागतस्त-दाप्रभृत्येवास्माकं प्रासादे, नगरे राज्ये च धन-धान्यादीनां वृद्धिरभवत् । अतोऽस्य सार्थकं नाम 'वर्द्धमान' इति कर्तव्यम् । उपस्थितेन जनसमुदायेन महाराजस्यायं प्रस्तावः सहर्षमनुमोदितो वीरबालकोऽयं 'वर्द्धमान' इति नाम्ना च प्रसिद्धिं प्राप्नोत् ।

सिद्धार्थप्रियकारिण्योः सममानन्ददायकम् ।
वर्द्धमानाख्यया स्तुत्वा सदेवो वासवोऽगमत् ॥२।४॥

इति हरिवंशपुराणानुसारं देवराडिन्द्रोऽपि तत्रागतैरन्यैर्देवैः सह नामकरणोत्सवमिमं सम्पाद्य वर्द्धमाना-भिधानं चानुमोद्य देवपुरीं प्रस्थितः ।[1]

१—भगवतो महावीरस्याभिधान-विषये—'आवश्यक-निर्युक्ति-विशेषावश्यकभाष्य—कल्पसूत्राचाराङ्ग-सूत्रकृताङ्ग—महावीरचरित्र—चउप्पन्न—महापुरिस-चरिय-त्रिषष्टि-शलाकापुरुषचरित्र-पउमचरिय-हरिवंशपुराणोत्तर-पुराणादिग्रन्थेष्वपि वर्णनानि सन्ति, येषु 'वर्द्धमान' इति नामनिर्धारणमधिकृत्य सिद्धार्थस्याभिवृद्धिरेव हेतुरूपेण साधिताऽस्ति । तत्रैवेदमपि क्वचिद् वर्णितमस्ति यत् महावीरस्य मातुर्गर्भागमनानन्तरमेव सिद्धार्थनृपतेः स्नेहे सत्कारे च क्रमशो वृद्धिर्भवति स्म तस्मान्महाराजेन जन्मनः पूर्वमेव पुत्रस्य 'वर्द्धमान' इति नाम करणाय निश्चितमासीत् । तत्सङ्कल्पानुसारमेव सत्यवसरे नामेदं निर्धारितमिति ।

भगवतो नामान्तराणि

भारतीयसंस्कृतौ नामकरणाय ये सिद्धान्ताः स्वीकृताः सन्ति तेपु गुण-कर्म-जाति—मातृकुल-पितृकुल-स्वकुल-स्वेष्टदेवादीनामाधारेण नामानि निर्धार्यन्ते। भगवतो महावीरस्य नामनिर्धारणेऽप्येषा प्रवृत्तिः स्वीकृतिं श्रिता। तदनुसारं च—

भगवतो ज्ञातृकुले जन्माभूदिति दृष्ट्या ज्ञातपुत्रः (नायपुत्तो नातपुत्तो वा), काश्यपवंशे समुद्भवात् काश्यपः (कासवः), वैशाल्या अतिसम्पर्कवशाद् 'वैशालिकः', सञ्जय-विजयनाम्नोश्चारणमुन्योर्मानसिकचाः शङ्काया निराकरणात् 'सन्मतिः', मातृकुलाधारेण 'विदेह' इत्यादीनि नामानि प्रथितानि।

सर्वतो व्यापकं नाम 'महावीर' इत्यस्य विपये तु बहूनामागमानां ग्रन्थानां च निर्देशोऽस्ति यद् "भगवान् कीदृशेऽपि भये समुपस्थितेऽचल एव स्थास्यति, सङ्कल्पाद् मनागपि न चलिष्यति, निष्कम्पः सन् परीपहादीनुपसर्गांश्च शान्तेन भावेन सहिष्यत इति भाविनो गुणान् ज्ञात्वा वज्री 'महावीर' इति नाम घोपितवानिति।"[1]

भगवतो महावीरस्य विश्वविश्रुतं नाम 'महावीर' इत्येवास्ति। तत्त्वार्थसूत्रस्य प्रारम्भिक्यां कारिकायां 'जगति महावीर इति त्रिदशैर्गुणतः कृताभिख्य' इति प्रतिपादितम्। आचार्यः श्रीहरिभद्रोऽपि दशवैकालिकस्य वृत्तौ "महावीरेण—शूरवीर—विक्रान्ताविति कषायादि—शत्रुजयान् महाविक्रान्तो महावीर" इति वर्णयति स्म। जिनदासगणी महत्तरोऽपि 'महंतो यसो गुणेहिं वीरोत्ति महावीरो' (दशवैका० जिनदासकृत-चूर्णौ) इत्यादि कथयित्वा महावीराभिधानमेव सर्वलोकप्रथितं नामेति प्रकटितवान्। एतेन स्पष्टं भवति यद् भगवतो वर्धमान इति नाम सत्त्वेऽपि धीरता-वीरतादिगुणैः 'महावीर' इत्येव नाम सर्वप्रसिद्धमभूदिति।

जन्मकुण्डली-विचारः

भगवतो महावीरस्य जन्म-कुण्डली बहुपु ग्रन्थेपु समुपलभ्यते। आगमेषु केवलं 'ग्रीष्मर्तौः प्रथमे मासे द्वितीये पक्षे हस्तोत्तरानक्षत्रे चैत्रशुक्ल-त्रयोदश्यां श्रमणभगवतो महावीरस्य जन्माभूदिति' वर्णनं विद्यते। कल्पसूत्रे—'उच्चठाणगएसु गहेसु' 'पुव्वरत्ता व रत्तकालसमयंमि' इत्यादि वर्णनं मिलति। टीकाकारा एतदेव सूचनं विशिष्टरूपेण परिशील्य येषां ग्रहाणां स्थितीः समसूचयन् तदनुसारं या कुण्डली सर्वत्रोपलभ्यते तस्याः स्वरूपमित्थमस्ति—

---

१. (क) भीमं भयभेरवं उरालं अचेलयं परिसहं सहइ त्ति कट्टु देवेहिं से णामं कयं 'समणे भगवं महावीरे।'
—आचारांग० २।१५-१६॥

(ख) अयले भयभेरवाणं परीसहोवसग्गाणं खंतिखये पडिमाणं पालए धीयं अरतिरतिसहे दविए वीरियसंपन्ने देवेहिं से णामं कयं 'समणे भगवं महावीरे'। —कल्पसूत्र० १०४

(ग) घोरं परीसहचमुं अधियासित्ता महावीरो।
—आवश्यकनिर्युक्ति ४२०

(घ) महोपसर्गैरप्येष न कम्प्य इति वज्रिणा।
महावीर इत्यपरं नाम चक्रे जगत्पतेः॥
—त्रिषष्टि० १०।२।१००।

तीर्थङ्करस्य भगवतः श्रीमहावीरस्य जन्मकुण्डली

एतदनुसारं ज्योतिषशास्त्राणि ग्रहाणां दृष्ट्यैवंविधानि फलानि वर्णयन्ति—

(१) यदा जातकस्य जन्म चरलग्ने भवति तथा गुरुः शुक्रो वा पञ्चमे भावे स्थितो भवेत् शनिश्च केन्द्रे स्थितो भवेत् तदा जातकस्तीर्थनायको-वतारी वा भवति ।

(२) सप्तमे भावे राहुः स्थितो भवेत् भावेऽस्मिश्च पापग्रहस्य दृष्टिः स्यात्, सप्तमश्च पापाक्रान्तो भवेत् तदा पत्न्या अभावो भवति । ईदृशस्य जातकस्य विवाहो न भवति । अनेन योगेन जातकस्य संयमित्वमपि सूचितं भवति ।

(३) तीर्थङ्करमहावीरस्य जन्मकुण्डल्यां शुक्रचन्द्रमसोः स्थितिर्विंशत्युत्तरमेकशतमंशानामन्तराले विद्यते। स्थितिरियं तेषां सर्वज्ञताया वीतरागतायाश्च सूचिकाऽस्ति । चन्द्रो नवमभावे बुधस्य गृहे स्थितः । बुधश्च केन्द्रे सूर्येण सह विराजते । चन्द्रः सप्तमेशोऽपि विद्यते । अतो महावीरस्य द्वादशवर्षाणां साधनायाः सूचका एते ग्रहाः सन्ति । नवमस्थश्चन्द्रमा दर्शनशास्त्राणामाचारशास्त्राणां विविधज्ञानविज्ञानानां चाभिज्ञतां सूचयति । जातकोऽनुपमप्रभावधरः समाजोद्धारकश्च भविष्यतीति ज्ञायते ।

(४) महावीरस्य जन्मकुण्डल्यां 'चन्द्रचूड'योगो विद्यते । भाग्येशो बुधः केन्द्रे स्थितः । अस्मिन् योगे समुत्पन्नो बालः प्रसिद्धज्ञानशाली, धर्मप्रचारक आत्मज्ञानी च भवति लोककल्याण-भावनां च लग्नस्थो भौमः सूचयति । लग्नगत उच्चैःस्थो भौम उपसर्गाणां परीषहाणां जयित्वमपि व्यञ्जयति ।

एवं भौम-बुध-गुरु-शुक्र-शनिग्रहाणामुच्चस्थित्या पञ्चमहापुरुषयोगः सञ्जातः स च महावीरस्योत्कृष्ट-महापुरुषत्वेन सह तीर्थङ्करयोगं प्रपूरयति ।

भगवतो बाल्य-जीवनम्

तीर्थङ्करो वर्धमानो द्वितीयायाश्चन्द्रमस इव क्रमशो वृद्धिं गच्छति स्म । जन्मनः प्रभृत्येव तस्य शारीरिकी सुषमाऽनुपमाऽऽसीत् । वर्धमानस्य रक्तं दुग्धधारेव धवल-धवलमभूत् । वाणी मधुर-मधुरा मनोमोहिनी व्यराजत । शरीरं शङ्ख-चक्र-गदा-पद्म-यव-धनुः-प्रभृत्यष्टोत्तरसहस्रसङ्ख्याकैः शुभलक्षणैरन्वितमासीत् । शिशोर्दक्षिणे चरणे सिंहस्य चिह्नमङ्कितमासीदतस्तं दृष्ट्वा भाविनः पुरुषार्थस्य प्रतीकं मत्वा महावीरस्य चिह्नं सिंहमेव सुरराजेन प्रकटितम् ।

माता प्रियकारिणी तनयं हिन्दोलिकायां दोलयन्ती तदीयानन-लावण्यं विलोक्यातीवानन्दमनुभवति स्म । वर्धमानस्य शारीरिक्या सहाध्यात्मिकी विभूतिरपि वर्धमाना प्रत्यभात् ।

विशेषावश्यकभाष्ये—

असितसिरओ सुणयणो बिंबोट्ठो धवलदंतपंतीओ ।
वरपउमगब्भगोरो फुल्लुप्पल-गंधणीसासो ।।१८४६।।

औपपातिकसूत्रे च—

अवदालिय पुंडरीयणयणे चंदद्ध समणिडाले वरमहिसवराह-सही-सद्दूल उसभ-नागवरपडिपुन्न-विउलक्खंधे ।

इत्यादि वर्णनानुसारं भगवतः शरीरमुदारं शृङ्गारितमाभरणरहितं सदपि विभूषितं लक्षण-लक्षितं गुणालङ्कृतं श्रिया समन्वितञ्चाभवत् । कमलसदृशी विकसिते नयने, अर्द्धचन्द्र इव दीप्तिमल्ललाटं, वृषभ इव मांसलः स्कन्धः, प्रलम्बौ करौ, सुदृढा शोभनाऽऽकृतिः, निर्धूमवह्निरिव तेजस्वि मुखं स्वर्णप्रभेव निर्मला शरीरप्रभा चाभवन् । ईदृशीमेव विशिष्टतां स्मृत्वा पुष्पदन्तकविवरेण प्रोक्तम्—

जगि भणमि भडारउ कहु समाणु ।।
जो पेक्खिविणउ गंभीरु उयहि । जो पेक्खिवि ण थिरु गिरिंदु समहि ।।
जो पेक्खिवि चंदु ण कंति कंतु । जो पेक्खिवि सूरुण तेयवंतु ।।
मज्झत्थ-भाउ सुह-सुक्क-लेसु । णं धम्मु परिट्ठिअ पुरिस वेसु ।। इति ।।

अयं कविः कथयति यदहं भगवन्तं कमिव वर्णयामि? तमवलोक्य समुद्रस्य गाम्भीर्यं, पृथ्व्याः सुमेरोश्च स्थैर्यमपि सामान्ये अभताम् । शिशोस्तेजस्विता कान्तिश्च-सूर्याचन्द्रमसोः कान्ति-तेजस्विताभ्यामपि प्रशस्ते आस्ताम् । माध्यस्थ-भावेन मुक्तः शुक्ललेश्यावाँश्च श्रीवर्द्धमानः साक्षाद् धर्म इव व्यराजत् ।

भगवतो महावीरस्य लालनं पालनं पवित्रे वातावरणे तत्र नियुक्तानां परिचारिकाणां परिचर्यया सह स्वयं महाराज्ञी त्रिशलाऽनवरतं स्नेहेन सम्पादयति स्म । आचाराङ्गसूत्रे क्रमशः (१) दुग्धपानाय, (२) स्नपनाय (३) वस्त्राभरणधारणाय, (४) क्रीडाविधानाय तथा (५) क्रोडीकरणाय च पञ्च परिचारिका नियुक्ता आसन्निति सूचितम् । तदीयं कुसुममिव कोमलं बाल्यं सुखेनावर्द्धत ।

ज्ञानदीप्त्या तच्छरीरमनवरतं देदीप्यमानमभवत् । एकमखण्डं ज्योतिस्तं प्राकाशयत् । मति-श्रुतावधिज्ञानानां प्रकाशस्तमालोकयत् सौन्दर्यराशिः स्वयमाविरभवत् । साम्प्रतं वर्धमानः प्रासाद-परिसरं परित्यज्य क्रमेण क्रीडासक्तः सवयोभिः सखिभिः सह गृहोद्यानेषु वीथिषु चत्वरेषु पुरजनावासपरिसरेषु चाप्यगच्छत् । जना अलौकिकप्रभापरिषिक्तं बालमिमं दृष्ट्वा दृष्ट्वाऽऽनन्दसरसी-समवगाहनमिव परमां शान्तिमन्वभवन् । सर्वेऽपि महाराज्यास्त्रिशलाया महाराजस्य सिद्धार्थस्य कुण्डपुरवासिनां च सौभाग्यानि प्रशंसन्ति स्म ।

यदा वर्द्धमानोऽष्टवर्षदेशीय आसीत् तदा गृहोद्याने स्वकीयैः साखिभिः सह क्रीडामकरोत् । तदा सौधर्मेन्द्रस्य सभायां महावीरस्य पराक्रमविषयिणी वार्ता प्रवृत्ता । तत्रेन्द्रोऽकथयत्—'बालको महावीरः शैशवादेवात्यन्तं साहसी पराक्रमशाली च विद्यते । देवो दानवो मानवो वा कोऽपि तं पराजेतुं न शक्नोति ।'

सङ्गमनामको देव इन्द्रस्य कथनेऽस्मिन् विश्वासमकृत्वा महावीरं परीक्षितुमगच्छत् । तत्र च—

दृष्ट्वोद्यानवने राजकुमारैर्बहुभिः सह ।
काकपक्षधरैरेकवयोभिर्बाल्यचोदितम् ।।
कुमारं भास्वराकारं द्रुमक्रीडापरायणम् ।
स विभीषयितुं वाञ्छन् महानागाकृतिं दधत् ।।

मूलात् प्रभृति भूँजस्य यावत्स्कन्धमवेष्टत ।
विटपेभ्यो निपत्याशु धरित्रीं भयविह्वलाः ।।
प्रपलायन्तं तं दृष्ट्वा बालाः सर्वे यथायथम् ।
महाभये समुत्पन्ने महतोऽन्यो न तिष्ठति ।।
ललज्जिह्वा शतात्युग्रमारुह्य तमहिं विभीः ।
कुमारः क्रीडयामास मातृपर्यङ्कवत्तदा ।।
विजृम्भमाणहर्षाम्भोनिधिः सङ्गमकोऽमरः ।
स्तुत्वा भवान् महावीर इति नाम चकार सः ।।

—उत्तरपुराण० ७४/२८९-२९

एतदनुसारं महावीरस्य धैर्यं पराक्रमो निर्भीकता चातीव प्रशसनीया अभवन् । अस्याः क्रीडाया नामनि 'आमल खेडं' 'आमलकीक्रीडा' 'सुंकलिकडएणं' रुक्खखेड्डेणं द्रुमक्रीडा-प्रभृतीनि क्रमशः शीलाङ्क-हेमचन्द्र-जिनदासगणि-महत्तर हरिभद्र-गुणचन्द्राद्याचार्यैः स्वस्वग्रन्थे लिखितानि[1] ।

एवमेव तिन्दुषकक्रीडायामपि श्रीवर्द्धमानस्याद्वितीयं पराक्रमं ज्ञात्वा सोऽभिमानी देवः प्रान्ते सुरेन्द्रकृतां प्रशंस ततोऽप्यधिकां विज्ञाय श्रीमहावीरं प्रणम्य स्वस्थानं प्रस्थितः ।

श्रीवर्द्धमानो बाल्यादेवातुलबलधरोऽभूत् । आगमेषु तीर्थङ्कराणां बलविषये वर्णितमस्ति यदनन्तानां सुरेन्द्राण बलं तीर्थङ्करस्य कनिष्ठायामङ्गुली भवति । इत्थमेव 'दक्खे-दक्खपइन्ने-पडिरूवे-आलीणे-भद्दए-विणीए' प्रभृति षड्भि विशेषणैर्महावीरस्य सर्वकलादक्षता, दक्षप्रतिज्ञताऽऽदर्शरूपसम्पन्नता कच्छप इव स्वात्मनि गुप्तता शुभलक्षणालङ्कृतत मातृ-पितृ-गुरुजनेषु विनयिता च स्वाभाविक्यो भवन्तीति सूच्यते ।

तीर्थङ्करस्यात्माऽनादिकालादेव संसारे परोपकारस्वभाववान् स्वार्थविरहितः सर्वत्र समुचित-क्रियाचरण शीलो दैन्यरहितः सकलानामेव कार्याणां सम्पादकोऽपकर्तृजनेष्वपि दयावान् कृतज्ञतागुणभूषितो दुष्टवृत्तिभिरप्यदम्य चेता देवगुरुप्रभृतीनां बहुमानकर्ता गम्भीराशय-परिपूर्णश्च भवति । एतदनुसारं श्रीमति महावीरे सर्वेऽपीमे गुण उत्कृष्टरूपेण विकसिता आसन् ।

---

१. (क) पारद्धं च एक्कम्मि तरुणे हेट्ठम्मि आमलयखेड्डं । (चउप्पन्न० २७१)
(ख) कुर्वत्यामलकीं क्रीडां राजपुत्रैः सह प्रभौ । (त्रिषष्टि० १०।२।१०६)
(ग) अह ऊणअट्ठवासो भयवं कीलइ कुमारएहिं सयं
आमलिया खेल्लेणं लोयरसिद्धेण पुरबाहिं ।। (महावीर० ७५ ।)
(घ) आवश्यकचूर्णि पृ० २४६ ।
(ङ) भगवं पुण चेडरूवेहिं समं रुक्खखेड्डेण कीलइ । (आव० हारि० वृत्ति० पृ० १८१)
(च) ··· समं पारद्धो रुक्खखेड्डेण अभिरमिऊं । (महावीर० पृ० १२५)
(छ) कुमारं भास्वराकारं द्रुमक्रीडापरायणम् । (उत्तरपुराण० ७४।२९१)
(ज) मथुरायाः कंकालीटीलातः कुशाणकालिकमेकमीदृशं शिलाखण्डमुपलब्धं यस्मिन् देवपरीक्षायाश्चित्र विद्यते ।

वयसो वृद्धया सह महावीरस्य शारीरिकी वृद्धिरपि क्रमशोऽवर्धत । राजकीयोद्यानेषु राजकुमारोऽयं सहचरैः सह नानाविधाभिः क्रीडाभिः क्रीडन् शनैः शनैः शिक्षण-प्रवृत्तावपि नियोजितः । श्रीमहावीरस्याध्ययनविषये सर्वतः प्रथमं जिनभद्रगणि-विरचिते 'विशेषावश्यक-भाष्ये—

अथ तं अम्मापितरे जाणित्ता अधिय अट्ठवासायं ।
कतकौतुअलंकारं लेहायरियस्स उवणेंति ॥

इत्यादि वर्णनं विद्यते । उत्तरवर्तिनो लेखका विषयमेनमतीव रसमयशैल्या प्रातिष्ठिपन् । बौद्धग्रन्थे 'ओपम्मसयुत्तस्य अट्ठकथायां' वर्णितमस्ति यत् 'तदानीं विदेहे क्षत्रियकुमारान् शिक्षयितुं विशिष्टाः शिल्पशाला आसन् । तासु क्षत्रिय-कुमारेभ्योऽक्षरज्ञानं व्यवहारोपयोगि गणितं नानाविधाः कलाश्च शिक्ष्यन्ते स्म तथा युद्धविद्यायाः सैद्धान्तिकं प्रायोगिकं-च ज्ञानमपि दीयते स्म । धनुर्विद्याया उच्चशिक्षया क्षत्रियकुमारा युद्धे परमनिपुणा अक्षणवेधिनः केशवेधिनश्च भवन्ति स्म ।'

क्षत्रियकुमारोचितायामीदृश्यामेव शिल्पशालायां श्रीवर्द्धमानोऽष्टमवर्षपूर्त्यनन्तरं प्रवेशितः परं तन्मनस्तत्र नारज्यत । यस्य मन आध्यात्मिक-प्रवृत्तौ संलग्नमहिंसावृत्तौ च परिपूर्णं भवेत् स युद्धविद्यायां हिंसकविद्यायां वा कथं रज्येत । ? शिल्पशालाया आचार्येण शिशो रुचिजागर्तये पूर्णरूपेण प्रयासो विहितः परं सर्वमपि निष्फलतामगात् । आवश्यकचूर्णिप्रभृतिग्रन्थेषु वर्धमानस्याध्ययनविषये वर्णितमस्ति यद् 'जन्मसिद्धज्ञानानामलौकिक-प्रतिभायाश्च ज्ञानाभावाद् शिल्पशालां प्रविविक्षोः कुमारस्य बुद्धिवैभवं परिचाययितुं सुरेन्द्रो वृद्धब्राह्मणरूपेण तत्रागतः । सर्वेषां चोपस्थितौ स काँश्चिद् जटिलान् व्याकरणप्रश्नानपृच्छत् । श्रीवर्धमानस्तेषां प्रश्नानामुत्तराणि सप्रमाणमदात् । उत्तराणि श्रुत्वा सर्वे विस्मयं प्राप्तास्तदा विप्ररूपधरेणेन्द्रेण प्रोक्तम्—विज्ञवर ! नायं साधारणो बालकः, अयं तु विद्यायाः सागरः समस्तशास्त्राणां पारगामी चास्ति ।' त्रिषष्टिशलाकापुरुषचरित्राधारेणेदमपि ज्ञायते यद् ब्राह्मणः स भगवता प्रोक्तानि सर्वाण्यपि व्याकरणसम्बन्धीन्युत्तराणि सङ्गृह्य 'ऐन्द्रव्याकरण'नाम्नाऽघोषयत् ।[1]

पितरौ बालस्य लोकोत्तरं ज्ञानं प्रतिभां च विज्ञायातीव प्रसन्नावभूताम् । ताभ्यां ज्ञातं यदावयोस्तनयोऽयं तु गुरूणामपि गुरुरस्तीति ।

युवावस्था विवाहोपक्रमश्च

भगवतो महावीरस्य पितरौ पार्श्वपरम्पराया अनुयायिनावास्ताम् । तयोरहिंसा-करुणा-संयमशीलता-प्रभृति-गुणैः समग्रं जीवनमालोकितमभूदतो महावीरस्य जीवनमपि तथैव सुसंयतमासीत् । यौवनलक्ष्मीः स्वयं वरीतुं प्रवृत्ता । सप्तहस्तपरिमितं तच्छरीरं स्वाभाविकैरतिशयैर्युक्तं[1] सत् सर्वेषां मनोमोहकमभूत् । राज्ञी त्रिशला राजा सिद्धार्थश्च

---

१. इदं भगवतेन्द्राय प्रोक्तं शब्दानुशासनम् ।
उपाध्यायेन तच्छ्रुत्वा लोकेष्वैन्द्रमितीरितम् ॥१०।२।१२१।

१. तीर्थङ्करा जन्मन एव नामकर्मप्रकृतिसमुदयात् तीर्थङ्कराणां दशभिरतिशयैरन्विता भवन्ति । ते चातिशयाः— १—स्वेदरहितता २—निर्मलशरीरता, ३—गोक्षीरधाराधवलरुधिरता, ४—वज्रऋषभनाराचसंहननता, ५—समचतुरस्रशरीरसंस्थानता, ६—अनुपमरूपता, ७—नृपचम्पकसमानोत्तमगन्धधारकता, ८—अष्टोत्तर-सहस्रोत्तमलक्षणसमन्विततता, ९—अनन्तबलशालिता १०—हितमित-मधुरभाषिता चेत्यादयः सन्ति ।

स्वकीयं परमप्रियं तनयं वीक्ष्यातीव मुदमन्वभवताम्। युवावस्थायाः प्रवेशात् पूर्वमेव तदीया जन्मसिद्धा वैराग्यवल्लरी समङ्कुरिता भवति स्म। वैराग्यं शनैः शनैर्वर्धमानं सदात्मशुद्धिं प्रति गतिशीलमभवदेव। संसारस्य वैभवानि निःसाराणीवासन्। लोकजीवने व्याप्तानामनौचित्यानामध्ययनपूर्वकं वर्धमानस्य मनो मानवद्वारा मानवशोषणमपाकर्तुं चेष्टते स्म। श्रीमहावीरः प्रारम्भादेव काँश्चन नियमान् स्व्यकरोत्। तेषु च—

(१) जीवदयाऽहिंसावृत्तिश्च

(२) सत्यभाषणम्

(३) अचौर्यव्रतपालनम्

(४) ब्रह्मचर्यव्रतधारणम्

(५) अभिरुचीनां सङ्कोचः

इत्यादयः प्रमुखा आसन्। अत एव श्रीवीरः काम-क्रोध-लोभ-मोहाद्यन्तरङ्गशत्रुभिः सह योद्धुं सज्जो भवति स्म। ततश्च राजकुमारस्य यौवनं, बुद्धिवैभवं, आमोद-प्रमोदसाधनानि, दासदासीसमवायं च विलोक्य माता कामनामकरोद् यन्मम सूनुरयं समानरूपयौवन-सम्पन्नां राजकुमारीं परिणीय नन्द्यावर्त-प्रासादस्य शोभां वर्द्धयेदिति।

समुचिते काले कामनेयं प्रस्तावरूपेण महाराजस्य पुरत उपस्थापिता। को नाम जनकस्तनयं कल्याण-परम्परा-परिषिक्तं प्रेक्षितुं नाभिलषेत्? सहर्षं त्रिशलायाः प्रस्तावोऽनुमोदितः। मन्त्रिणोऽप्यत्र सम्मता एवासन्। अनेके राजानः स्वीयानां कुमारीणां परिणयाय लालायिताः सन्तोऽनुनयानकुर्वन्। कलिङ्गदेशस्य भूपतेर्जितशत्रोः कन्या यशोदाऽतीव रूपलावण्यसंयुताऽऽसीत्। तां विलोक्य त्रिशलादेवी सिद्धार्थभूपतिश्च तां वधूरूपेणावलोकयितुमुत्कण्ठितावभूताम्। विषयेऽस्मिन् वर्द्धमानस्य विचारं ज्ञातुं माता प्राप्तावसरे प्रेम्णा पुत्रमवोचत्—'वत्स! अस्माकं सौभाग्यमिदं यत्त्वमस्मत्कुलेऽवतीर्णोऽसि। तीर्थङ्करो भूत्वा त्रिलोकपूज्यो भविष्यसि, त्रयाणामपि लोकानां जनास्तव दर्शनानि कृत्वा कृतकृत्या भविष्यन्ति। अहमपि त्वां विलोक्य परमानन्दमनुभवामि। नन्दन! आवयोरियं बलवतीच्छा वर्तते पुत्रत्वभावना च तां भूयोऽपि मुखरीकरोति यदावां त्वां वधूसहितं पश्येवेति।'

कुमारो वर्द्धमानः प्रसविव्या वचनानि निपीय किञ्चित् स्मयमानो मातरं प्रत्युवाच—"**मातः! इदं तव ममत्वस्य प्रदर्शनमेवास्ति। भवत्या विश्वं प्रति नयने प्रसार्य न दृष्टम्। कीदृग् दुःखितमस्ति विश्वम्? शीलधर्मस्य कीदृशी दुरवस्था भवति? जननि! लोककल्याणाय धर्म-तीर्थस्य पुनः स्थापनाय च ममावश्यकता वर्तते। अहं खिद्ये, यत्तवैषोऽभिलाषः पूर्तिं न यास्यति। अहं विवाहबन्धने बद्ध्वा संसारस्य चक्रावर्ते न पतिष्यामि। ममेयं बलवतीच्छाऽस्ति यदहं विवाह-बन्धने न पतित्वा सत्यमनुसन्धास्यामि जीवनस्य श्रेष्ठताञ्च वरिष्यामि।**"

राजमाता त्रिशला चकित-चकिता सती कारुण्यपूर्णेन स्वरेणावदत्—"पुत्र, विवाहं न करिष्यसि? किमहं पौत्रस्य मुखावलोकनाद् वञ्चितैव स्थास्यामि? मातुर्मातृत्वं पौत्रप्राप्त्यैव पूर्णतां प्रतिपद्यते।"

राजकुमारो महावीरोऽकथयत्—'मातः! मया लोकस्यात्मनश्च कल्याणाय महाव्रतं स्वीकृतम्। पश्यत्येव भवती, समग्रोऽपि लोकः सत्याद् दूरं गच्छति। हिंसायाः सर्वत्र साम्राज्यं वर्द्धते। ज्ञानं परित्यज्य जना अज्ञानं श्रयन्ते। अतोऽहं तमःप्रकाशे परिवर्तयितुं वाञ्छामि, सामाजिकीं सांस्कृतिकीं क्रान्तिं च समुद्भाव्य समाजं सत्यं पन्थानं दर्शयितुमभिलषामि। अहं जीवनस्य निर्मलं लक्ष्यं विहाय विषय-वासनासु लिप्तो भवितुं नेच्छामि। साधनायां परिग्रहः सर्वतोऽधिकं बाधको भवति स च परिग्रहः पारिवारिकैः सम्बन्धैरवाप्यते। अतोऽस्य सर्वथा त्याग एव श्रेयान् भवति। विवाहो जीवनस्य परिधिं सङ्कीर्णयति, तस्मादस्य परित्यागस्त्वावश्यक एव न ह्यपित्वनिवार्योऽपि विद्यते।

सत्यं प्रसन्नताया जनकं सभ्यतायाः समुत्पादकञ्च । इदमेव जीवनं श्रेष्ठं पवित्रं च सम्पादयति । सर्वतः समुन्नता महत्त्वाकाङ्क्षा यदि कस्यापि भवितुं शक्नोति तदा सा सत्यज्ञानस्यैव । सत्यमेव मानवं परोपकाराय विशिष्य प्रेरयति । इदमेवात्मनः पवित्रः प्रकाशः । सत्यमन्वेषणाल्लभ्यते, तपसो लभ्यते लक्ष्यते चानुभवात् ।'

राजमाता पुत्रस्य वचनानि श्रुत्वा स्तब्धाऽभूत् । सा चिन्तयति स्म यदहं पुत्रमुद्वाह्य राजभवनं पुत्रवध्वा आगमनेन मङ्गलगीतिभिर्मुखरितं करिष्यामि । पुष्पवत् सुकुमारी पुत्रवधूर्यदा राजभवनस्य प्राङ्गणे विचरिष्यति तदा मम सर्वेऽपि स्वप्ना मूर्तिमन्तो भविष्यन्तीति ।

परं महावीरेण तु मम सकलोऽपि स्वप्न-प्रासादो धूलिसात्कृतः । पुनरपि सा साहसमवधार्य प्रोवाच 'पुत्रक ! त्वं लोककल्याणे प्रवर्त्स्यसि, अधर्मस्याज्ञानस्य च तमस्तिरस्करिष्यसि किन्त्वस्य किं भविष्यति ? क एनद् रक्षिष्यति ?'

संयतेन स्वरेण महावीर उदतरत्—"मातः ! सर्वं वस्तु विनश्वरम् । यच्च विनश्यद् वस्तु तत्कृतेऽस्माभिश्चिन्तावद्भिर्न भवितव्यम् । अस्माभिस्तु शाश्वतं सत्यं प्राप्तव्यं सम्प्राप्तेन तेनैव सत्येन समाजो व्यवस्थापनीयः । नेदं जीवनात् पलायनमपि तु वास्तविकेन जीवनेन सह सामञ्जस्यस्थापनं विद्यते ।"

पुत्रस्यादम्यां वैराग्यभावनां विलोक्य माता मौनमास्थिता । वस्तुतः सा साधारणा माता नासीत् । तीर्थङ्करं पुत्रं जनयित्वा सा महद्गौरवान्विताऽभूत् । तस्या हृदये धर्मज्ञानं श्रद्धा जनकल्याणभावना च निरतं विद्यमाना एवासन् । साऽऽत्मनस्तनयं परिणाययितुमवश्यमचेष्टत परं नैवमवाञ्छद् यद् महावीरो जीवनस्य सत्यं मार्गं परित्यजेत् । अतस्तयाऽनुभूतं यन्महावीरस्य कथनं यथार्थमेवास्तीति ।[1]

तीर्थङ्करमहावीरस्य जन्म वैभवपूर्णे परिवेशेऽभूत् । तस्य परितः परिवारस्य वैशालीगणतन्त्रस्य च समृद्धिर्व्याप्ताऽऽसीत् । यौवने विवाहाकरणसङ्कल्पाद् हृदये विराग-प्रवृत्तिरधिकं स्फुरिताऽभूत् । राजभवने नर्तकीनां परिचारिकाणां नूपुरझङ्काराः श्रुतिपथमायान्ति स्म । परिचारका इच्छाभिव्यक्तेः पूर्वमेव सर्वमपीप्सितं पुरोऽकुर्वन् ।

राजभवने पञ्चेन्द्रियाणां सर्वाणि सुखानि पूर्णरूपेण सुलभान्यासन् । अशन-वसनानां भोगोपभोगानां वस्तून्यपि प्रस्तुतान्येवाभूवन् । नृत्यं वाद्यं सङ्गीतं मनोरञ्जनं च प्राचलदेव । परं वर्द्धमान एतेभ्यः सर्वेभ्यः पृथग्भूयात्मचिन्तनेऽनवरतं सम्मग्नः सन् जल-कमलमिव राजप्रासादेऽवसत् ।

संसाराद् विरतिः

एकदा श्रीवर्द्धमानस्य स्मृतौ तदीयाः पूर्वभवानां घटनाः सहसैव समुद्भूताः । सोऽज्ञासीद् यद् 'अहं पूर्वस्मिन् भवे षोडश-स्वर्गस्येन्द्र आसम् । तत्र मया द्वाविंशतिसागरावधि दिव्या भोगोपभोगा भुक्ताः । तस्मात् पूर्वतने भवेऽहं संयमधारणपूर्वकं तीर्थङ्कर-प्रकृतेर्बन्धमकार्षं यस्योदयोऽस्मिन् भवे भविष्यति । सम्प्रति धर्मस्य नाम्ना पापात्याचारा वर्धन्तेऽतः पापनाशोऽज्ञानस्यापाकरणं चात्यावश्यके स्तः । यावदहं संयमं न गृहीष्यामि, तावदात्मशुद्धिं कर्तुं न शक्ष्यामि

---

१. भगवतो महावीरस्य विवाहविषये श्वेताम्बरसम्प्रदायस्य मान्यता पृथग् विद्यते । तत्र वर्णितमस्ति यन्महावीरस्य रुचिर्विवाह-विषयिणी कथमपि नासीत् परं मातुराग्रहवशात् समरवीरनामकस्य महासामन्तस्य 'यशोदा'-नाम्न्या कन्यया सह विवाहः कृतः । कालक्रमेणैकं पुत्रीरत्नमपि प्राप्तं यस्य नाम 'प्रियदर्शना'ऽभवत् । कालान्तरे तस्या विवाहश्च तस्मिन्नेव नगरे 'जमाली'नामकेन क्षत्रियकुमारेण (यो हि भगवतो ज्येष्ठभगिन्याः सुतोऽभूत्) सह सम्पन्न इति ।

तथा यावत् स्वयं शुद्ध-बुद्धो न विष्यामि तावद् विश्वस्य कल्याणं दुःशकम् । अतो मोह-कर्दमाद् बहिर्निःसृत्य मयाऽऽत्म-विकासः करणीयः ।

'एवं वर्धमानस्य हृदये वैराग्य-भावना समुद्भूता तस्मिनेव समये लौकान्तिका देवास्तत्समक्षमुपस्थिताः प्रोचुश्च 'भवता यत् संसारस्य मोहत्यागपूर्वकं विषय-भोगेभ्यो विरज्य संयमधारणाय विचारितं स विचारो नितान्तं हितावहः । भवन्तस्तपस्त्याग-संयमैरेवाजरामरं पदं प्राप्स्यन्ति विश्वज्ञातारो द्रष्टारो भविष्यन्ति तथा विश्वमुद्धरिष्यन्तीति ।'

लौकान्तिकदेवानां वचांस्याकर्ण्य वर्द्धमानस्य वैराग्यं भूयोऽपि प्रगाढमविचलं चाभूत् । तैः कुण्डपुरस्य राजभवनं विसृज्यैकान्ते वने आत्मसाधनायै दृढं निश्चितम् । राजा सिद्धार्थो ब्राह्मणेभ्यः किमिच्छकं दानं दत्त्वा तान् समतोषयत् ।

तदानीमेवेन्द्रस्यासनं कम्पितम्, अवधिज्ञानाच्च सोऽन्तिमतीर्थङ्करस्य वर्द्धमानस्य वैराग्यभावनां ज्ञातवान्, तदा देवगणैः सह तत्कालमेव कुण्डपुरस्य राजभवनमुपागतः । आगत्य च हर्षोत्सवं कृतवान् ।

यदा त्रिशला राज्ञी राजकुमारस्य वर्द्धमानस्य संसाराद् विरक्तेः समाचारान् ज्ञातवती, तदा सा पुत्र-स्नेहवशाद् विह्वलतां प्राप्ता । तस्या हृदि विचारोऽयमायातो यद्—'राजसुखे सम्पुष्टो मम सुतो वन-पर्वतानां कण्ट-काकीर्णे स्थाने नग्नः सन् शीत-ग्रीष्मजानि कष्टानि कथं सहिष्यते ? कथं वा तादृशे पथि विहरिष्यति ? नग्नेन शिरसा वपुषा चातप-वर्षादि-प्रभवानि दुःखानि कथं तरिष्यति ? कथं तत् कठिनं तपः क्व च तदीयं कोमलं वपुः ?' इत्येवं मनस्येव मनसि चिन्तयन्ती संज्ञाहीनाऽभूत् । तदानीमागतैर्देवैस्त्रिशला सम्बोधिता—'मातः ! तव पुत्रोऽतीव बलवान् धीरो वीरो वज्र-वृषभ-नाराच-संहननश्चास्ति । साम्प्रतं स सर्वोच्चं पदं प्राप्तुं गच्छति, तत उच्चं किमपि पदं न भवति । तव पुत्रः केवलमात्मन एवोद्धर्त्ता न भविष्यति, अपि तु परं सोऽनेकेषां प्राणिनां संसारार्णवात् तारको भविष्यति । 'अये वीरमातः ! मोहावरणमपाकुरु । त्वं धन्याऽसि । त्वां 'विश्वोद्धारकतीर्थङ्करस्य जननी'ति कथयित्वा संसारोऽनन्तकालं यावद् यशोगाथाभिः स्तोष्यति ।'

एवं देवैः सम्बोधनं लब्ध्वा राज्ञी त्रिशला प्रबोधमुपगता तथापि पुत्रवियोगविह्वला सती तदीय-सौख्य-कामनया च चिन्तातुराऽवर्तत । वन्यानां हिंस्रजीवानामुपद्रवसङ्कुले प्रदेशे निवासजन्य-कष्टान्यनिष्टानि च कथमयं तरि-ष्यतीति चिन्ताकुलचित्ताऽवसत् । वर्द्धमानो मातरं पितरं परिवारजनाँश्च समाश्वास्य राजभवनाद् निःसृतः ।

कुण्डपुराद् बहिः विरक्तं कुमारं वर्द्धमानं नेतुं चन्द्रप्रभा नाम्नी रमणीया शिविका समानीता । तस्यां वर्द्धमानो निषण्णः । जय-जयारावैः सह पूर्वं मनुष्यैः पश्चादिन्द्रादिदेवैः शिविका स्वे स्वे स्कन्धे धारिता ज्ञातृखण्ड-वनं च प्रापिता ।

शाद्वलितं वनप्रान्तम्, विशुद्धो गन्धवहः, सर्वत्रापि नीरवा शान्तिः । तत्र शिविकाऽवतारिता । वर्द्धमानेनोत्सा-हेन तीर्थङ्करवर्द्धमानोऽवतरितः । आसीदत्रैका स्वच्छा शिला । अत्रेन्द्राण्या रत्नचूर्णेन स्वस्तिकस्य कलापूर्णा रचना विहिता । तस्योपरि श्रीवर्द्धमानोऽतिष्ठत् । तदनन्तरं शरीरस्य समस्तानि वस्त्राभरणानि पराकृत्य प्राकृतिकः स्वतन्त्रः नग्नश्रमणवेषः स्वीकृतः । स्वहस्ताभ्यां शिरः केशानां पञ्चमुष्टिलुञ्चनं विहितम्, यदासीच्छारीराद् मोहत्यागस्य प्रतीकभूतम् । तदनन्तरं 'नमः सिद्धेभ्यः' इति कथनपूर्वकं सिद्धान् नमस्कृत्य पञ्चमहाव्रतानि पिञ्छकं कमण्डलुं च धारितवान् तथा सर्वसावद्यं त्यक्त्वा पद्मासनं विधायात्मध्याने निमग्नः ।

सुरराजस्तीर्थङ्करस्य केशान् समुद्रे प्रक्षेप्तुं रत्नमञ्जूषायां न्यदधात् । एवं चरमतीर्थङ्करश्रीमहावीरस्य मार्गशीर्षकृष्णदशम्यां हस्तोत्तरयोर्मध्यवर्तिनि समये दीक्षोत्सवं परिसमाप्य समस्ता इन्द्रादयो देवाः स्वस्वस्थानं प्रति प्रस्थिताः ।

बाह्येभ्यो विचारेभ्यो मनो निरुध्य मौनभावेनाचले पद्मासने स्थित्वा तीर्थङ्करो महावीरो यदाऽऽत्मचिन्तने निमग्नस्तदानीमेव तस्य मनःपर्ययज्ञानस्योदयोऽभवद् यो हि निकटे भविष्यति केवलज्ञानोदयस्य सूचक आसीत् ।

इदं तीर्थङ्करभगवत आत्माऽभ्युदयस्य प्रथमं चिह्नमभूत् ।

भगवतो महावीरस्य योगसाधनम्

'आत्मशुद्धेरात्मनः साक्षात्कारस्य मुक्तेर्निर्वाणस्य वा प्राप्तये योगमार्गालम्बनं विना नास्त्यन्यः कश्चन उपायः ।' तथ्यमिदं सर्वथोपादेयमिति मत्वा भगवान् महावीरो योगमार्गमात्मसात् कृतवान् । योगदीक्षा चेयं भोगै-श्वर्ययोः परित्यागं विना नाभूत् सुलभेति सञ्चिन्त्य भगवता सर्वप्रकारिका भोगलिप्साः परित्यक्ताः समग्रस्यैश्वर्यस्य परित्यागं च विधायैकस्य निर्ग्रन्थस्य—श्रमणस्य वृत्त्या जीवनयापनं प्रारब्धम् ।

आत्मनः पावित्र्य-सम्पादनाय पापकारिणीषु प्रवृत्तिषु पूर्णरूपेण प्रतिबन्धं निधाय शुद्धं स्वच्छं चात्मानं सम्पादयितुं योगदीक्षाऽङ्गीकारावसरे श्रीमहावीरः सावद्ययोगस्य मनसा वाचा कर्मणा च परित्यागमकरोत् । अस्यां साधनायां यमानां पालमानवश्यकमासीदिति धिया —अहिंसा-सत्यास्तेय-ब्रह्मचर्या-परिग्रहप्रभृति पञ्च महाव्रतानां धारणमप्रमत्तभावेन चैतेषां पालनमसाधयत् ।

यमैः सह नियमा अपि पालनीया भवन्ति । अत एव भगवतो रात्रिभोजनत्याग-सदृक्षाः कतिपये नियमा अपि स्वीकृतास्तथाऽऽवश्यकतानुसारं तेषु परिवर्तनं परिवर्धनं चापि कृतम् ।

उदाहरणाय कस्यचन तपस्विन आश्रमेतैः केषाञ्चित् कटूनामनुभवानामनन्तरमेते पञ्च नियमा अङ्गीकृताः—

(१) यत्राप्रीतिर्भवति तस्मिन् स्थाने नोषितव्यम् ।
(२) यथासम्भवं ध्यान एव स्थातव्यम् ।
(३) यावच्छक्यं मौनं धारणीयम् ।
(४) भोजनं पात्रापेक्षया हस्तेनैव कर्तव्यम् ।
(५) गृहस्थो नानुनेतव्यः ।

स दृढप्रतिज्ञ आसीत्, अतो नियमानामेतेषां पालनं पूर्णरूपेणाकरोत् ।

'अभ्यासेन योगः सिद्धयति' तदर्थं स योगाभ्यास एव दत्तचित्तः सन् तदीयाः प्रक्रियाः क्रमशः साधयति स्म । तत्रापि तदीया धारणाऽऽसीद् यदासनसिद्धिं विना काययोगे स्थिरता न सुलभा । किञ्च शीतातप-वायु-कुज्झटिका-प्रभृतिभ्यो नैकविधजन्तुभ्यश्च समुत्पन्नानामुपद्रवाणां परिस्थितौ निशङ्कभावेन स्थातुमपि पूर्णोपादेयत्वमासनसिद्धे-रेवास्ति, कारणादस्मात् सर्वप्रथमं लक्ष्यमासनसिद्धिं प्रत्येव प्रत्तं तथा कानिचिदासनानि सिद्धान्यपि विहितानि । सम्बन्धेऽस्मिन् 'आचाराङ्गसूत्रे' वर्णितमस्ति यत्—'भगवान् स्थिरावस्थया संस्थाय नैकविधेष्वासनेषु स्थिरीभूय ध्यायति स्म तथा समाधिदक्ष आकाङ्क्षाविहीनश्च भूत्वोर्ध्वाधस्तिर्यग्लोकान् विचारयति स्मेति ।'

उत्तराध्ययनसूत्रस्य त्रिंशत्तमेऽध्ययने कथितमस्ति यत्—

ठाणा वीरासणाईया, जीवस्स उ सुहावहा।
उग्गा जहा धरिज्जंति, कायकिलेसं तमाहियं ॥२६॥

एतेन ज्ञायते यद् भगवान् वीरासन-पद्मासनोत्कटिकासन-गोदोहिकासन-प्रभृति-सरलान्यासनानि विशिष्य प्रियाणि मनुते स्म तथा तेषु दीर्घकालं यावत् स्थिरोऽभूदिति।

अनेकशः स कायोत्सर्गासनेऽपि संस्थितोऽभूत्। श्वासनिरोधरूपां प्राणायाम-क्रियां स नान्वमोदत। तदीया मान्यताऽऽसीद् यत् प्राणवायोर्निग्रहेण कदर्थना-प्राप्तं मनः शीघ्रं स्थिरं न भवतीति। परं स भाव-प्राणाया[1]-मायावश्यमेव महत्त्वमदात्, यस्मिन् वहिरात्मभावस्य रेचकोऽन्तरात्मभावस्य पूरकः स्थिरतारूपस्य कुम्भको भावानां संयमनक्रिया च मुख्या आसन्।

पञ्चानामपीन्द्रियाणां विषयेभ्यो मनस आकर्षणं तथा यत्र स्वकीयेच्छा भवेत् तत्र स्थापनं 'प्रत्याहारः' कथ्यते। साधारणाय जनायेयं क्रिया कठिना भवति यतो हि तस्य मनः श्लेष्मणि मक्षिकायाः संश्लेष इवेन्द्रियाणां विषयेषु लिप्तं तिष्ठति तस्माच्च केनापि प्रकारेण पृथग् न भवति। परं भगवतो मनः संवृत्तमभूत् पुद्गलानां च स्वल्पामपि सङ्गतिं स न वाञ्छन्ति स्म। अस्मादेव कारणादेषा क्रिया शीघ्रमेव सिद्धिं प्राप्ता। आचाराङ्गसूत्रे वर्णित-मस्ति—'ते भगवन्तः कषाय-रहिता लोभ-रहिताः शब्दरूपयोश्च मूर्च्छा-रहिताः साधकदशायां च पराक्रममाणाः स्वल्प-मात्रमपि न प्रमाद्यन्ति स्म। ते स्वानुभूति-पूर्वकं संसारस्य स्वरूपं विज्ञायात्मशुद्धेः कार्ये सावधानास्तिष्ठन्ति स्मेति।'

योगाभ्यासं परिसमाप्य भगवान् धारणासिद्धये प्रायतत तदर्थं च भद्रा-महाभद्रा-सर्वभद्राख्याश्च प्रतिमा-स्तैरङ्गीकृताः। तत्र हि भद्रप्रतिमाया विधिरेवं विद्यते—दिनद्वयस्य निराहारमुपवासमादृत्य प्रातः पूर्वाभिमुखीभूय कस्मिन्नप्येकस्मिन् पदार्थे दृष्टेः केन्द्रीकरणम्। तदनन्तरं निशायां सत्यां दक्षिणस्यां दिशि मुखं कृत्वा पूर्वोक्तयैव पद्धत्या कस्मिन्नप्यन्यस्मिन् पदार्थे दृष्टेः स्थिरीकरणम्। द्वितीये दिवसे प्रातःकाले सति पश्चिमदिशायां निशाप्रवृत्तौ चोत्तरस्यां दिशि मुखं विधाय पूर्वोक्तपद्धत्यैव कस्मिन्नपि वस्तुनि दृष्टेः केन्द्रीकरणमिति। अस्यायमाशयो यदस्मिन् विधौ नैरन्तर्येण द्वादशहोरावधि एकस्मिन् पदार्थे धारणा विधीयते तथाऽयं प्रयोगोऽष्टचत्वारिंशद्धोरा यावत् प्रचलति। भगवान् इमं प्रयोगं दश वर्षाणां योगाभ्यासानन्तरं श्रावस्तीनगर्या एकस्मिन् भागे स्थिते 'सानुयष्टिक'-नाम्नि ग्रामेऽकरोत् साफल्यं चालभत।

महाभद्र-प्रतिमायां चतुर्विंशतिहोरापर्यन्तमेकस्यां दिशि मुखं कृत्वा कस्मिन्नप्येकस्मिन् पदार्थे दृष्टिः स्थिरीक्रियते। षण्णवति होरापर्यन्तं निराहारोपवासैरेषा प्रतिमा पूर्यते। अस्यां क्रियायामपि भगवान् सफलो ऽभूत्।

सर्वतोभद्रप्रतिमाया विधिस्त्वत्यन्तं कठिनः। अस्यां चतस्रो दिशः, चतस्रो विदिशः; ऊर्ध्वा दिग् अधो दिक्चैवं दशसु दिक्ष्वेकैकमहोरात्रं यावद् दृष्टिस्थैर्यं क्रियते तथा दश दिनानि यावद् निराहारमुपवासाः क्रियन्ते। प्रति-मायामस्यामपि विजयं प्राप्नोद् भगवान्।

---

१. —श्रीहरिभद्रसूरेः 'योगदृष्टि-समुच्चये' चतुर्थ्यां दृष्टावस्य प्राणायामस्य वर्णनं विद्यते।

'अप्रमत्तभावेन स्थातव्य'मिति भगवतो मुख्यः सिद्धान्त आसीत्, कारणादस्मात् क्वापि प्रमादो न प्रविशेदेतर्थं सोऽतीव सावधानोऽभवत् । निद्रामपि योगसाधनायां बाधिकां मनुते स्म तस्माद् निद्रासेवनमपि स नाकरोत् । आचाराङ्गसूत्रे कथितमस्ति—'भगवन्तः कस्मिंश्चित् समय उत्कटासनादिषु स्थैर्यमभजन् परं निद्रेच्छया नैव । कदाचिद् निद्राऽऽगच्छन्ती प्रतीयते स्म तदा ते संसारवर्धकं प्रमादं मत्वा सततमुत्थाय तां पराऽकुर्वन् । आवश्यकतानुसारं शीतकाले रात्रौ बहिर्गत्वा मुहूर्तपर्यन्तं ध्यानेऽपि तिष्ठन्ति स्म । निद्राया अपसारणायायं तदीयो मुख्यः प्रयोग आसीत् ।'

मनसो निष्क्रियता व्यर्थचिन्तनस्य द्वारमस्ति । अतो भगवान् न कदाऽपि मनो निष्क्रियमकरोत् । कदाचित् तदनुप्रेक्षायां—तत्त्वचिन्तने योजयति स्म कदाचिच्च धर्मध्याने नियोजयति स्म । धारणा-सिद्धचा तस्य धर्मध्यानेऽतीवौज्ज्वल्यं स्थिरत्वं चागच्छताम् ततः परं तु स आत्मनः शुद्धोपयोगरूपं शुक्लध्यानं धारयितुं पूर्णरूपेण साफल्यमविन्दत् ।

शुक्लध्यानस्य द्वितीयस्यां भूमिकायां श्रुतज्ञानालम्बन-ग्रहणावसरे द्रव्यस्यैव पर्यायस्याभेदचिन्तनं भवति तथाऽस्यामेव भूमिकायां मनसः समस्तानां वृत्तीनां लये सति केवलज्ञानमुत्पद्यते । तेन कैवल्यज्ञानेनात्मा भूत-भविष्यद्-वर्तमानकालिकसमस्तवस्तूनां सर्वानपि पर्यायान् ज्ञातुं शक्नोति, द्रष्टुं शक्नोति सर्वज्ञकोटौ च विराजते ।

भगवान् महावीरो जृम्भिकग्रामाद् बहिर्ऋजुवालिकानद्या उत्तरे भागे स्थितस्य कस्यापि देवालयस्य निकटे श्यामाकनाम्नो गृहस्थस्य क्षेत्रे, शालवृक्षस्याधो भागे, उत्कटिकासनेन स्थित्वोपवासद्वयस्य तपश्चर्यापूर्वकं ध्यानावस्थित आसीत् तदा सोऽस्य शुक्लध्यानस्य द्वितीयां भूमिकां प्राप्तस्तदानीमेव केवलज्ञानं प्राप्तवान् । इदं शुभदिनं वैशाखशुक्लदशम्याः केवलज्ञानप्राप्तिसमयश्च दैवसिकश्चतुर्थः प्रहर आसीत् ।

चित्तस्य सर्वथा चाञ्चल्यनाशात् समाहितावस्था प्राप्यते किञ्च साऽपूर्वमानन्दमनुभावयति । एवं भगवान् महावीरोऽधुना सच्चिदानन्दावस्थां सम्प्राप्त आसीत् सा चावस्था जीवनस्यान्तिमसमयावधि स्थैर्यमभजत् ।

श्रीमहावीरभगवान् महान् राजयोगी आसीत्, तेन चोत्तरकाले स्वशिष्येभ्योऽपि राजयोगस्यैव दीक्षा प्रदत्ता ।

अत्रेदं स्मर्तव्यमस्ति यद् योगदीक्षा कस्मादपि गुरोर्गृह्यते तथा साधको गुरोर्मार्गदर्शन-पद्धतावेवाग्रे वर्धते परमेतेनैषा योगदीक्षा स्वयं गृहीता स्वानुभवाधारेण च पुरो वर्धित्वा केवलज्ञानस्य प्राप्तिं यावत् सम्प्राप्तः । जैनशास्त्रकारास्तं 'स्वयंसम्बुद्ध' इत्यकथयन्, तस्येदमेव कारणम् ।

सर्वविधान् भयान् सोऽजैषीत् । मृत्युभयमपि स जितवान् । सहैव स आन्तरिकान् काम-क्रोधादिशत्रूनपि विजित आसीदिति कारणात् तदीया गणना जिनेषु क्रियते स्म ।

उत्कृष्टया योगसाधनया, उग्रया तपश्चर्यया, विशुद्धेन जीवनेन यत्र च स गच्छति स्म तत्र मङ्गलानां प्रवर्तनं भवति स्मेति कारणात् स सर्वेषां पूजनीयोऽभूत्, तस्मादेव स 'अर्हत्' इति माननीयेन विशेषणेन सम्बोध्यते स्म ।

योगसाधनावसरे भगवान् नैकाः सिद्धीः प्राप्नोत् ।

कैवल्यप्राप्तिर्धर्मचक्र-प्रवर्तनं च

जगति यदा कश्चिदपि जनः स्वर्णवद् निघर्षणच्छेदनताप-ताडन-प्रभृतीनि नानाविधानि कष्टानि सहते तदा तस्य मूल्यं वर्धते । रत्नं टङ्कन-घर्षण-कर्षण-व्यवस्थापनादि-कर्मभिरेव सन्मूल्यवद् भवति तथैव मानवोऽपि परमात्म-

तत्त्वोपलब्धयेऽनादिकालाद व्याप्तं कर्ममलं दूरीकर्तुं नितरां परिश्राम्यति । 'आत्मनः परमात्मत्वं बहुनाऽऽयासेन साध्यत' इति ज्ञात्वैव श्रीमहावीरेणापि तप आचरितम् । वर्षाणां द्वादशीं यावत् कठोरं तपो योगकर्म च संसाध्य पूर्वसञ्चितः कर्मराशिः क्षीणतामानीतः । कर्मणामागमनं (आस्रवः) तथा बन्धः क्षीयेते स्म । अत आत्मनः प्रच्छन्नं तेजः क्रमेणोदेति स्म कर्मभारश्च क्रमेण ह्रसति स्म ।

विहारं कुर्वन् भगवान् महावीरो मगधप्रान्तस्य 'जृम्भिका'-ग्रामस्यान्तिके प्रवहन्त्या 'ऋजुकूला'-नद्यास्तटे शालिवृक्षस्याधोभागे क्षपकश्रेणीमारुह्य केवलज्ञानावर्तिकाः कर्मप्रकृतीः क्षेतुं ध्यानमग्नोऽभवत् । तत्र हि निर्मलेन चेतसा ऽऽज्ञाविचयादिचतुर्णां महतां धर्मध्यानानामभ्यास आचरितः । अनन्तानुबन्धिनः क्रोध-मान-माया-लोभ-मिथ्यात्वसम्यक्त्वसम्यग्मिथ्यात्वतिर्यञ्चायुर्देवायुर्नरकायुःप्रभृतीनां दश कर्मप्रकृतीनां चतुर्थगुणस्थानात् सप्तमगुणस्थानमध्ये क्षयः कृतः कर्मरूपशत्रूणां विनाशाय तीर्थङ्करश्रीमहावीरोऽभ्यस्तवान् क्षपकश्रेणीञ्चारुह्य स्त्यानगृद्धि-निद्राऽनिद्रा-प्रचलानरकगति-तिर्यञ्चगति-एकेन्द्रिय-द्वीन्द्रिय-त्रीन्द्रियरूपजाति-चतुष्टय-नरकगति-नरकगत्यानुपूर्वी- तिर्यग्गति-तिर्यग्गत्यानुपूर्वी-आतपो-द्योत-स्थावर-सूक्ष्म-साधारणादि-षोडशकर्मप्रकृतीर्नाशितवान् । भगवान् श्रीमहावीरः शुक्लध्यान-साधनयाऽनिवृत्तिकरणनामकगुणस्थानस्य प्रथमे भागेऽवस्थितः । भूयश्चास्यैव गुणस्थानस्य द्वितीये भागे चरित्र-घातकानष्ट कषायान् तृतीये भागे नपुंसकवेदं, चतुर्थे भागे स्त्रीवेदं, पञ्चमे भागे हास्यादिषट्कं, षष्ठे भागे पुरुषवेदं, सप्तमे भागे संज्वलनक्रोधं नवमे भागे संज्वलनीं मायां चानाशयत् । तदनन्तरं दशमस्य गुणस्थानस्य भूमावारुह्य सूक्ष्मसंज्वलनलोभस्य विनाशमकरोत् ।[1]

एवं समस्तं मोहनीयं कर्म विनाश्य द्वादशतमं गुणस्थानमारूढः । अस्य गुणस्थानस्य द्वयोः समययोरुपान्त्यसमये निद्रा-प्रचलानाम्न्योर्द्वयोः कर्मप्रकृत्योस्तथाऽन्ते समये पञ्च ज्ञानवारणानां चतुर्णां दर्शनावरणानां तथा पञ्चान्तरायानां चतुर्दशकर्मप्रकृतीनां विनाशः सम्पादितः । इत्थं द्वादश गुणस्थानावधि त्रिषष्टिकर्मप्रकृतीर्विनाश्य त्रयोदशतमं गुणस्थानमारूढवान् ।

एतेन गुणस्थानारोहणेन श्रीमतो महावीरस्य शुभ्रता-शुचिता सर्वत्र प्रकटिता । घाटि कर्मणां सप्तचत्वारिंशत् ४७ तथाऽघातिकर्मणां षोडश १६ संख्या मिलित्वा त्रिषष्टि प्रकृतीनां विगलनेन कैवल्यसूर्योदयः सञ्जातः । महावीरस्य सौम्यमुद्रायां सर्वज्ञता तरङ्गायिता । कर्मशत्रव आत्मसमर्पणमकुर्वन् । यथा सूर्योदयानन्तरं सर्वत्र प्रकाशो व्याप्नोति तथैव कैवल्योदये सति दिव्यं तेजो व्याप्नोत् ।

भगवतो महावीरस्य कैवल्योपलब्धिमिमां श्रीयतिवृषभाचार्य एवमवर्णयत्—

वइसाहसुद्धदसमी मघारिक्खम्मि वीरणाहस्स ।
रिजुकूलानदीतीरे अवरण्हे केवलं णाणं ॥

(ति० ४।१७०१)

एतदनुसारं वैशाखशुक्लदशम्याः शुभदिने मघानक्षत्रे ऋजुकूलानदीतीरेऽपराह्णे कैवल्यप्राप्तिरियमभूत् ।

भगवतः केवलज्ञान-कल्याणकस्योत्सवं सम्पादयितुं चतुर्निकायस्य देवा मनुष्याश्चैकीभूताः । सर्वैरपि भक्तिभावपूर्वकं तदीयस्य केवलज्ञानस्यार्चना विहिता । सार्धपञ्चमासोत्तरद्वादशवर्षाणां दुर्द्धर्षतपश्चरणस्य फलमर्हत्त्वरूपेण सुलभमभूत् । तीर्थङ्करप्रकृतेरुदयाद् दिव्यदेशनायाः सामर्थ्यमपि प्राप्तम् ।

---

१. अत्र वर्णितानां गुणस्थानानां विस्तृतं वर्णनं जैनग्रन्थेषु द्रष्टव्यम् ।

साधना-कालिक्यो विहारभूमयः

भगवान् श्रीमहावीरश्चातुर्मासस्य दिवसेष्वेकस्मिन्नेव स्थानेऽवसत्, शिष्टेस्वष्टसु मासेषु पृथक्-पृथक् स्थलेषु विहारानकरोत् । साधनाकाले च भगवान् विदेह-बङ्ग-मगध-काशी-कौशलादि-जनपदेषु विहृतवान्, इति तदीय-साधना-कालस्य चातुर्मास-नामावल्या ज्ञायते । यथा हि —

प्रथमश्चातुर्मासः—मोराक सन्निवेशस्य निकटे तापसानामाश्रमेऽस्थिकग्रामे च ।

द्वितीयश्चातुर्मासः—राजगृहनगराद् बहिर्नालन्दाऽऽवासान्तर्गतमेकस्य तन्तुवायस्य शालायाम् ।

तृतीयश्चातुर्मासः—अङ्गदेशस्य राजधान्यां चम्पानगर्याम् ।

चतुर्थश्चातुर्मासः—पृष्ठचम्पानगर्याम् ।

पञ्चमश्चातुर्मासः—भद्दिलपुरे ।

षष्ठश्चातुर्मासः—भद्रिकापुर्याम् ।

सप्तमश्चातुर्मासः—आलभिकानगर्याम् ।

अष्टमश्चातुर्मासः—राजगृहे ।

नवमश्चातुर्मासः—राढप्रदेशस्य वन्यभागे ।

दशमश्चातुर्मासः—श्रावस्तीनगर्याम् ।

एकादशश्चातुर्मासः—वैशाल्याम् ।

द्वादशश्चातुर्मासः—चम्पानगर्याम् ।

भगवान् भारतस्य भिन्नभिन्नेषु भागेषु विहृत्य जनान् त्यागनिष्ठायै संयमाय चोपदिशति स्म । आगम[1]-निर्युक्ति-चूर्णिभाष्य-प्राचीन-चरित्रग्रन्थादिषु तदीया विहार-विषयकाः सङ्केता उपलभ्यन्ते । सार्धपञ्च मासोत्तर-द्वादशवर्षाणां तपःसाधनेयं प्रचलिता । साधना-काले विविधघटना घटिताः । एतासु घटनासु तीर्थङ्कर-महावीरस्य त्याग-सहिष्णुता-साहस-धैर्य-दया-क्षमा-प्रभृति-विशिष्टगुणानां चित्राण्यपि स्फुटीभवन्ति । यथा हि —

प्रथमवर्षस्य साधना—कर्मार-ग्रामे कायोत्सर्गावसरे गोपालस्य, कुलपतेराश्रमे गोभिः कुटीरस्यैव तृणभक्षणस्य अस्थिग्रामे शूलपाणि-यक्षस्य च घटनास्तदीयानां सहिष्णुता-धैर्य-साहसानां कथा व्यञ्जयन्ति । वर्षावासोऽयमस्थिक-ग्रामेऽभूत् ।

द्वितीयवर्षस्य साधना—वाचलां प्रति प्रस्थानावसरे चण्डकौशिक-दृष्टिविषस्य मौनमुद्बोधनं तत्फलरूपेण सल्लेखना-व्रतधारणपूर्वकं तस्य सद्गतिप्रापणं, श्वेताम्बीनगर्याः श्रीप्रदेशिराज्ञो धर्मारावने प्रवर्तनं, सुरभिपुरं प्रति गमनकाले गङ्गायामागतस्य ज्वारस्य शमनं, नालन्दायां वर्षावासकाले मासिकोपवासस्तत्पूर्तिसमये श्रेष्ठिनो गृहे निर-न्तरायाहारप्रभावाद् नालन्दायां गन्धोदकवृष्टिः पुष्पवृष्टिः सुरभितवायु-सञ्चारो देवानां दुन्दुभिनादस्तथा 'दानमि-दमाश्चर्यकारी'ति नभोवाणीश्रवणरूपपञ्चाश्चर्यस्फुरणं, गोशालकस्य शिष्यत्वस्वीकृतिश्चेत्यादय आत्मशोधनसाहस-तितिक्षादिगुणान् स्फोरयन्ति ।

तृतीयवर्षस्य साधना—आत्मविकासाय प्रयस्यन् भगवान् महावीरोऽस्मिन् वर्षे द्वितीयं वर्षावास-कालं परि-समाप्य कोल्लाग-सन्निवेशं विहृतः । ततश्च ब्राह्मणग्रामं तदनु च विहृत्य चम्पानगरीं प्राप्तः । तृतीयो वर्षावासोऽत्रैव यापितः । अस्मिन् वर्षावासे भगवता कर्मनिर्जराया अष्टाविंशतिमूलगुणानां पालन-पूर्वकं द्वयोर्द्वयोर्मासयोरुपवासाः

१. दिगम्बरसाहित्ये वर्षावासानामेतेषां वर्णनं न लभ्यते ।

स्वीकृताः । अनया दान-शील-तपो-भावरूपस्य चतुर्विधिधर्मस्य साधनया मानवता प्रतिष्ठापिता । जीवनं पूर्णतया सरलं सरसं च सम्पन्नम् । अध्यात्मशक्तीनां सर्वोत्कृष्ट-विकासाय स्वयं पुरुषार्थं विधायात्मचिन्तन-प्रक्रियामहरहोऽवर्धयत् ।

चतुर्थवर्षस्य साधना—अनवरतसाधनाबलेन भगवान् क्षमायाः पूर्णाभ्यासं साधितवान् । कर्मपाशाः शिथिलतामासादितवन्तः । तपःप्रभावेन कर्मशृङ्खला जर्जरिता । दीक्षायाश्चतुर्थे वर्षे स्वीयं तपोऽत्यधिकं तेजस्कृतम् । एकाग्रता-शीतातप-सहिष्णुतापूर्वकं ग्रामानुग्रामेषु कालायस-पत्रकालय-कुमाराक-सन्निवेशेषु च विहृत्य पृष्ठचम्पा-नगर्यां वर्षावासः सम्पादितस्तत्र च कठोरेण तपश्चरणेनात्मानुसन्धानं साधितम् ।

पञ्चमवर्षस्य साधना—चतुर्थं चातुर्मासं व्यत्याप्य भगवता निराकुलेन भावेन क्षुत्तृषोः परीषह-पूर्वकं कयंगलां प्रति विहृतम् । तत्र बहिरुद्याने देवालये रात्रिवासः, ततः श्रावस्ती-हल्यदुय-नंगला-चोराकसन्निवेश-कलम्बुकासन्निवेशेषु विहारं कृत्वाऽनार्यदेश-विहाराय च चिन्तितम् । कर्मक्षयाय साधनायास्तीव्रताया उपसर्ग-परीषह-सहनाय च लाढ़देशं प्रति प्रस्थानं कृतम् । अनार्यैरत्र विहितास्तर्जना-ताडनानिन्दाद्युपसर्गाः कर्मनिर्जरार्थमावश्यका आसन् । विहारमार्गे नानाविधानि काठिन्यान्यनुभूतानि । शुद्धाहार-प्राप्त्यभावात् प्रायः सर्वदोपवासस्तथा मार्गेऽनार्यैरुद्भाविता अनेक उपसर्गाः प्राप्ता येषां सहनेनापि साधनायां वैशिष्ट्यमायातम् । तत आर्यप्रदेशमागत्य मलयेषु विहृत्य भगवता पञ्चमो वर्षावासो मलयस्य राजधान्यां भद्दिलपुरे विहितः । अस्मिन् चातुर्मासेऽनशनादिभिः सह विविधासनपूर्वकं ध्यानात्मकं तप आचरितम् । एवमियं पञ्चमवर्षीया साधनाऽग्निकृतोपसर्गजय-सन्देहजन्योपसर्गजयादिभिरतीव-महत्त्वपूर्णाऽभूत् ।

षष्ठ-वर्षस्य साधना—चातुर्मासस्य चतुर्ष्वपि मासेषूपवासग्रहणानन्तरं भद्दिलपुराद् बहिः पारणाऽभवत् । ततः कयलि (कदली)-समागम-जम्बूखण्ड-तम्वायसन्निवेश-कूपियसन्निवेशेषु विहारं कृत्वा वैशालीं प्रति प्रस्थातुं भगवान् सज्ज आसीत्तदा गोशालकः पूर्वविहारेषु सम्प्राप्तान् क्लेशान् स्मृत्वा भगवन्तं प्राह—'भगवन् ! भवन्तो न तु मम रक्षां कुर्वन्ति न च भवता सह निवासात् किमपि सुखं मिलति, प्रत्युत कष्टान्येव भवन्ति सहैव भोजनस्यापि चिन्ता प्रत्यहं पीडयति । अतोऽहमग्रे श्रीमता सह विहर्तुमसमर्थोऽस्मि ।' इति कथयित्वा स राजगृहं प्रति प्रस्थितः । भगवानपि शान्तेन मौनभावेन च गोशालकस्य कथनमश्रृणोत् । ततश्च वैशालीं प्रविश्य भगवान् कर्म्मारशालायां ध्याने स्थितवान् । तत्र लोहकार उपसर्गाय सन्नद्धः स च केनाप्यन्येन भद्र-पुरुषेण निवारितः । ततः परं ग्रामाक-सन्निवेशे विभेलकयक्षोद्बोधः शालिशीर्षे कटपूतना-कृतानामुपसर्गाणां सहनं, भद्रिकापुर्यां च वर्षावासः श्रीमतो महावीरस्याखण्डमात्मचिन्तनं परीषहनं सर्वत्र प्रेम शान्ति-सौख्यानां प्रसारश्च वीतरागता-प्रभावातिशयान् प्रकटयन्ति ।

सप्तमवर्षस्य साधना—मासषट्कं यावद् गोशालकोऽपि पृथग् विहारं कृत्वा भूयोऽपि शालिशीर्षे भगवता मिलितः । वर्षाकालं व्यत्याप्य भगवान् नगर्या बहिर्भागे चातुर्मासोपवासस्य पारणां कृत्वा मगधेषु विहर्तुं प्रस्थितवान् । आत्मसाधकस्य योगीश्वरतीर्थङ्करमहावीरस्यात्मदर्शन-सम्बन्धिनी साधनोत्तरोत्तरं वर्धमानाऽऽसीत् । आत्मदर्शकस्य विषये च भगवता महावीरेणेदं सर्वथाऽनुभूतं यद्—'यावज्जनः सकलमपि विश्वमात्मनः समानेन भावेन न पश्यति न च तत्र विश्वसिति तावदात्मदर्शनं न सम्भवम् । आत्मदर्शनं मानवस्य प्रसुप्तां शक्तिं प्रबोधयति, आत्मानं पूर्णतया विकासयति तथाऽऽत्मनः स्वरूपं पूर्णरूपेणोद्घाटयति । एवं वीतरागताया निष्कामतायाश्च समुपलब्धये चिन्तयन् साधना-समृद्ध्यै सुतरां प्रयस्यन् शीतकाले ग्रीष्मकाले च मगधेषु विहृत्य वर्षादिवसेषु चातुर्मासं व्यत्यापयितुम् 'आलभिका'नगर्यामवात्सीत् । चातुर्मासिकानि तपांसि विविधा योगक्रियाश्चात्र साधिताः ।

अष्टमवर्षस्य साधना—श्रमणजीवनस्य प्रधानमुद्देश्यं प्राणिनः श्रेयोमार्गाय प्रवर्तनमस्ति । वर्षावासस्य समाप्त्यनन्तरं पारणायै कुण्डाक-सन्निवेशं प्रति प्रस्थानं विहितम् । सन्निवेशेऽस्मिन् वासुदेव-मन्दिरे ततश्च मद्दना-सन्निवेशे बलदेवमन्दिरे च भगवता कियच्चिद् दिनावधि ध्यानमादृतम् । ततः परं लोहार्गलराजधान्यां गमनं कृतम् । अत्र जितशत्रो राजपुरुषैः सन्देहवशाद् भगवान् गोशालकश्च निगृहीतौ । राजसभायां बन्दिरूपेणानीताविमावालो-क्यास्थिकग्रामस्य नैमित्तिकेनोत्पलेन परिचायितौ तदा बन्धनमुक्तिमासाद्य जितशत्रुणा भगवान् परिपूजितः क्षमा-पितश्च । लोहार्गलात् पुरिमतालपुरे विहृतम् । तत्रोद्याने निवसता भगवता बहव उपसर्गाः सोढाः । वग्गुरश्रावकेण भगवानभिवन्दितः सत्कृतश्च । तत उन्नाग-गोभूमि-प्रभृतिषु विहृत्य राजगृहीं प्राप्तवान् । अष्टमो वर्षावासोऽत्रैवाति-वाहितः । अस्मिश्च तुर्मासे चित्तशुद्धेर्विशिष्याभ्यासः कृतः । भ्रमणशीलं मनो विषयेभ्यः पराकृत्य स्वस्वरूप एव केन्द्री-कृतम् । मनो यथा यथा शान्तं निष्कम्पञ्चाभवत् तथा-तथा स्थैर्यमवर्धत । एवं वर्षावास-समाप्तिकाल एव सावधि-योगस्य साधनापि समाप्तिमगमत् ।

नवमवर्षस्य साधना—राजगृहाद् विहारानन्तरं भगवान् लाढदेशान् प्रति प्रस्थितः । ततश्च वज्रभूमि-शुद्धभूमि-सुम्हभूमि-प्रभृत्यादिवासि-प्रदेशेषु गतः । तत्र प्रायो ध्यानयोग्यानि स्थलान्येव नासन्, न च चैत्यान्यपि तत्रावर्तन्त तस्मात् प्राय उद्यानेष्वेव नगराद् बहिरुपस्थाय सामायिकं समपादयत् । सामायिक-क्रिया भगवतो महावी-रस्यात्मोपलब्धेः साधनमभूत् । दुष्टा हसन्ति स्म धूलि-प्रस्तरखण्डादीनि प्रक्षिपन्ति स्म दुर्वदन्ति स्म तथा कारणं विनैव विघ्नोत्पादनं च कुर्वन्ति स्म । चातुर्मासागतौ वन्यभाग एवैकस्मिन् वृक्षस्याधस्तादेव चातुर्मासग्रहणं कृतम् । उपवासः स्वीकृतः । सामायिकस्य सिद्ध्यै कायोत्सर्गे ध्याने च भगवान् नितरां प्रावर्तत । शारीरिक्याश्चञ्चलतायाः शारीरिक-ममत्वस्य च सर्वथा परित्यागो विहितः । इहलोक-परलोक-अत्राण-आकस्मिक-मृत्यु-प्रभृतिसप्तभयेभ्यो विमुक्त आत्मनः सान्निध्ये विचरणशीलो जितेन्द्रियः सामायिक-संयमी भगवान् महावीरः षण्मासावधि अनार्यभूमौ भ्रमणं विधाय वर्षाकालानन्तरमार्यभूमावुपागतः ।

दशमवर्षस्य साधना—भगवान् महावीरो गोशालकश्चार्यभूमौ सिद्धार्थपुरं प्रति गच्छन्तौ कूर्मग्रामं प्रति प्रस्थितौ । कूर्मग्रामाद् बहिर्वैश्यायनं निन्दतो गोशालकस्य विनाशाय वैश्यायनेन तेजोलेश्या क्षिप्ता, सा च भगवतः प्रभावातिशयाद् व्यर्थतां गता । गोशालक इतः श्रावस्तीं गतस्तत्र च मासषट्कं यावत् तपस्तप्त्वा निमित्त-शास्त्रं चाधीत्य स्वं प्रभावातिशयं च वर्धितवान् ।

सिद्धार्थपुराद् भगवान् वैशालीं प्रस्थितः । एकदा स नगराद् बहिरुद्याने कायोत्सर्गध्याने स्थितः । तत्र बालका भगवन्तमजानन्तः कोऽप्ययं पिशाचः प्रेतो वा भविष्यतीति धियाऽनेकधा तमपीडयन् । तत्र वनराजेन शङ्खेन बालका बोधिताः स्वयं च भगवन्तं प्रणम्य क्षमामयाचत । वैशालीतो वाणिज्यग्रामं सम्प्राप्य तत्र ग्रामाद्-बहिः कायोत्सर्ग-मुद्रापूर्वकं ध्यानं स्वीकृतम् । साधनाप्रभावेन नैकाः सिद्धयो भगवन्तं वृतवत्यः परं तासामुपयोगः कदाप्युपसर्गाणां निरोधार्थं न विहितः । अत्रैव श्रमणोपासक आनन्दो भगवन्तमवन्दत । इतो विहृत्य श्रावस्तीं प्राप्यात्रैव वर्षावासोऽ तिवाहितः । वर्षोऽयं संयम-सिद्धेर्वर्ष आसीत् ।

एकादशवर्षस्य साधना—श्रावस्त्यां वर्षावासं विधाय भगवान् तत्कालपूर्तौ सानुलट्ठीय-सन्निवेशं प्रति प्रस्थानं कृतवान् । अत्र भद्र-महाभद्र-सर्वतोभद्र-तपस्याः[1] सम्पाद्य षोडशोपवासाः कृताः । उपवासान्त आनन्दस्य गृहे पारणां

१. एतासां तपस्यानां किञ्चिद्वर्णनं चरितामृतस्यास्य २४ तमे पृष्ठे विद्यते । अन्यत्र ग्रन्थेषु सर्वतोभद्रप्रतिमा-विषये विशेष्य स्पष्टीकृतमस्ति । यथा—**सर्वतोभद्र-प्रतिमा**—द्वाभ्यां विधिभ्यां सम्पाद्यते । तत्र प्रथमविधौ

विधाय दृढभूमिं प्रति विहृतः। मार्गे पेढालोद्यानस्य पोलासचैत्य उपोष्य ध्यानमकार्षीत्। अत्रैव सङ्गमदेवः परीक्षणाय ध्यानाद्विचालनाय च विंशतिमितानुपसर्गानकरोत् परं भगवान् मनागपि न व्यचलत्। एवमेवाग्रे तोसलि-

---

क्रमशो दश दिशः प्रत्यभिमुखीभूयैकैकस्याहोरात्रस्य कायोत्सर्गः क्रियते। द्वितीय-विधौ प्रतिमाया अस्या द्वौ भेदौ स्तः। १—लघुसर्वतोभद्रप्रतिमा २—महासर्वतोभद्रप्रतिमा च।

१—लघुसर्वतोभद्रप्रतिमा—अस्यास्तपस्याया आरम्भ उपवासाद् भवति तथाऽनुक्रमेण वर्द्धनाद् द्वादशभक्तं यावद् गम्यते। द्वितीयस्मिन् क्रमेऽधो निर्दिष्टयन्त्रस्य मध्याङ्कमादिं मत्वा चल्यते तथा पञ्चसु खण्डेषु क्रमोऽयं पूर्यते। एकस्याः परिपाट्याः कालमानं दशदिनाधिकं मासत्रयं यावद् विद्यते। चतस्रः परिपाट्यो भवन्ति। क्रमज्ञानाय यन्त्रमिदं ज्ञातव्यमस्ति—

१	२	३	४	५
३	४	५	१	२
५	१	२	३	४
२	३	४	५	१
४	५	१	२	३

अस्मिन् यन्त्रे लिखितानामङ्कानां सर्वेष्वपि भागेषु योगः समान आयाति। अत एवायं 'सर्वतोभद्रयन्त्र' इति कथ्यते।

२—महासर्वतोभद्र - प्रतिमा—अस्यास्तपस्याया आरम्भोऽप्युपवासादेव भवति। अनुक्रमेण वर्द्धनात् षोडशभक्तं यावद् गम्यते। वर्द्धनक्रमो लघुसर्वतोभद्रतपस्याऽनुरूप एवास्ति। अन्तरं केवलमिदं वर्तते यत्त्रोत्कृष्टं तपः षञ्चोला विद्यतेऽत्र च सप्तोपवासाः क्रियन्ते। एकस्याः परिपाट्याः कालमानं चत्वारिंशद्दिनोत्तरमेकवर्षस्य विद्यते। अस्या अपि चतस्रः परिपाट्यः सन्ति। चतसृणामपि सम्पूर्णं कालमानं दशदिवसयुतपञ्चमासोत्तरं चतुर्णां वर्षाणामस्ति। अस्य क्रमज्ञानाय यन्त्रमिदं ज्ञापकमस्ति—

१	२	३	४	५	६	७
४	५	६	७	१	२	३
७	१	२	३	४	५	६
३	४	५	६	७	१	२
६	७	१	२	३	४	५
२	३	४	५	६	७	१
५	६	७	१	२	३	४

-मोसलि-सिद्धार्थपुर-वृज-ग्रामादिष्वपि स सङ्गमदेवो नैकविधानुपसर्गानकरोत् परं भगवता ते सर्वेऽपि सोढाः प्रान्ते सः पराजित्य भगवन्तं प्रणम्य क्षमायाच्ञामकार्षीत् । ततो विहृत्य पुनः श्रावस्त्यामुपागतस्ततोऽग्रे कोशाम्बी-वाराणसी-राजगृह-मिथिलादिषु विहारपूर्वकं वैशालीमुपागच्छत् । अत्र काममहावनोद्याने चातुर्मासिकं तप आचरितम् । अस्यामेकादशवर्षस्य साधनायां कर्मणामसङ्ख्यातगुणिता निर्जराऽभवत् ।

द्वादश-वर्षस्य साधना—संवर-कर्मनिर्जराभ्यां भगवान् विचित्रानभिग्रहान् धारयित्वा चर्यायै निर्गच्छति स्म तत्पूर्त्यभावे च भूयः ससन्तोषं परावृत्य साधनामाचरत् । वर्षाकालमतिवाह्य भगवान् वैशालीतः सुसुमारपुरं प्रति विहृत्य भोगपुर-नन्दिग्राममेंढियग्रामेषु परिभ्रम्य कोशाम्बीं प्राप्तवान् । अत्र पौषकृष्णप्रतिपदायां चर्याविषयको विचित्र एवाभिग्रहः स्वीकृतः यस्य पूर्त्या 'चन्दना' वन्दनीयाऽभवत् । अन्ते तप इदं पूर्तिमगात् । कैवल्य-प्राप्तिश्च वैशाख-शुक्लदशम्यामभूत् ।

लोकमाङ्गल्यसाधनम्

तीर्थङ्करेण भगवता महावीरेणार्हत्त्वं प्राप्तम् । तदीय-ज्ञानस्यापूर्वेण प्रकाशेन निखिलमपि जगद् दीप्तिमदभूत् । दिशः शान्ता विशुद्धाश्च सम्पन्नाः । वायुः शुद्धः सुखदः प्रवातः । सौधर्मेन्द्रोऽन्ये चतुर्निकायदेवाश्च महावीरस्य केवलज्ञान-कल्याणक-पूजनमकार्षुः । इन्द्रः कोषाध्यक्षं कुबेरमाकार्य समवशरणस्य रचनाया आदिशत् । इन्द्रेणाभिलषितं यद् विगतत्रयोविंशतितीर्थङ्कराणामिव तीर्थङ्करश्रीमहावीरभगवतोऽपि संसारस्य शान्त्यै देशना भवेत् । तदनुसारम् ऋजुकूलायास्तटे समवशरणस्य रचना जाता । चतुर्षु द्वारेषु धर्मध्वजा दोधूयन्ते स्म । समवशरणे प्राकार-चैत्यवृक्ष-ध्वजा-वनदेवी-तोरण-स्तूप-रत्नमय-जिनप्रतिमाभिश्चापूर्वा शोभा विराजमानाऽऽसीत् । मध्यभागे गन्धकुटी व्यराजद् यत्र स्वर्णसिंहासनं तदुपरि स्वर्णकमलं चासीत् । द्वादश-कोष्ठकेषु विभक्तमिदं समवशरणं (सभामण्डपं) साधु-आर्यिका-देव-देवाङ्गना-पशु-पक्षि-प्रभृतीनामुपवेशनाय व्यवस्थितमभूत् । मुनयो देवा देवपुरुषाः पशुपक्षिणश्च देशनाश्रवणाय समुपस्थिताः । भगवान् महावीरोऽपि सौम्यया मुखमुद्रया निखिलं जगतीतलं पावयन् स्थित आसीत् ।

भगवान् तपस्यादिवसेषु मौन एव तपांस्याचरद् तस्माद् देशनाश्रवणायोद्ग्रीवा जीवा लालायिता आसन् परं देशनाप्रारम्भो न जातः । पञ्चषष्टि-दिनानि व्यतीतानि । भगवता विहृत्य राजगृहनिकटे विपुलाचल आगमनं कृतम् । अत्रापि समवशरणस्य रचना कुबेरेण कृता । परं प्रवचनावसरे वाण्यास्तादृश एव गतिरोध आसीदत इन्द्रेणा-वधिज्ञानद्वारा तत्कारणं ज्ञातं यद् 'यथार्थज्ञानिनो गणधरस्याभावाद् ज्ञान-गङ्गाऽवरुद्धा विद्यते । यावद् वास्तविकस्य जिज्ञासोस्तथा श्रुतधारकस्योपस्थितिर्न भविष्यति तावद् देशना न भविष्यतीति ।'

इन्द्रो गणधरं प्राप्तुमिन्द्रभूतेर्गौतमस्य सकाशं जिज्ञासुरूपेण मध्यमापावायां महायज्ञस्थलं बटुकरूपेण प्रविष्टः स्वकीयबुद्धिकौशलेन च तं समवशरणं यावदानीतवान् । शास्त्रार्थचिकीर्षयाऽत्र प्राप्त इन्द्रभूतिर्मानस्तम्भदर्शनेन निरभिमानः सञ्जातस्तथा भगवतो दर्शनेन विगलितमिथ्यात्वः सन् आषाढपूर्णिमायां दीक्षां गृहीतवान् । श्रावणकृष्ण-प्रतिपदायां ब्राह्मे मुहूर्ते भगवतो दिव्यध्वनिः प्रारभत धर्मतीर्थप्रवर्तनदिनमपि तदेवाभवत् । तदेवोक्तं **'तिलोय-पण्णत्ती'**ग्रन्थे—

वासस्स-पढममासे सावणमासम्मि बहुलपडिवाये ।
अभिजी-णक्खत्तम्मि य उप्पत्ती धम्मतित्थस्स ॥ १।६९॥ इति

गणधरेष्विन्द्रभूतेः प्रधानं स्थानमासीत्। अन्ये दश गणधरा अपि क्रमेण—'अग्निभूति-वायुभूति-शुचिदत्त--सुधर्मस्वामि-मण्डिक-मौर्यपुत्राकम्पिकाचल-मेतार्य-प्रभास-नामानस्तत्र समवशरणे समुपस्थिता आसन्। एते सर्वेऽपि स्वशिष्य-प्रशिष्यैः सह दीक्षिता अभूवन्।

ततः परं लोकोद्धारमीहमानेन भगवता धर्मदेशनाः समारब्धाः। साधनाकाले भगवतो न कोऽपि शिष्य आसीन्न चानुयायी। एकाकितयैव सकला साधना प्राचलत्। धर्मतीर्थस्थापनानन्तरं शिष्या अनुयायिनश्च भूयांसो जाताः। समाजं नीतिपरायण सदाचारशीलं धर्मानुरागिणं तत्त्वनिष्ठं च सम्पादयितुं धर्मप्रवचनान्यारब्धानि। तेष्व-साधारणं साफल्यं प्राप्तं तत्र च त्रीणि कारणानि प्रधानान्यभूवन्—

१—लोकभाषायाः प्रयोगः २—देश-वर्णजाति-लिङ्गभेदैर्विना सर्वेभ्यः समानानामुपदेशानां दानम्। ३—जीवनस्य परमसत्यतत्त्वानामुपस्थापनम्।

धर्मामृतस्य वर्षणं भगवता न केवलं राजगृहस्य परिसर एव कृतमपितु दूर-सुदूरवर्ति-प्रदेशेष्वपि विहार-पूर्वकं विहितम्। हरिवंशपुराणे वर्णितमस्ति यद्—

काशि-कोशल-कौशल्य-कुसन्ध्यास्वष्टनामकान् ।
साल्व-त्रिगर्त-पञ्चाल-भद्रकार-पटच्चरान् ॥
मौक-मत्स्य-कनीयांश्च सूरसेन-वृकार्थपान् ।
मध्यदेशानिमान् मान्यान् कलिंग-कुरु-जांगलान् ॥
कैकेयात्रेय-काम्बोज-वाह्लीक-यवन-श्रुतीन् ।
सिन्धु-गान्धार-सौवीर-सूर-भीरुक-देश्रुकान् ॥
वाडवानभरद्वाज-क्वाथतोयान् समुद्रजान् ।
उत्तरांस्तार्णकार्णांश्च देशान् प्रच्छालनामकान् ॥
धर्मेणायोजयद् वीरो विहरन् विभवान्वितः ।
यथैव भगवान् पूर्वं वृषभो भव्यवत्सलः ॥३।३-७॥

अनेन विहारेण नैकशो जना भगवतो वचनामृतं भूयो भूयः पीत्वा समग्रानपि जात्यादि-भेदभावान् विस्मृत्य दीक्षिता अभवन् बहुशश्च स्वीयानि जीवनानि संस्कृत्यहिंसा—संयमपूर्णानि जीवनानि स्व्यकुर्वन्। भगवतो धर्म-सभायामुपस्थाय देशनाश्रवणानन्तरं नैकेषां जीवने मङ्गल-प्रभातोदयः समभवत्। सम्यक्श्रद्धा-सम्यग्ज्ञान-सम्यक्चा-रित्रगुणानां दिव्यः प्रकाशः सर्वानपि तमोगह्वरादुद्धर्तुं क्षमोऽभवत्। भगवतो देशनया लोकानां हृदयेष्वपूर्वा दिव्यतोद्गता। जनानां ज्ञानचक्षूंष्युन्मीलितानि। अज्ञानस्य सघनोऽन्धकारो विलयं गतः। रूढिग्रस्तः समाजो मुक्तिं प्राप्तः जनतायाः सन्देहा भ्रमाश्च समाप्ताः।

अहिंसा-सत्यास्तेय-ब्रह्मचर्यापरिग्रह-समत्व-संयममैत्री-मिथोविश्वासादयश्च प्राणिमात्रमनेकान्तसिद्धान्तं प्रेरयन्ति स्म। भगवतो महावीरस्य लोककल्याणकारिषु समवशरणेषूपदेशामृतपानात् कोटिशो जनाः श्रद्धावन्तः सन्तस्तच्चरणयोः श्रद्धासुमनांसि समर्प्य कृतकृत्यतामविन्दन्त। युगेभ्य आगता शारीरिकी मानसिकी वा दासता क्षीणतां गता। धर्मस्य विकृतयः पराकृताः। आत्मवत् सर्वभूतेष्वित्येष उद्घोषः सार्थकतां श्रितः।

संघ-स्थापना

तीर्थङ्करस्य भगवतो महावीरस्य देशनाभिः प्रभाविता अनेके राजानो महाराजा राजकुमाराः सार्थवाहाः श्रेष्ठिनो राजमहिष्यः श्रेष्ठि-पत्न्यः सामान्या नरा नार्यश्च शिष्यत्वं प्राप्ताः । इन्द्रभूतिप्रभृतीनां दीक्षा-ग्रहणानन्तरमेव सङ्घ-व्यवस्थापन-सम्बन्धिनी समस्याऽऽवश्यकतां गताऽऽसीत् परमाध्यात्मिकीं परिपूर्णतां प्राप्तेन भगवता तत्र ध्यानमपि न दत्तम् । भगवतोऽस्यां लोकप्रवृत्तौ हर्षो विषादो वा नाभूद् न च तत्र तदीय आग्रहश्चासीत् । सत्यं पुरः स्थापनीयमिति कृत्वा देशना-दानं समवशरणे भगवान् विदधाति स्म तथापि शिष्यसङ्ख्या वृद्धयेदमावश्यकमभूद् यत् सङ्घस्य व्यवस्थापना क्रियेत ।

श्रीमहावीरभगवतो भक्ता द्विविधा आसन् । प्रथमे भक्ता गृहत्यागिनो द्वितीयाश्च गृहवासिनः । गृहत्यागिषु मुनय आर्यिकास्तथा गृहवासिषु श्रावकाः श्राविकाश्चावर्तन्त । एतेषां सर्वेषां भक्तानां चतुर्विध-सङ्घः स्थापितः । एवं सङ्घेऽस्मिन् भगवता जातिव्यवस्था वर्णव्यवस्था वा न स्वीकृताऽपितु केवलमाचारमधिकृत्य सर्वाऽपि व्यवस्था सम्पादिता । जैनमुनीनामाचारनियमाः कठोरा आसँस्तेषां नियमानामाचरणपूर्वकमात्मनो ज्ञान-दर्शन-सुख-वीर्यादिगुणांस्ते विकासयन्ति स्म । उत्तरपुराणानुसारं सङ्घेऽस्मिन्—

> शतानि त्रीणि पूर्वाणां धारिणः शिक्षकाः परे ।
> शून्यद्वितयरन्ध्रादि-रन्ध्रोक्ता सत्यसंयमाः ॥
>
> सहस्रमेकं त्रिज्ञानलोचनास्त्रिशताधिकम् ।
> पञ्चमावगमाः सप्तशतानि परमेष्ठिनः ॥
>
> शतानि नव विज्ञेया विक्रयर्द्धि-विवर्द्धिताः ।
> चतुर्दश सहस्राणि पिण्डिताः स्युर्मुनीश्वराः ॥
>
> चन्दनाद्यार्यिकाः शून्यत्रयषड्वह्निसम्मिताः ।
> श्रावका लक्षमेकं तु त्रिगुणाः श्राविकास्ततः[1] ॥७४।३६५—

पूर्वधारिणः ३००, शिक्षकाः ६६००, अवधिज्ञानिनः १३००, केवलिनः ७००, विक्रियाधारिणः ६००, मनःपर्ययज्ञानिनः ५००, वादिनः ४०० एवं सर्वपिसङ्ख्या १४००० मिताऽभूत् । किञ्च—आर्यिकाः ३६००, श्रावकाः १०००००, श्राविकाश्च ३००००० संख्यामिता अभूवन् ।

वीरसङ्घे सप्त गणा अवर्तन्त[2] येषां व्यवस्थामेका दशगणधरा इन्द्रभूति-प्रभृतयः सम्पादयन्ति स्म । श्रवण-बेल्गोलस्य शिलालेख-सं० १०५ तो ज्ञायते यत्—

> तस्याभवन् सदसि वीरजिनस्य सिद्धसप्तर्द्धयो गणधराः किल रुद्रसङ्ख्याः ।
> ये धारयन्ति शुभदर्शनबोधवृत्तैर्मिथ्यात्रयादपि गणाद् विनिवर्त्य विश्वान् ॥४॥
>
> पूर्वज्ञानिह वादिनोऽवधिजुषः श्रीपर्य्ययज्ञानिनः,
> सेवे वैक्रियकांश्च शिक्षकयतीन् कैवल्यभाजोऽप्यमून् ।

---

१. तिलोयपण्णत्त्यां ४।११६६-११-७६ तथा हरिवंशपुराणे ६०।४३२-४४० ऽपि वर्णनमेतदीदृशमेवास्ति ।

२. श्वेताम्बरग्रन्थेषु नव गणानामुल्लेखो विद्यते । एवमेव श्रमणादीनां संख्याविषयेऽपि न्यूनाधिक्यं दृश्यते ।

इत्यग्न्यम्बुनिधित्रयोत्तर-निशानाथास्तिकार्यैः शतैः,
रुद्रानेकशताचलैरपि मितान् सप्तैव नित्यं गणान् ॥६॥

(—जैनशिलालेखसङ्ग्रहे पृ० १६६)

चतुर्विधस्य सङ्घस्य धार्मिकी शासनव्यवस्था गणधराधीनाऽवर्तत तथाऽप्यार्यिकासङ्घस्य नेतृत्वं सती साध्वी चन्दनैव समभालयत् । सङ्घव्यवस्थाया उदारा नियमा आसन् येषां पालनं यथोचितरीत्या क्रियते स्म । कदाचित् कार्य-वशात् कोऽपि मार्गभ्रष्टो भवति स्म तदा सङ्घसमक्षं प्रायश्चित्ताचरणानन्तरं पुनः पूर्वपदे स्थापनं विधीयते स्म । अत्र विषये सात्यकिमुनेर्ज्येष्ठाया आर्यिकायाश्चोदाहरणे उल्लेखनीये स्तः । सर्वेऽपि धर्मनियमानां परिपालने पूर्णतया दत्ता-वधाना अभूवन् । ज्ञाने तपश्चरणे च सर्वेऽपि विवेकपूर्वकं संलग्ना आसन् । भ्रामर्या वृत्त्या साधव आहारादीन् गृह्णन्ति स्म । यथोक्तं ग्रन्थान्तरे—

जहा दुमस्स पुप्फेसु भमरो आवियइ रसं ।
ण य पुप्फं किलामेइ सो अ पीणेइ अप्पयं ॥
एमेए समणा मुत्ता जे लोए संति साहुणो ।
विहंगमा व पुप्फेसु दाणभत्तेसणारया ॥

अर्थात्—यथा द्रुमेषु पुष्पितेभ्यः पुष्पेभ्यो भ्रमरा रससञ्चयं कुर्वन्ति रस-पान काले च पुष्पं मनागपि न पीडयन्ति तथैव समस्तैर्मोह-ममत्वैर्मुक्ता मुनयोऽपि व्यवहरन्ति । यथा भ्रमरा पुष्पाणां रससञ्चयात् सन्तुष्यन्ति तथैव साधवोऽपि विधिपुरस्सरं प्राप्तैर्दानैः सन्तुष्यन्ति । इति । सेयं व्यवस्थाऽद्यापि सर्वत्र प्रवर्तिता विद्यते ।

भगवतो निर्वाण-प्राप्तिः

मानव-जीवनस्य चरमं लक्ष्यं निर्वाण-प्राप्तिरस्ति । आत्मनः परमात्मत्वसिद्धिरेव निर्वाणम् । अस्योपलब्धये भगवता तपःसंयमसाधनानां मार्गे विहृत्य योग-कषाययोर्निरोधपूर्वकं निर्वाणस्य भूमिका साधिताऽऽसीत् । निर्वाण-प्राप्तेरिमानि सोपानानि गुणस्थानारोहणमिति कथ्यन्ते । इमानि सोपानानि सूचयन्ति यत्—'कामना जयत, आत्मानं निष्कलुषं सम्पादयत' इति । तीर्थङ्करः श्रीमहावीरोऽस्यां भूमौ ज्ञानामृतं प्रवाहयितुमागच्छत् । निरन्तरं त्रिंशद्वर्षपर्यन्तं विहारान् कृत्वा भुवः क्लेशा अपहस्तिताः । मानव-समाजो दुःखैर्विनोचितस्तदीयहृदये ज्ञानदीपं प्रज्वाल्य सुखस्य शान्तेः कल्याणस्य च मार्गः प्रकाशितः ।

भगवान् श्रीमहावीरः संसारस्य प्राणि-जगते दिव्यं ज्ञानं वितरन् पावापुरीं प्राप्तः । तत्र हि मनोहरोद्यानवने सरसां मध्यस्थे मणिमये शिलातले विराजितः । विहारान् विसृज्यात्र भगवान् कर्मनिर्जरामवर्धयत् । मनोवाक्काय-योगं निरुध्य क्रियारहितः सन् मोक्षोपयोगीन्यघातिकानि कर्माणि नाशयितुं प्रतिमायोगः स्वीकृतः । दिव्यध्वनिर वरुद्धो वचनयोगश्च पूर्णतया निरुद्धः । अनेन योगेन—"देवगति-शरीरपञ्चक-सङ्घात-पञ्चक-बन्धनत्रयाङ्गोपाङ्ग-त्रय-संस्थानषट्क-संहनन-षट्क-वर्णपञ्चक-गन्धद्वय-रसपञ्चक-स्पर्शाष्टक-देवगत्यानुपूर्व्या गुरुलघूपघात-परघातोच्छ्वास-वि-हायोगतिद्वयापर्याप्ति-प्रत्येकशरीरास्थिर-शुभाशुभ-दुर्भग-दुःस्वर-सुस्वरानादेयायशःकीर्त्यसतावेदनीय - नीचगोत्रनिर्माण"-रूपाणां द्वासप्ततिकर्मप्रकृतीनामयोगिगुणस्थानस्योपान्त्ये क्षयः कृतः । एवमेव स्वस्य शक्तिबलेन शुक्लध्यानस्य चतुर्थ-भेदरूप-व्युपरतक्रियानिवृत्तेरालम्बनं विधाय "आदेय-मनुष्यगति-मनुष्यगत्यानुपूर्व्य-पञ्चेन्द्रियजाति-मनुष्यायुः-पर्याप्ति-त्रस-बादर-सुभग-यशःकीर्ति-सातावेदनीयोच्चगोत्र-तीर्थङ्करनामकर्म"रूपाणां त्रयोदश प्रकृतीनामन्तसमये क्षयो विहितः ।

योगनिरोधाय भगवता षष्ठोपवास आहृतः कायोत्सर्गेण च कर्मप्रकृतयो विनाशिताः। एवं कार्तिककृष्ण-चतुर्दश्यां रात्रेरन्तिमे यामे स्वातिनक्षत्रे भगवता मोक्षपदं प्राप्तम्। श्रीमान् **असगकवि'वर्धमानचरिते'** प्रसङ्ग-मिममेवमवर्णयत्—

कृत्वा योगनिरोधमुज्झितसभः षष्ठेन तस्मिन् वने,
व्युत्सर्गेण निरस्य निर्मलरुचिः कर्माण्यशेषाणि सः।
स्थित्वेन्दावपि कार्तिकासितचतुर्दश्या निशान्ते स्थिते,
स्वातौ सन्मतिरासमाद भगवान् सिद्धिं प्रसिद्धश्रियम्॥ (सर्ग० १८, पद्यसं० ९७)

अमावास्याया उषसि भगवतो निर्वाणकाले सुधर्मादयस्तत्रैव समुपस्थिता आसन्। लिच्छवी-गणराज्यस्य चाष्टादश राजानोऽपि तत्रासन्। पावापुर्यां जनसमूहोऽपि निर्वाण-कल्याणकार्चनायोपस्थितः। सर्वैरपि दीपप्र-ज्वालन-पूर्वकं दिव्यज्योतिषि विलीनस्य भगवतः समर्चनायां स्वीयानि भक्तिपुष्पाणि समर्पितानि। इदमेवोक्तं हरिवंशपुराणे—

ज्वलत्प्रदीपालिकया प्रवृद्धया, सुरासुरैर्दीपितया प्रदीप्तया।
तदा स्म पावानगरी समन्ततः, प्रदीपिकाकाशतला प्रकाशते॥
तथैव च श्रेणिकपूर्वभूभुजः, प्रकृत्य कल्याणमहं सह प्रजाः।
प्रजाः सुरेन्द्राश्च सुरैर्यथायथं, प्रयाचमाना जिनबोधिमर्थिनः॥ ६६।१९-२०॥

एवं द्वासप्ततिवर्षाणामायुषः पूर्तौ भगवतो निर्वाणमभूत्।

भगवतो महावीरस्योत्तराधिकारः

तीर्थङ्करस्य भगवतो महावीरस्य चतुर्विध-सङ्घस्य सदस्याः पञ्चलक्षमिता नरा नार्यश्चासन्। मुनिसङ्घ एकादश गणधराणामाध्यक्ष्ये नवसु गणेषु वृन्देषु वा विभक्तमभूत्। श्रावक-श्राविका-सङ्घे सर्वस्यापि वर्गस्य जातेश्च व्यक्तय आसन्। भारतस्य प्रतिकोणं तदनुयायिनो विद्यमाना आसन्नेव सहैव भारताद् बहिर्गान्धार-कापिशा-पारसीक-देशेष्वपि तदीया भक्ता अवसन्।

श्रीमहावीरस्य निर्वाण-प्राप्त्यनन्तरं तदीय उत्तराधिकारो जैनसङ्घस्य नायकत्वं प्रधानगणधरेसा श्रीइन्द्रभूति-गौतममहाभागेन प्राप्तम्। यस्मिन् दिने भगवतो निर्वाणमभूत्, तस्मिन्नेव दिने तदीयः प्रधानशिष्यो गौतमगण-धरोऽपि केवलज्ञानी सञ्जातः। तन्मुक्त्यनन्तरं क्रमशः सुधर्मस्वमि-जम्बूस्वामिनावपि केवलज्ञानं लब्ध्वा मुक्तावभूताम्। ततः परं कोऽप्यनुबद्धः केवली नाभूत्। एतेषां त्रयाणामपि धर्मप्रवर्तनस्य सामूहिकः कालो द्वाषष्टिवर्षाणामस्ति।

एतदेवोक्तं 'तिलोयपन्नत्ती' ग्रन्थे—

जादो सिद्धो वीरो तद्दिवसे गोदमो परमणाणी।
जादो तस्सि सिद्धे सुधम्मसामी तदो जादो॥

तम्मि कदकम्मणासे जंबूसम्मि त्ति केवली जादो ॥
तत्थ वि सिद्धिपवण्णे केवलिणो णत्थि अणुबद्धा ॥
वासट्ठी वासाणि गोदमपहुदीण णाणवंताणं ।
धम्मपयट्टणकाले परिमाणं पिंडरूपेणं ॥ (४।१४७६-१४७८)

तदनन्तरमिन्द्रभूतिगौतम-गणधरेण द्वादशवर्षावधि सङ्घस्य सञ्चालनं विहितम् । अयमेव महानुभावः श्रीमतो महावीरस्योपदेशान् सङ्कलय्य शृङ्खलाबद्धरूपेण व्यवस्थाप्य वर्गीकृत्य च भगवतो वाणीं सुस्थायिनीं व्यदधात्[1] ततोऽग्रेऽपि सर्वेऽप्याचार्या निधिमिमं संरक्षितुं प्रयत्नशीला विभान्त्येव। अतएवैत एव भगवत उत्तराधिकारिणः सन्तीति गदितुं सुशकम् ।

जैनागम-साहित्यम्

जैनाचार्यैर्विरचितं वाङ्मयं पर्याप्तं विशालं विद्यते । आगमभाषायामिदं **'श्रुतज्ञान'**मिति कथ्यते । प्राचीनकाले समस्तमपि श्रुतज्ञानं चतुर्दशपूर्वेषु—**उत्पादपूर्व-अग्रायणी-वीर्यप्रवाद-अस्तिनास्तिप्रवाद-ज्ञानप्रवाद-सत्यप्रवाद- आत्मप्रवाद - समयप्रवाद-प्रत्याख्यानप्रवाद-विद्यानुप्रवाद- अवन्ध्य- प्राणावाय- क्रियाविशाल- बिन्दुसारा**-भिधेष्वन्तर्निहितमासीत् । भगवता महावीरेणेदमेकादश-गणधरेभ्य उपदिष्टं तदेवेदं **'जैनागम-आगम'**[2] नाम्ना सर्वत्र सुप्रसिद्धं सद्विद्योतते ।

एवं विशिष्टशक्तिसम्पन्ना गणधर-नाम-कर्म-लब्धिशालिनो महापुरुषाः प्रभोर्महावीरस्यैकान्तहितकारिणी-रात्मस्वरूपावगाहिनीर्वाणीः सूत्ररूपेण सङ्ग्रथ्य शिष्येभ्यः प्रशिष्येभ्यश्च ग्रहण-धारणोपदेशादि-सौविध्यं दातुं प्रायतन्त । एतद्विषये श्रीभद्रबाहुस्वामिना प्रोक्तम्—

अत्थं भासइ अरहा, सुत्तं गंथंति गणहरा निउणं ।
सासणस्स हियट्ठाए, तओ सुत्तं पवत्तेइ ॥ (आवश्यक-निर्युक्तिः १२)

एतदनुसारं जैनागमानां प्ररूपणं भगवताऽर्हता विहितं सूत्ररूपेण निबन्धनं च गणधरैः कृतमिति सुस्पष्टमेव ।

एतेषामागमानां सङ्ख्या षट्चत्वारिंशद् विद्यते । तत्र द्वादशाङ्गानि जैनशास्त्रेषु सर्वतः प्राचीना ग्रन्थाः सन्ति। **'दुवालसंगं वा प्रवचनं वेदो'** (आचाराङ्गचूर्णी ५।१८५) इत्याद्युक्त्यनुसारमेतान्यङ्गानि वेदनाम्ना क्वचिद् गणीपटकनाम्ना च ख्यातानि । इमान्यङ्गानि भगवतो महावीरस्य गणधरश्रीसुधर्म-स्वामिग्रथितानि मन्यन्ते । एतानि

१—पुणो तेणिंदभूदिणा भाव-सुद-पज्जय-परिणदेण बारहंगाणं चोद्दसपुव्वाणं च गंथाणमेक्केण चेव मुहुत्तेण कमेण रयणा कदा ।—धवला टीका, १ पुस्तकं, पृ० ६५ ।

२—हेयोपादेय-रूपेण चतुर्वर्गसमाश्रयात् ।
कालत्रयगतानर्थान् गमयन्नत्त्वागमः स्मृतः ॥१००॥

—उपासकाध्ययने,

क्रमशः—१-आयारंग (आचाराङ्ग) २-सूयगडंग-(सूत्रकृताङ्ग) ३-ठाणांग-(स्थानाङ्ग) ४-समवायांग (समवायाङ्ग)-५-विवाहपण्णत्ति (व्याख्याप्रज्ञप्ति-भगवती[1]) ६-नायाधम्मकहाओ (ज्ञानधर्मकथा) ७-उपासगदसाओ (उपासकदशा) ८-अंतगडदसाओ (अन्तकृद्दशा) ९-अणुत्तरोववाइयदशाओ (अनुत्तरोपपातिकदशा) १०-पण्हवागरणाइं (प्रश्नव्याकरण) ११-विवागसुय (विपाकसूत्र) १२-दिट्ठवाय (दृष्टिवाद)प्रभृतीनि सन्ति । एतेषु दृष्टिवादो विच्छिन्नो विद्यते ।

यथा वेदानामङ्गान्युपाङ्गानि च सन्ति तथैवात्राप्युपाङ्गानां रचना प्रतीयते । एतेषां ग्रथनं स्थविराचार्यैर्विहितमिति प्रसिद्धिः ।

उपाङ्गानां सङ्ख्यापि द्वादश वर्तते । येषु क्रमशः—१-ओववाइय (औपपातिक) २-रायपसेणिय-(राजप्रश्नीय) ३-जीवाभिगम (जीवाजीव—विभाग) ४-पन्नवणा—(प्रज्ञापना)—५-सूरियपण्णत्ति (सूर्यप्रज्ञप्ति)-६-जंबुद्दीवपण्णत्ति (जम्बूद्वीपप्रज्ञप्ति) ७-चंदपण्णति (चन्द्रप्रज्ञप्ति) ८-निरयावलियाओ अथवा कप्पिया-(निरयावलिका अथवा कल्पिका) ९-कप्पवडंसियाओ (कल्पावतंसिका) १०-पुप्फियाओ (पुष्पिका) ११-पुप्फचूलियाओ-(पुष्पचूलिका) १२-वण्हिदसाओ (वृष्टिदशा)श्चेति समाविष्टानि सन्ति ।

नन्दीसूत्रस्य टीकाकर्तुः श्रीमलयगिरेरनुसारं तीर्थङ्करोपदिष्टं श्रुतमनुसृत्य श्रमणाः प्रकीर्णकानां रचनाः कुर्वन्ति किंवा श्रुतमनुसृत्य वचनकौशलपूर्वकं धर्मदेशनादि-प्रसङ्गेन श्रमणैः प्रोक्ता रचनाः प्रकीर्णकनाम्ना मन्यते । भगवतो महावीरस्य काले प्रकीर्णकानां संख्या चतुर्दशसहस्रमितासीत् । परं सम्प्रति मुख्यरूपेण दशप्रकीर्णकग्रन्था उपलभ्यन्ते । यथा—

१-चउसरण (चतुःशरण) २-आउरपच्चक्खाण (आतुरप्रत्याख्यान) ३-महापच्चक्खाण (महाप्रत्याख्यान)-४-भत्तपरिण्णा (भक्तपरिज्ञा) ५-तंदुलवेयालिय (तन्दुलवैचारिक) ६-संथारग (संस्तारक) ७-गच्छायार (गच्छाचार)-८-गणिविज्जा (गणिविद्या) ९-देविंदथय (देवेन्द्रस्तव) १०-मरणसमाही (मरणसमाधिः)चेति ।

छेदसूत्राणि जैनागमानां प्राचीनतमो भागोऽस्ति तस्मादस्य महत्त्वं विशिष्य वर्तते । एतेषु सूत्रेषु निर्ग्रन्थानां प्रायश्चित्तविधेः प्रतिपादनमस्ति । एतानि सूत्राणि चारित्रिकशुद्धतायाः स्थिरत्वे सहायकानि सन्ति तस्मादेतान्युत्तमश्रुतानि कथ्यन्ते । छेदसूत्रेषु जैनभिक्षूणामाचारविचारसम्बन्धि-नियमानां विवेचनानि सन्ति । एते नियमा भगवता महावीरेण तदीयशिष्यवर्गेण च देश-कालयोः परिस्थितेरनुसारं श्रमणसम्प्रदायार्थं निर्धारिताः । छेदसूत्राणामध्ययनं विना कोऽप्याचार्यो भिक्षुसम्प्रदायं नीत्वा ग्रामानुग्रामेषु विहर्तुं न शक्नोति ।

संक्षिप्तशैल्यामालिखितानामेतेषां सूत्राणां सङ्ख्या षड् विद्यते । यथा—

१-निसीह (नशीथ) २-महानिसीह (महानिशीथ) ३-ववहार (व्यवहार) ४-दसासुयक्खंध (दशाश्रुतस्कन्ध)-५-कप्प (कल्पाथवा वृहत्कल्प) ६-पञ्चकप्प अथवा जीवकप्प (पञ्चकल्पाथवा जीतकल्पे)ति ।

१—व्याख्याप्रज्ञप्तिरेव भगवतीसूत्रनाम्ना विख्याता विद्यते ।

मूलसूत्राणि साधुजीवनस्य मूलभूतानुपदेशान् प्रकटयन्ति। आगमेषु मूलसूत्राणां स्थानं नैकाभिर्दृष्टिभि-र्महत्त्वशालि विद्यते। एतेषूत्तराध्ययनं दशवैकालिकश्च जैनागमेषु प्राचीनतमे सूत्रे मन्येते। एतेषां सङ्ख्या चत्वारि विद्यते। यथा —

१-उत्तरज्झयण (उत्तराध्ययन) **२-दशवेयालिय** (दशवैकालिक) **३-आवस्सय** (आवश्यक) **४-पिंडनिज्जुत्ति** अथवा **ओहनिज्जुत्ति** (पिण्डनिर्युक्ति ओघनिर्युक्ति)र्वेति।

तथा—**१-नंदिसूत्तं** (नन्दीसूत्रं) २—**अनुयोगदारसुत्तं** (अनुयोगद्वारसूत्रं) चेति। प्रान्ते द्वयमप्यागमेषु परि-गणिते सती षट्चत्वारिंशन्मितां संख्या पूरयतः।

इयमागमानां सङ्ख्याऽन्यत्र चतुरशीतिमिताऽपि सूचिताऽस्ति यस्यां ११ अङ्गानि, १२ उपाङ्गानि, ५ छेद-सूत्राणि,[1] ५-मूलसूत्राणि[2] ८ अन्ये ग्रन्थाः[3] ३० प्रकीर्णकानि,[4] १२ निर्युक्तयः[5] १ विशेषावश्यकमहाभाष्यञ्च सम्मिलितानि भवन्ति।

श्वेताम्बरा दिगम्बराश्चेति द्वावपि सम्प्रदायावेतानागमरूपेण स्वीकुर्वन्ति परं साम्प्रतं दिगम्बरसम्प्रदाया-नुयायिनः 'कालदोषेणेम आगमा विनष्टा' इति मन्वते श्वेताम्बर-सम्प्रदायानुयायिनश्चैतान् यथावत् स्वीकुर्वन्ति।

---

१. पंचकप्प (पञ्चकल्प)स्यात्र गणना न क्रियते।

२. उत्तराध्ययन—दशवैकालिक-आवश्यक-नन्दी-अनुयोगद्वाराणि।

३—कल्पसूत्र-जीतकल्प-यतिजीतकल्प-श्राद्धजीतकल्प-पाक्षिक-क्षामणा-वंदित्तु-ऋषिभाषित-प्रभृतयः।

४. प्रकीर्णकानीमानि नाम्नैवमाम्नातानि प्रतीयन्ते—

१—चतुःशरणम्
२—आतुरप्रत्याख्यानम्
३—भक्त-परिज्ञा
४—संस्तारकम्
५—तन्दुलवैचारिकम्
६—चन्द्रवेध्यकम्
७—देवेन्द्रस्तवः
८—गणिविद्या
९—महाप्रत्याख्यानम्
१०—वीरस्तवः
११—अजीतकल्पः
१२—गच्छाचारः
१३—मरणसमाधिः
१४—सिद्धप्राभृतम्
१५—तीर्थोद्‌गारः
१६—आराधनापताका
१७—द्वीपसागरप्रज्ञप्तिः
१८—ज्योतिष्करण्डकम्
१९—अङ्गविद्या
२०—तिथिप्रकीर्णकम्
२१—पिण्डनिर्युक्तिः
२२—सारावलिः
२३—पर्यन्ताराधना
२४—जीवविभक्तिः
२५—कवचम्
२६—योनिप्राभृतम्
२७—अङ्गचूलिया
२८—वंशचूलिया
२९—वृद्धचतुः शरणम्
३०—जम्बूप्रकीर्णकम्

५. द्वादश निर्युक्तयो यथा—

१—आवश्यकनिर्युक्तिः
२—दशवैकालिक ,,
३—उत्तराध्ययन ,,
४—आचाराङ्ग ,,
५—सूत्रकृताङ्गनिर्युक्तिः
६—बृहत्कल्प ,,
७—व्यवहार ,,
८—दशाश्रुत ,,
९—कल्पसूत्रनिर्युक्तिः
१०—पिण्ड ,,
१२—ओघ ,,
१३—संसक्त ,,

सूर्यप्रज्ञप्तिनिर्युक्तिः ऋषिभाषितनिर्युक्तिश्चानुपलब्धे स्तः। एते सर्वेऽपि संहृत्य त्र्यशीत्यागमा भवन्ति। एतेषु जिनभद्रगणिक्षमाश्रमणस्य 'विशेषावश्यकमहाभाष्य'स्य संयोजनाच्चतुरशीतिसङ्ख्या पूर्णतामेति।

आगमानां महत्त्वम्

इदं सर्वथा सत्यमस्ति यत् कालदोषेणागमसाहित्यं बहुधा क्षतिग्रस्तमभूत् । भगवतो महावीरस्य निर्वाण-प्राप्त्यनन्तरं प्राय एकसहस्रवर्षाणां कालः काठिन्यपूर्ण आसीत् । बहुत्र दुष्कालवशात् साधव आचार्याश्च श्रुतस्य संरक्षणेऽसमर्था अभवन् । वृद्धसम्प्रदायपरम्पराश्च विच्छिन्नाः । तथापि यत्सुरक्षितमस्ति तस्मिन्-प्राचीना जैनपरम्परा अनुश्रुतयो लोककथास्तात्कालिक्यः सामाजिक्यः प्रथा धर्मोपदेशपद्धतय आचारा विचाराः संयमपालन-विधयश्च विद्योतन्ते । तदानीन्तन्यः सामाजिक्यो धार्मिक्यो राजनीतिक्यश्चावस्था एतेषामालोकनेनालोचनेन च स्पष्टतां यान्ति ।

यीशोर्द्वितीयशत्या आरभ्य षोडशीं शतीं यावदागमसाहित्यस्य व्याख्याकाल आसीत् । अस्मिन् सुदीर्घे काले विद्वद्भिराचार्यवर्यैरागमसाहित्योपरि निर्युक्ति-भाष्य-चूर्णी-टीका-विवरण-विवृति-वृत्ति-दीपिकाऽवचूरि-अवचूर्णी-विवेचन-व्याख्या-छायाऽक्षरार्थ-पञ्चिका-टब्बा-भाषाटीका-वचनिका-प्रभृति विपुलं व्याख्यात्मकं साहित्यं रचितम् । आगमानां विषया इयन्तो गम्भीराः परिभाषिकाश्च सन्ति येषां परिज्ञानाय व्याख्यात्मकं साहित्यमतीवावश्यकमासीत् । सेयमावश्यकता व्याख्याकारैः सम्पूर्य महानुपकारः कृतः ।

दिगम्बरसम्प्रदायानुसारमागमाः

भगवतो महावीरस्य स्थितिसमये दिगम्बर-श्वेताम्बर सम्प्रदायरूपः कोऽपि भेदो नासीत् । सर्वेऽपि महावीरोप-दिष्टस्य निर्ग्रन्थप्रवचनस्यानुसर्तार आसन् । परं कालान्तरे सम्भवतः प्रथमायां शत्यां विशिष्य 'अचेलकत्व'विषये परस्पर मतभेदः सम्पन्नः । ततः परं चागमानां स्वीकृतावपि मतभेदः समुत्पन्नः । दिगम्बरसम्प्रदायानुयायिनामागम-विषयिणी मान्यतैवमस्ति —

अस्यां परम्परायां श्वेताम्बर-परम्परा-स्वीकृतानां पञ्चचत्वारिंशदागमानां विषये मान्यता विद्यते यदेत आगमा विच्छिन्नाः सञ्जाता इति । तथा दिगम्बरसम्प्रदाय आगमानां द्वौ भेदौ स्तः १—अङ्गबाह्या आगमा २—अङ्गप्रविष्टाश्च । अनयोरङ्गबाह्यस्य चतुर्दश भेदाः । तेषु—**'सामायिक-चतुर्विंशतिस्तव-वन्दना-प्रतिक्रमण-वैनयिक-कृतिकर्म-दशवैकालिकोत्तराध्ययन-कल्पव्यवहार-कल्पाकल्प-महाकल्प-पुण्डरीक-महापुण्डरीक-निषिद्धिकाः'** सन्ति । **अङ्ग-प्रविष्टस्य द्वादश भेदाः सन्ति** । तेषु—**'आचार-सूत्रकृत-स्थान-समवाय-व्याख्याप्रज्ञप्ति-नाथधर्मकथोपासकाध्ययनान्त-कृद्दशाऽनुरोत्तरोपपातिकदशा-प्रश्नव्याकरण-विपाकसूत्र-दृष्टिवादा आयान्ति** । दृष्टिवादस्य पञ्चाधिकाराः—**परिकर्म-सूत्र-प्रथमानुयोग पूर्वगत-चूलिकाऽभिधाना** विद्यन्ते । परिकर्माधिकारस्य—१—**चन्द्रप्रज्ञप्ति-सूर्यप्रज्ञप्ति-जम्बूद्वीप-प्रज्ञप्ति-द्वीपसागर-प्रज्ञप्ति-व्याख्याप्रज्ञप्ति-नामकाः पञ्चभेदाः सन्ति** । सूत्राधिकारे जीव-त्रैराशिकवाद-नियतिवाद-विज्ञानवाद-शब्दवाद-प्रधानवाद-द्रव्यवाद-पुरुषार्थवादानां वर्णनं प्रथमानुयोगे पुराणानामुपदेशास्तथा पूर्वगताधिकारे उत्पादव्यय-ध्रौव्यानां कथनमस्ति । एतेषां सङ्ख्या चतुर्दश विद्यते । चूलिकाया अपि—जलगता स्थलगता मायागता रूपगता-काशगता चेति पञ्च भेदाः सन्ति ।

दिगम्बर-परम्परानुसारं द्वादशाङ्गागमानामुच्छेदः सञ्जातः केवलं दृष्टिवादस्यैव कश्चनांशोऽवशिष्टः । यो हि 'षट्खण्डागम—कर्मप्राभृत-कषायप्राभृत' रूपेण विद्यमानोऽस्ति । अस्मिन् सम्प्रदाये प्रकारान्तरेण जैनागमाश्चतुर्षु भागेषु विभक्ता वर्तन्ते । **प्रथमानुयोगे** 'रविषेणस्य पद्मपुराणं, जिनसेनस्य हरिवंशपुराणादिपुराणे तथा जिनसेनस्य शिष्यश्रीगुणभद्रस्योत्तरपुराणमन्तर्भवन्ति । २—**करणानुयोगे**'सूर्यप्रज्ञप्ति-चन्द्रप्रज्ञप्ति-जयधवला'-नामन्तर्भावो

विद्यते । ३—द्रव्यानुयोगे—'कुन्दकुन्दस्य रचनाः—प्रवचनसार-पञ्चास्तिकाय-समयसारादयः, उमास्वातेः सटीकं तत्त्वार्थसूत्रं, समन्तभद्रस्य—'आप्तमीमांसा तट्टीका'श्च समायान्ति । ४—चरणानुयोगे—'वट्टकेरस्य मूलाचारः—'त्रिवर्णाचार'स्तथा समन्तभद्रस्य 'रत्नकरण्डश्रावकाचारोऽन्तर्भवन्ति ।

दिगम्बर-परम्परायां भगवतो महावीरस्य द्वादशाङ्गवाण्या सम्बद्धौ **'षट्खण्डागम-कषायप्राभृत'**नामानौ द्वावेव ग्रन्थौ सम्मान्यौ स्तः । शिष्टं समस्तमपि श्रुतज्ञानं विलुप्तं विच्छिन्नं वा मन्यते । अतोऽनयोः परिचयोऽप्यत्र दीयते ।

षट्खण्डागमस्तन्महत्त्वं च

भगवतो महावीरस्योपदेशस्तदीयगणधरेण गौतमेन्द्रभूतिना द्वादशाङ्गरूपे निबद्ध आसीत् । श्रीमहावीरस्य निर्वाणानन्तरं त्र्यशीत्युत्तरषट्शतवर्षोत्तरावाधि अङ्गज्ञानस्य प्रवृत्तिः प्रचलिताऽऽसीत् ततः परं गुरुशिष्यपरम्परातो दीयमानोऽयमुपदेशः क्रमेण विलुप्तः । अस्य द्वादशाङ्गस्य कियांश्चिदंशो गिरिनगर (गिरनार-काठियावाड़)स्थचन्द्र-गुहायां ध्यानमग्नस्याचाराङ्गस्य पूर्णज्ञातुः श्रीधरसेनस्य स्मृतिपटले सुरक्षितमासीत् । अस्य श्रुतज्ञानस्य विलोपभयाद् धरसेनमहाभागेन महिमानगरीस्थाय मुनिसम्मेलनाय पत्रं प्रहितं तत्फल-स्वरूपं चान्ध्रप्रदेशात् **पुष्पदन्त-भूतबलि-नामानौ द्वौ मुनी** आगतौ । धरसेनाचार्येणैतौ द्वावपि मेधाविनौ शिष्यौ पाठितौ । अध्यापने दृष्टिवादस्य पूर्वास्तथा विआहपण्णत्तेः केचनांशा आसन् । अयमाचार्यो मन्त्रशास्त्रस्यापि पण्डितोऽभूत् । अनेन कूष्माण्डिनीदेव्याः सम्प्राप्य 'जोणिपाहुड' (योनिप्राभृत)नामको ग्रन्थः पुष्पदन्तभूतबलिभ्यां लिखित आसीत् । एताभ्यामेव पुष्पदन्तभूतबलिभ्यां षड्-खण्डागमस्य रचना विहिता । पुष्पदन्तेनाचार्येण सप्तसप्तत्युत्तरैकशतसङ्ख्यकसूत्रेषु सत्प्ररूपणा भूतबल्याचार्येण च षट्सहस्रसूत्रेषु शिष्टो ग्रन्थः प्रणीतः ।

'कर्मप्राभृत-महाकर्मप्रकृतिप्राभृत-आगमसिद्धान्त परमागम-खण्डसिद्धान्त-षट्खण्डसिद्धान्तादि-नामभिरपि ग्रन्थोऽयं परिचीयते । श्वेताम्बरसम्प्रदाये यथाऽऽचाराङ्गादिग्रन्थानामागमिकी मान्यता विद्यते तथैव **'कर्मप्राभृत-कषाय प्राभृताभ्यामागमिकी** मान्यता दिगम्बरसम्प्रदाये दीयते । एवं चतुर्दशपूर्वाणामन्तर्गतस्य द्वितीयाग्रायणीपूर्वस्य कर्म-प्रकृतिनामकाधिकारस्याधारेण षट्खण्डागमस्याधिकांशभागस्योद्धारो विहितः ।

ईदृशस्य महत्त्वपूर्णग्रन्थस्य समये समये नैकाष्टीका आरचिताः । तासु टीकासु कुन्दकुन्दाचार्यकृता 'परिकर्म' शामकुण्डकृता 'पद्धतिः' तुम्बूलूराचार्यकृता 'चूडामणिः' समन्तभद्रस्वामिकृता 'टीका' तथा बप्पदेवगुरुकृता 'व्याख्या-प्रज्ञप्ति'नाम्नी टीका प्रधाना आसन् । दौर्भाग्यादिमाः सर्वा अपि साम्प्रतमनुपलब्धाः सन्ति । सर्वतो महत्त्वपूर्णा सम्प्रति सुलभा च टीका 'धवला' विद्यते । अस्या निर्माताऽस्ति **श्रीवीरसेनः** । अयं हि श्रीमत आर्यनन्दिनः शिष्यः । टीकेयं बप्पदेवगुरोर्व्याख्याप्रज्ञप्तिटीकाधारेण चूर्णिका-पद्धत्या प्राकृत-संस्कृत-मिश्रिता द्वासप्ततिसहस्रश्लोकपरिमाणा निर्मिता । अस्याः समाप्तौ प्रदत्तायाः प्रशस्त्या अनुसारं षोडशोत्तराष्टशतमिते ख्रिस्तीयवत्सरे वाटग्रामपुरे टीकेयं पूर्तिं गता ।

श्रीवीरसेनचार्यो बहुश्रुतो मनीषी दिगम्बराचार्याणां श्वेताम्बराचार्याणां च विशालस्य साहित्यस्यालोडनं विधाय धवलायामुद्धरणरूपेणावश्यकान् सिद्धान्तांशान् विन्यस्तवान् । षट्खण्डागमस्य षट् खण्डाः सन्ति । क्षुल्लक-बन्ध-जीव-स्थान-क्षुल्लकबन्ध-बन्धस्वामित्वविचय-वेदना-वर्गणा-महाबन्धाभिधेषु षट्स्वपि खण्डेषु चूलिका अधिकारा अनुयोग-द्वाराणि च सन्ति येषु सूचितानां विषयाणां विस्तरेण प्रतिपादनं विद्यते ।

भूतबलिना पुष्पदन्तविरचितसूत्राण्येकीकृत्य पञ्चानां खण्डानां षट्सहस्रसूत्रनिर्मित्यनन्तरं षष्ठस्य महाबन्ध-खण्डस्य त्रिंशत्सहस्रश्लोकप्रमाणस्य निर्माणं विहितम् । इममेव ग्रन्थराजं 'महाधवल' नाम्ना स्मरन्ति । अत्र प्रकृति-स्थित्यनुभागप्रदेशबन्धानां विस्तरेण वर्णनमस्ति । धवल टीकायास्तृतीयचतुर्थांशो भागः प्राकृतभाषायां शिष्टो भागश्च संस्कृतभाषायां विद्यते । षट्खण्डागममाधारीकृत्यैव श्रीनेमिचन्द्रसिद्धान्तालङ्कारेण 'गोम्मटसार'स्य रचना कृता । अयं ग्रन्थो 'जीवकाण्ड-कर्मकाण्ड'-नामभ्यां द्वाभ्यां विभागाभ्यां विभक्तोऽमस्ति ।

कषायप्राभृतस्य महत्त्वम्

षट्खण्डागम इवैव कषायप्राभृतस्योद्गमस्थानमपि दृष्टिवाद एवास्ति । दृष्टिवादस्य ज्ञानप्रवादनामक-पञ्चम-पूर्वस्य दशमवस्तुनः पेज्जदोषनामकतृतीयप्राभृतात् कषायप्राभृतस्योत्पत्तिरभूत् । अस्य रचयिताऽऽचार्यः श्रीगुणधरो विद्यते । जयधवलाकारः स्वप्रणीतायां टीकायां प्रारम्भे—

जेणहि कसायपाहुडमणेयणमुज्जलं अणंतत्थं ।
गाहाहि विवरियं तं गुणहरभडारयं वंदे ॥६॥

इति विलिख्य श्रीगुणधरभट्टारकं वन्दितवान् । तीर्थव्युच्छेदभयादस्य ग्रन्थस्योपदेशः श्रीमता गुणधरेण विहितः । अयमाचार्यो महावीरप्रभोर्निर्वाणानन्तरं त्र्यशीत्युत्तरषट्शतवर्षाणां पश्चादङ्गानां पूर्वाणामाचार्यपरम्परात उपदेशं प्राप्य प्रवचनवात्सल्यवशात् षोडशसहस्रपदप्रमाणस्य 'पेज्जदोसपाहुड' ग्रन्थस्याशीत्युत्तरैकशतमितासु गाथासु प्रणयनं कृतवान् ।

अस्य ग्रन्थस्य प्रतिपाद्यविषयाणामुल्लेखः स्वयं ग्रन्थकारेण द्वाभ्यां गाथाभ्यां प्रस्तुतः । यथा—

(१) पेज्ज-दोसविहत्ती ट्ठिदि-अणुभागे च बंधगे चेय ।
वेदग-उवजोगे वि य चउट्ठाण-वियंजणे चेर्या ॥१३॥

(२) सम्मत्त-देसविरयी संजम उवसामणा च खवणा च ।
दंसण-चरित्तमोहे अद्धापरिमाणणिद्देसो ॥१४॥

एतदनुसारं पञ्चदशार्थाधिकारा अस्मिन् ग्रन्थे विद्यन्ते येषां १—प्रेयोद्वेष २—स्थित्यनुभागविभक्ति ३—बन्धक ४—सङ्क्रम ५—वेदक ६—उदीरणा ७—उपयोग ८—चतुःस्थान ९—व्यञ्जन १०—सम्यक्त्वोपशामना ११—दर्शनीयमोहनीयक्षपणा १२—देशविरति १३—संयमोपशामना १४—संयमक्षपणा १५—अद्धापरिमाणनिर्दे-शेत्यादि नामानि सन्ति ।

'श्रुतावतार'स्योल्लेखानुसारमतेस्य १—आचार्ययतिवृषभकृतं 'चूर्णिसूत्रं २—उच्चारणाचार्यरचिता उच्चारणावृत्तिः ३—आचार्यज्ञानकुण्डविरचिता 'पद्धतिटीका' ४—तुम्बूलूराचार्यकृता 'चूडामणिव्याख्या' ५—बप्प-देवगुरुकृता 'व्याख्याप्रज्ञप्तिवृत्तिः ६—आचार्यवीरसेन-जिनसेनकृता 'जयधवला' टीका चेति षड् व्याख्याः सन्ति । एतासु टीकासु प्रथमाऽन्तिमा च व्याख्ये साम्प्रतमुपलभ्येते ।

दिगम्बरसाहित्ये श्रुताङ्गसाहित्यम्

कषायप्राभृतोपरि चूर्णिसूत्राणां रचयिता श्रीयतिवृषभाचार्यः करणानुयोगस्य प्राचीनं प्राकृतभाषामयं 'तिलोय-

पण्णत्ती, त्रिलोकप्रज्ञप्ति-नामकं ग्रन्थं प्रणीतवान् । अयं ग्रन्थस्त्रिलोकविषयकं वर्णनं प्रस्तौति । अस्या ज्ञानं ग्रन्थ-कर्त्राऽऽचारपरम्परात एव प्राप्तम् । अस्य ग्रन्थस्य विषयः श्वेताम्बरागमेषु—'सूर्यप्रज्ञप्ति-चन्द्रप्रज्ञप्ति-जम्बूद्वीपप्रज्ञप्ति-ग्रन्थेभ्यस्तथा दिगम्बरीय'धवला-जयधवला-टीका-त्रिलोकसारादिप्राकृतग्रन्थेभ्यः साम्यं धारयति । लोकविभाग-मूलाचार-भगवती-आराधना-पञ्चास्तिकाय-प्रवचनसार-समयसारादिप्राचीनग्रन्थेषु त्रिलोकप्रज्ञप्तेरस्या भूयस्यो गाथाः समानाः सन्ति । अत्रैव भगवतो महावीरस्य निर्वाणादारभ्यैकसहस्रवर्षावधिकानां राज्ञां कालस्य वर्णनं विद्यते । यति-वृषभस्य समयो विक्रमसंवत्सरात् पूर्वं षड्विंशत्युत्तरपञ्चशतवर्षाणां सुनिश्चितमस्ति ।

एवं श्रुतधराचार्येषु क्रमशो गुणधर-धरसेन-पुष्पदन्त-भूतबलि-आर्यमंक्षु-नागहस्ति-वज्रयशश्चिरन्तनाचार्य-यतिवृषभोच्चारणाचार्य-वप्पदेव-कुन्द-कुन्द-वट्टकेर-शिवार्य-स्वामिकुमार (कार्तिकेय)-गृध्रपिच्छाचार्या अस्यां परम्परायां समुत्पन्नाः । यैः कर्मसाहित्यागमिकप्रकरण-साहित्य-धर्मोपदेश-योगाध्यात्मानागार-सागाराराचार-विधिविधान-कल्प-मन्त्र-तन्त्र-पर्व-तीर्थ-विषयकं प्रभूतं साहित्यं विरचितम् ।

श्रुतधराणां मानसानि निष्कारणं वात्सल्यपूर्णानि परोपकारपरायणानि तथोच्चापूर्वभावनाभरितान्यासन् अतस्ते विषमदुःषमारस्य विकटात् कालबलप्रभावाद् मेधा-श्रद्धा-धारणाशक्तीनां ह्रासमवलोक्य यथाकथमपि भगवतो वाण्याः स्रोतसः किमपि कियदपि पानीयं प्राणिनो लभेरन् किञ्च तदास्वादनेनात्मानं कर्मबन्धनाद् मोचयितुं प्रयते-रन्निति ग्रन्थप्रणयनान्यकार्षुः । तदेव साहित्यजातमद्य यथाकथञ्चिदस्माकं पुरत उपलभ्यते, इत्येतस्य धीरया धियाव-बोधनं तथा समास्वादनमेव कल्याणायेति ।

आगम-वाचना-परम्परा

श्वेताम्बरपरम्पराया अनुसारं सकलमप्यागमसाहित्यं विविधानां वाचनानां प्रवर्तनादद्य यावत् सुरक्षितमति-ष्ठदिति मन्यते । एतासु वाचनासु षड्वाचनानामितिवृत्तमित्थं लभ्यते—

(१) प्रथमा वाचना—प्रभोर्महावीरस्य पट्टपरम्परायां पञ्चमश्रुतकेवलिरूपेण प्रसिद्धस्य **श्रीभद्रबाहुस्वामिनः** समये द्वादशवर्षीयो भीषणो दुष्काल आपतितः । अस्मिन् दुःसमये गोचरीणां काठिन्येन साधवोऽनुकूलतानुसारं यत्र तत्र विहृताः । सुदीर्घो भागः सिन्धूनां नदीनां तटवर्तिप्रदेशान् गतः । तस्मिन्नेव समये नन्दवंशस्य साम्राज्येऽपि क्रान्ति-रासीदतो मगधदेशे पञ्चाम्बुप्रदेशे च भीषणा स्थितिरभूत् । इत्थं श्रमणानां पृथक्-पृथग्गमनेनागमानां पठनं पाठनं चाव्यवस्थितमभवत् । अनेके ज्ञानिन आचार्याः स्वर्गस्था अभूवन् । शिष्टानां ज्ञानिनां ज्ञानान्यपि शीर्णमयान्य-भवन् । फलतो मुखपाठपद्धत्या सुरक्षितमागमज्ञानं विशृङ्खलतां व्रजति स्म । अस्यां स्थितौ पाटलीपुत्रे वीरनिर्वाणसं० १६० निकटे पूज्याचार्य-श्रीस्थूलभद्रस्वामिनोऽध्यक्षतायां श्रमणसङ्घ एकीभूय परस्परं यद् यस्य स्मृतावासीत् तत्तद् श्रुत्वा स्मृत्वा च द्वादशाङ्गस्य व्यवस्थितसङ्कलनाप्रयासानकरोत् । अस्या वाचनाया अभिधानं **द्वादशाङ्गश्रुतसङ्कलन-वाचनेति** वक्तुं पार्यते । अस्यां वाचनायामेकादशाङ्गानि व्यवस्थितानि । ततः परं त्रुटितरूपेण समुपलभ्यमाने द्वादशत-माङ्गं दृष्टिवादमध्येतुं पू० स्थूलभद्रस्वामिप्रभृति-पञ्चशतसाधवो नेपालदेशे महाप्राणध्याने विराजमानानां श्रीभद्रबाहु-स्वामिनां निकटे मगधस्थश्रमणसङ्घेन प्रेषिताः । तेषु सर्वेऽपि कालबलेन खिन्नाः सञ्जाताः । अतः केवलं स्थूलभद्र-स्वामिन एव दशपूर्वावधि सूत्रार्थान् यथावदधीतवन्तस्ततो विषमकलिकालप्रभावान्नारीभ्योऽपि विद्याऽध्यापनरूपा-हम्भाववृत्त्या सिंहरूपस्य विकुर्वणायास्त्रुटेः कारणाच्चान्तिमचतुःपूर्वान् सूत्ररूपेणैवाध्येतुमशक्नुवन् ।

द्वितीयाऽऽगमवाचना—ततः परं जिनकल्प्या अभ्यासकानां पूज्याचार्यश्रीआर्यमहागिरीणां गुरुभ्रातृश्रीआर्य-सुहस्तिसूरिमहाराजानामाध्यक्ष्ये सम्राजा सम्प्रति-महाराजेन विज्ञप्तिपूर्वकमुज्जयिन्यां श्रमणसङ्घ एकीकृत्य द्वितीया वाचना कारिता । अस्याः समयो वीरनिर्वाणवत्सरः—२४५ तो २६१ पर्यन्तोऽभूदिति विभिन्नैः प्रमाणैर्ज्ञातुं शक्यते । अस्या वाचनाया उल्लेखः **श्रीहिमवन्तस्थविरावलीग्रन्थे** विद्यते । किञ्चास्या वाचनाया **'आगमसंरक्षण-वाचने'**त्यभिधानमासीदित्यप्यनुमीयते ।

तृतीयाऽऽगमवाचना—इयं वाचना महामेघवाहनखारवेलस्य प्रार्थनया पूज्याचार्यसुस्थितसूरेस्तथा पूज्याचार्य-सुप्रतिबद्धसूरेरध्यक्षतायां शत्रुञ्जयावतार-तीर्थस्वरूपे कुमरगिरिस्थले बृहद्श्रमणसङ्घसम्मेलनं संयोज्य सम्पादिता । अस्यां वाचनायामेकादशाङ्गानां दशपूर्वाणां च पाठा व्यवस्थापिताः । आचार्यश्रीबलिस्सहसूरिभिरस्या वाचनायाः प्रसङ्गेन 'विद्याप्रवाद' पूर्वतोऽङ्गविद्यादिशास्त्राणमुद्धारः कृतः । अस्या उल्लेखोऽपि प्राचीने हिमवन्तगिरिस्थविराव-लीग्रन्थे विद्यते । इयं वाचना वीरनिर्वाणसंवत्सर ३०० तो ३३० वत्सराणां मध्येऽभूदित्यनुमीयते ।

तुरीयाऽऽगमवाचना—यदा भूयोऽपि दुष्कालप्रवर्तनमभूत् तदा वाचनाचार्यरूपेण विख्याताः श्रीनन्दिसूरयो युगप्रधानाः श्रीआर्यरक्षितसूरयो गणाचार्याः श्रीवज्रसेनसूरयश्च प्रसिद्धा आसन् । एतैः समयस्य दुरवस्थां विलोक्या-गमानां सुरक्षायै प्रभावकाचार्याणां सम्मतिपूर्वकं प्रत्येकं सूत्रस्य मुख्यार्थं प्रकरणाश्रयेणावलम्ब्यान्यार्थांश्च गौणीकृत्य समस्तस्य जिनागमवाङ्मयस्य स्वातन्त्र्येण वर्गीकरणं विहितम् । तत्रानुयोगचतुष्टयमित्थमासीत्—

१—**द्रव्यानुयोगः** (दृष्टिवादः) द्वादशतममङ्गम् ।
२—**चरणकरणानुयोगः** (एकादशाङ्गानि, छेदसूत्राणि, महाकल्पोपाङ्गानि मूलसूत्राणि च ।
३—**गणितानुयोगः**—सूर्यप्रज्ञप्ति-चन्द्रप्रज्ञप्त्यादयः ।
४—**धर्मकथानुयोगः**—ऋषिभाषितोत्तराध्ययनादयः ।

एवमाचार्यार्यरक्षितसूरिणा चतुर्णामनुयोगानां व्यवस्थापनं विधायागमाश्चिरञ्जीविनो विहिताः । एषा वाचना वीरनिर्वाण सं०५९२ तमस्य निकटे दशपुर (मन्दसौर) नगरे सम्पन्ना ।

पञ्चम्यागमवाचना—वीरनिर्वाण सं०८३० तो ८४० वत्सरस्य निकटे पूज्याचार्यश्रीस्कन्दिलसूरय उत्तराप-थस्थान् मुनीन् **मथुरायां** तथा नागेन्द्रवंशीय-परमप्रभावकश्रीहिमवन्तक्षमाश्रमण-शिष्य-श्रीनागार्जुनसूरयश्च दक्षिणापथ-स्थान् मुनीन् **बलभीनगर्यामागमानां** सङ्कलनायैकीकृतवन्तः । एतस्या अपि कारणे तदानीन्तनी राज्यक्रान्तिस्तथा द्वादश-वर्षा त्मको भीषणो दुष्काल आस्ताम् । इयं वाचनोभाभ्यामाचार्याभ्यामुभयोः स्थानयोः सम्पादिता । इमे इदमपि सूचयतो यत्तदानीन्तनः कालोऽतीव सङ्कटपूर्णं आसीत् । केचनाचार्या एवमपि मानयन्ति यदस्यामेव वाचनायां लौकिकीं स्थितिं जनानामल्पस्मृतित्वञ्चावधार्याचार्यैरागमानां पुस्तकरूपेण सङ्कलनमपि स्वीकृतमभूदिति ।

षष्ठ्यागमवाचना—इयं वाचना वाचकवंशस्य वाचनाचार्यश्रीस्कन्दिलसूरिसम्पादितायाः माथुरीवाचनाया उत्तराधिकारिणाऽऽचार्य-श्रीदेवर्द्धिगणिक्षमाश्रमणेन तथा श्रीनागार्जुनसूरिसम्पादितायाः वालभीवाचनाया-उत्तराधि-कारिणाऽऽचार्यश्रीकालकसूरिणा संयुज्य वलभीपुर्यां सौराष्ट्रे सम्पादिता । अस्यां वाचनायां चतुरशीत्यागमानां सुव्य-वस्थितं सङ्कलनं ताडपत्रेपु साधुभिरालेखनं चाभूत् । अस्मिन्नेव कालेऽन्येषां महत्त्वपूर्णग्रन्थानामपि पुस्तकरूपेणालिख्य

सङ्कलनमभूत् किञ्चास्यामेव वाचनायां माथुरी-वलभी-वाचनयोः सम्पन्नानां पाठभेदानामपि व्यवस्थापनं गीतार्थानां सूचनानुसारमक्रियत । अस्याः समयो वीरनिर्वाणसंवत्सर-९८० तम आसीत् ।

एवमेताः षड्वाचना एवागमानामद्यावधि संरक्षणे प्रवर्धने च सहायिका अभवन् । अद्याप्यासां वाचनानामनुसारं विद्वांसो गणिवरा वाचनां कुर्वन्ति । आगमानां व्यवस्थितरूपेण प्रकाशने नैके प्रयत्नाः संस्थाभिराचार्यैश्च क्रियन्ते अस्यामेव शत्यामुत्पन्नेनागमोद्धारक-श्रीमत्सागरानन्दसूरिवरेण ताम्रपत्रेषु शिलापट्टकेषु चागमानां लेखनं कारयित्वा **'आगम मिन्दिराणि'** निर्मापितानि । पत्राकारेण च प्रकाश्यागममञ्जूषासु तेषां संग्रहोऽपि कारितः । एवमेव 'श्रीजैनश्वेताम्बरतेरापन्थमहासभा'-माध्यमेन तत्सम्प्रदायाचार्यैः श्रीतुलसीगणिवरैरपि विशिष्य स्वशिष्याणां सहयोगेन विशिष्टसम्पादनपूर्वकमागमानां प्रकाशनं विहितम् ।

इत्थं 'कस्यापि धर्मस्य सम्प्रदायस्य ये मौलिका आधार-ग्रन्था भवन्ति त एव तस्य स्वतन्त्रास्तित्वस्याधारा भवन्ति' इति दृष्ट्या वर्तमानकाले प्रवर्तितानां सर्वेषामपि जैनसम्प्रदायानामाधारभूता ग्रन्था **आगमाः** सन्ति । साम्प्रतं जैनसम्प्रदायनाम्ना दिगम्बरसम्प्रदायः श्वेताम्बरसम्प्रदायश्चेति द्वौ विभागौ मुख्यतया वर्तेते । स्त्रीमुक्तिः सर्वज्ञमुक्तिश्च, निर्वस्त्र-मुनित्वं सवस्त्रमुनित्वं चेत्यादिमन्तव्यैः सहैवागमानां विलुप्तत्वमविलुप्तञ्चाधृत्य सम्प्रदायभेदाः प्रवृत्ताः सन्ति । दिगम्बरेषु पुष्पपूजाऽचित्त द्रव्यपूजादिमन्तव्येषु **विंशति-पन्थ-त्रयोदशपन्थ** विभागौ सुस्थितौ स्तः । श्वेताम्बरेषु मूर्तिपूजकाः स्थानकवसिनस्तेरापन्थनामकास्त्रयः प्रमुखाः सम्प्रदाया विद्यन्ते । मूर्तिपूजाका मूर्तिपूजयां विश्वसन्ति परं शिष्टौ द्वौ सम्प्रदायौ तत्र न विश्वसितः । दयादानमिथ्यात्वक्रिया-स्थानकपरम्परादिवार्ता आधृत्य स्थानकवासिसु तेरापन्थिषु मतभेदो विद्यते । तेरापन्थस्यायमेव मतभेदः प्रायेणान्यैर्जैनसम्प्रदायैः सहापि वर्तते ।

तथापि सर्वमान्येषु सिद्धान्तेषु भगवतो महावीरस्य वचनेषु सर्वेऽपि समानरूपेण श्रद्धानाः स्वात्मनो लोकानां च हितायानवरतं सकलोऽपि सङ्घः सुसंयत एवास्ति तदिदमवश्यं गौरवाय ।

पतित-पावनी देशना-धारा

आगम-महासागरस्य समवगाहनेन सम्मथनेन च श्रीमतो महावीरस्य वचनामृतं सम्प्राप्य तदीयया पतित-पावन्या निर्मल-धारया सकलमपि प्राणजगद् जीवयितुं पूर्वाचार्या भूरि श्रमं विहितवन्तः । जगतो जीवनस्य परितापप्रशान्तये भगवता 'अकारत्रय्या' देशनाः प्रदत्ता आसन् यासु **'अहिंसा-अनेकान्त-अपरिग्रहाः'** क्रमशोऽहिंसा मनस्तापमनेकान्तो बुद्धेर्जाड्यमपरिग्रहश्च राष्ट्रस्य विषमत्वं परिहर्तुं सर्वथा सुशकाः सन्ति । इयमेव त्रयी गङ्गा-यमुना सरस्वतीरूपत्रिवेणीति सुनिश्चितम् । अत एवोक्तम्—

> **आर्तत्राणकरी सुधाब्धि-लहरी कारुण्यपूर्णेश्वरी,**
> **संसारार्णव-सङ्कटे प्रपततां ताराय चैकातरी ।**
> **सर्वस्वान्तचरी सुपुण्यनगरी सत्तत्त्वचिन्तादरी,**
> **लोकानामभयाय भाति भुवने श्रीवीरवाणी झरी ।।**[1]

१—डॉ० रुद्रदेवत्रिपठिनः पद्यमिदं-"श्रीमहावीर-वचनामृत' ग्रन्थे प्रकाशितम् ।

(१) अहिंसा

अस्यास्त्रय्याः प्रथमं तत्त्वमस्त्यहिंसा। कस्यापि प्राणिनो हिंसाया निषेध एवास्या बीजम्। 'नाइवाइज्जः किंचण' (आ० श्रु० १, अ० २, उ० ४) इत्युक्त्या भगवता प्रतिपादितं यत्—

सव्वे पाणा पियाउवा सुहसाया दुक्खपडिकूला अप्पियवहा पियजीविणो, जीविउकामा सव्वेसिं जीवियं पियं। एस मग्गो आरिएहिं पवेइये, जहेत्थ कुसले नोवलिपिज्जासि॥ (तत्रैव० ३-२) इति।

एतदनुसारं सर्वेषां प्राणिनामायुष्यं प्रियं भवति। सुखमनुकूलं दुःखं प्रतिकूलं च भवतः। अत एव हिंसां कोऽपि न वाञ्छति। सर्वेऽपि जीवितुकामाः सन्ति। सर्वेषां जीवनं प्रियमस्ति। एषोऽहिंसामार्ग आर्यैः प्रोक्तस्तस्मात् कुशलो नरः कदापि हिंसातो नैव लिम्पेत्। जिनैर्निर्दिष्टाया अहिंसायाः सारं तु रागादीनामनुत्पाद एवास्ति। यथा हि—

रागादीणमणुप्पाओ अहिंसकत्तं त्ति देसियं समये।
तेसिं चे उपपत्ती हिंसेत्ति जिणेहि णिद्दिट्ठा॥

अन्यच्च—

अज्झवसिएण बंधो, सत्ते मारेज्ज माथ मारेज्ज।
एसो बंधसमासो, जीवाणं णिच्छय-मरणस्स॥
हिंसादो अविरमणं, वहपरिणामो य होइ हिंसा हु।
तम्हा पमत्तजोगे पाणव्ववरोवणो णिच्चं॥
णाणीकम्मस्सं खयत्थमुट्ठिदो णोट्ठिदो य हिंसाए।
अददि असढं अहिंसत्थं, अप्पमत्तो अवधगो सो॥

इत्यादि गाथाभिरहिंसाया विषये सूक्ष्मनिर्देशा अपि दत्ताः। न केवलं हिंसनमेवापि तु हिंसाया अध्यवसाय एव कर्म्मबन्धस्य कारणं भवति। प्रमाद एव नित्यहिंसाऽस्ति। अत एव योऽप्रमत्तोऽस्ति स एव मुनिरहिंसकः। सूयगडागंसूत्रेऽप्युक्तम्—

संबुज्झमाणे उ नरे मइमं, पावाउ अप्पाण निवट्टएज्जा।
हिंसप्पसूयाइं दुहाइं मत्ता, वेरानुबंधीणि महब्भयाणि॥

अर्थात्—दुःखानि हिंसायाः समुत्पन्नानि। एषैव वैरस्य वर्द्धयित्री महती भयङ्करी च विद्यते। एवं ज्ञात्वा मतिमान् नर आत्मानं हिंसायाः संरक्षेत्। तत्रैव षड्त्रिंशत्यां गाथायामुक्तमस्ति यद् यथा जीवनायाधारस्थानं भूमिरस्ति तथैव भूतानां भविष्यतां च तीर्थङ्कराणामाधारस्थानं 'शान्तिः=अहिंसा' विद्यते। तीर्थङ्करा इयदुच्चं पदमहिंसायाः पालनादेवालभन्त इति—

जे य बुद्धा अतिक्कंता, जे य बुद्धा अणागया ।
संति तेसिं पइट्ठाणं, भूयाणं जगई जहा ।।

भगवता महावीरेण सर्वेष्वपि धर्मस्थानेषु प्रथमं स्थानमहिंसाया एव प्रदत्तं तत्रापि सर्वैः प्राणिभिः सह संयमपूर्वको व्यवहार एव सर्वोत्तम-प्रकारिकाऽहिंसाऽस्तीत्यपि प्रतिपादितम् —

तत्थिमं पढमं ठाणं महावीरेण देसियं ।
अहिंसा निउणा दिट्ठा, सव्वभूयेसु संजमो ।।

(दश० अ० ६, गा० ६,)

'अहिंसा परमो धर्म' इत्याघोषः सर्वेषु धर्मेषु प्रधानरूपेण स्वीकृतः । अहिंसां विना तपःसिद्धिः सर्वथा दुरापा भवति । अतः सर्वैरपि सावधानतयाऽहिंसाव्रतं परिपालनीयमिति सिद्ध-सिद्धान्तः ।

(२) अनेकान्तः

द्वितीयं तत्त्वमिद'मनेकान्त'नाम्ना व्यपदिश्यते । अहिंसायाः पालनमनेकान्तदृष्ट्या विनाऽसम्भवम् । यतो हि जैनदृष्ट्या हिंसां न कुर्वन्नपि मानवो हिंसको भवितुं शक्नोति तथा हिंसां कुर्वन्नपि हिंसको न भवति । मत्स्यमारण-भावनया जले जालं विस्तीर्य स्थितो जनो मत्स्यस्य जालागमनं विनाऽपि हिंसकोऽस्ति, यतो हि तदीयो भावो मत्स्य-मारणस्यास्ति किञ्च क्षेत्रं कर्षन् कृषकः कर्षणकाले क्षुद्रान् जीवान् हिंसन्नपि स नास्ति हिंसको यतो हि तदीयो भावोऽन्नोत्पादनस्यास्ति, जीवानां हिंसनस्य नैव । अतो जैनधर्मे हिंसाऽहिंसे कर्तुर्भावेऽवलम्बिते स्तः क्रियासु नैव । यदि बाह्यतो भवित्री हिंसैव हिंसा मन्येत तदा तु कोऽपि जनोऽहिंसको भवितुमेव नार्हति । यतो जगति सर्वत्र जीवाः सन्ति तथा तेषां घाता अपि भवन्त्येव । अतो यः सावधानता-पूर्वकं प्रवर्तते तस्य भावेऽहिंसाऽस्ति तस्मात् सोऽहिंसकोऽप्यस्ति । परं यः स्वकीयासु प्रवृत्तिषु नास्ति सावधानस्तस्य भावे हिंसा विद्यते तस्मात् स हिंसामकुर्वन्नपि नास्त्यहिंसकः ।' इत्यादिकं सकलं विश्लेषणमनेकान्तदृष्ट्या विना नास्ति सम्भवम् । अतो विचार-जगत्यहिंसाया मूर्तरूपमेवानेकान्त इति निश्चितम् ।

अस्यानेकान्तस्य स्वरूप-प्रतिज्ञानाय भगवता महावीरेण वस्तुनः स्वरूप-ज्ञानाय समादिष्टम् । यतो वस्तुनः स्वरूपज्ञानं विना ज्ञेयस्य ग्रहणं दुःशकं हेयोपादेययोः प्रवृत्तिर्ज्ञेयस्वरूपस्य ज्ञानादेव भवति । अहिंसा-सत्यास्तेय-ब्रह्मच-र्यापरिग्रहाणामाचरणमपि ज्ञेयस्य ज्ञानाभावेऽसम्भवमेव । अतस्तीर्थङ्करपरमात्मना प्रोक्तम्—"**उप्पन्नेइ वा विगमेइ वा धुवेइ वा ।**" अर्थात् वस्तु प्रतिक्षणमुत्पद्यते विनश्यति ध्रुवं च तिष्ठतीति । इमास्तिस्रोऽप्यवस्था यस्मिन् भवन्ति तदेव ज्ञेयमस्ति वस्त्वस्ति पदार्थोऽस्ति । एतासां तिसृणामपि परस्परमविनाभावोऽस्ति—

ण भवो भंगविहीणो भंगो वा णत्थि संभवविहीणो ।
उप्पादो वि य भंगो ण विणा धोव्वेण अत्थेण ।।

(प्रवचनसार० गाथा० १००)

गाथामिमां स्पष्टयता श्रीमताऽमृतचन्द्राचार्येणापि टीकायामुक्तम् "न खलु सर्गः संहारो वा सर्गमन्तरेण, न सृष्टिसंहारौ स्थितिमन्तरेण न स्थितिः सर्गसंहारमन्तरेण। य एव हि सर्गः सः एव संहारः, य एव संहारः स एव सर्गः, यावेव सर्गसंहारौ सैव स्थितिः यैव स्थितिस्तावेव सर्गसंहारावति। तथा हि—य एव कुम्भस्य सर्गः स एव मृत्पिण्डस्य संहारः, भावस्य भावान्तराभावस्वभावेनावभासनात्। य एव च मृत्पिण्डस्य संहारः स एव कुम्भस्य सर्गः। अभावस्य भावान्तरस्वभावेनावभासनात्। यौ च कुम्भपिण्डयोः सर्गसंहारौ सैव मृत्तिकायाः स्थितिः, व्यतिरेकमुखेनैवान्वयस्य प्रकाशनात्। यैव च मृत्तिकायाः स्थितिस्तावेव कुम्भपिण्डयोः सर्गसंहारौ, व्यतिरेकाणामन्वयानतिक्रमणात्।"

एवं त्रिलक्षणात्मकस्य पदार्थस्यैकान्तरूपनित्यत्वानित्यत्वे समीक्षिते। महावीरेणोद्घोषितं यत् किमपि वस्तु नास्ति सर्वथा नित्यं क्षणिकं वा। अस्यास्त्रय्यात्मकतयाः सिद्धये चोदाहरणमिदं प्रस्थापितम्—

घटमौलिसुवर्णार्थी नाशोत्पादस्थितिष्वयम्।
शोकप्रमोदमाध्यस्थ्यं जनो याति सहेतुकम्॥

—(आप्तमीमांसा पद्यं ५९)

अयम्भावो यत्—'एकस्य राज्ञ एकः पुत्रः एका च कन्या ऽभवताम्। राज्ञः समीपे स्वर्णकलशमभूत्। कन्या स्वर्णकलशमेवावाञ्छत् परं पुत्रस्तं विभज्य मुकुटं निर्मातुमैच्छत्। राजा पुत्रस्य हठं पूरयितुं कलशं त्रोटयित्वा मुकुटं निर्मापयति। तदा कलशनाशात् कन्या दुःखिता भवति, मुकुटोत्पादात् पुत्रः प्रसीदति परं राजा तु स्वर्णेच्छुरस्ति यः कलशनाशे मुकुटनिर्माणे च सत्यपि मध्यस्थ एव तिष्ठति। न स शोचति न च प्रसीदति। अतो वस्तु त्रयात्मकमस्तीति।" एवमेव—

पयोव्रतो न दध्यस्ति, न पयोऽस्ति दधिव्रतः।
अगोरसव्रतो नोभे तस्मात्तत्त्वं त्रयात्मकम्॥६०॥ (तत्रैव)

एवं वस्तुनोऽनन्तधर्मात्मकता-साधनपुरस्सरमेव लोकस्यानेकान्तसिद्धान्तं प्रति दृष्टिराकृष्टा। अत एवोक्तम्—

जेण विणा लोगस्स वि, ववहारो सव्वहा न निव्वहइ।
तस्स भुवणेक्कगुरुणो, णमो अणेगंतवायस्स॥
(येन विना लोकस्यापि व्यवहारः सर्वथा न निर्वहति।
तस्मै भुवनैकगुरवे नमोऽनेकान्तवादाय॥) इति

(३) अपरिग्रहः

तृतीयं तत्त्वमिदमपरिग्रहनाम्नाऽऽम्नातमस्ति। इन्द्रियाणां वशीकारायास्य पालनमत्यावश्यकम्। ऐन्द्रिय-दास्य-निबद्धा जना जगति स्वीयं परकीयं वा कल्याणं साधयितुं कथमपि न क्षमन्ते। अत एवोच्यते यत्—

गंथच्चाओ इंदिय-णिवारणे अंकुसो व हत्थिस्स ।
णयरस्स खाइया वि य, इंदियगुत्ती असंगत्तं ।।

परिग्रहस्य त्यागः किल हस्तिनो वशीकारायाङ्कुश इवावश्यकः । यथा नगरस्य रक्षार्थं परिखा भवति तथैवेन्द्रियाणां वशीकारायापरिग्रहो नितान्तमुपादेयः । परिग्रहत्यागिनः सुखं चक्रवर्तिनोऽप्यतिरिच्यते । जीवः परिग्रह-निमित्तमेव हिंसामपि कुरुतेऽतोऽहिंसायाः पालनार्थमपि परिग्रहत्याग एवैकं निदानम् । परिग्रहस्य द्वौ भेदौ भवतः— (१) वाह्य (२) आभ्यन्तरश्च । वाह्यस्य परिग्रहस्य दश भेदा भवन्ति–(१) क्षेत्राणि, (२) गृहाः (३) धनं धान्यं च, (४) वस्त्राणि, (५) भाण्डादयः, (६) दासा दास्यश्च, (७) पशवः (८) यानानि, (९) शय्याः, (१०) आसनं च । आभ्यन्तरपरिग्रहस्य चतुर्दश प्रकाराः सन्ति—(१) मिथ्यात्वं, (२) स्त्रीवेदः, (३) पुरुषवेदः (४) नपुंसकवेदः (५)-हास्यं, (६) रतिः, (७) अरतिः, (८) शोकः, (९) भयं, (१०) जुगुप्सा, (११) क्रोधः, (१२) मानः, (१३) माया, (१४) लोभश्च ।

एतेषां परिग्रहाणां ममत्वमेव परिग्रह इत्यप्युक्तं भगवता महावीरेण—

न सो परिग्गहो वुत्तो, नायपुत्तेण ताइणा ।
मुच्छा परिग्गहो वुत्तो, इइ वुत्तं महेसिणा ।।

(दशवैकालिकसूत्रम्' अ० ६, गा० २०)

अर्थात्—ज्ञातपुत्रेण महर्षिणा महावीरेणात्र वस्त्रादयः परिग्रहाः नोक्ता अपि तु परिग्राह्य-वस्तुनः प्रति यन्ममत्वं मनसि जिघृक्षा स एव परिग्रह इति । प्रान्ते तत्रैव प्रोक्तं यत्—

विडमुब्भेइमं लोणं, तिल्लं सप्पिं च फाणियं ।
न ते सन्निहिमिच्छंति, नायपुत्त-वओरया ।।

अस्यायमाशयः— ये भगवतो महावीरस्य वचनेऽनुरक्ताः सन्ति ते नवनीततैल-घृत-गुडादीनां संग्रहं न कुर्वन्तीति ।

स्याद्वादावतारस्तन्माहात्म्यं च

वस्तुतः सत्यज्ञानादपि कठिनं सत्यस्य यथार्थतः प्रकाशनमस्ति । यतो हि ज्ञानं सत्यं ज्ञातुं शक्नोति परं शब्दस्तद् यथावत् प्रकाशयितुं न शक्नोति । एतस्मादेव कारणाद् भगवता महावीरेणानेकान्तवादेन सह स्याद्वादस्य नयवादस्य चावतारो दार्शनिकक्षेत्रे प्रस्थापितः । परिणामतो वैचारिके क्षेत्रे केनाऽपि सहान्यायो न भवेत् । स्याद्वादस्य वैशिष्ट्यमभिलक्ष्य श्रीसमन्तभद्राचार्येण 'युक्त्यनुशासने' निगदितम्—

दयादमत्यागसमाधिनिष्ठं, नयप्रमाणैः प्रकृताञ्जसार्थम् ।
अधृष्यमन्यैर्निखिलप्रवादिर्भिजिन ! त्वदीयं मतमद्वितीयम् ।।

अस्य मतस्य स्याद्वादनयस्य प्रवृत्त्याऽन्ये सर्वेऽपि नया विनश्यन्तीति प्रतिपादयन् श्रीयशोविजय उपाध्यायोऽपि 'वीरस्तवे' कथयति—

स्याद्वादनाम्नि तव दिग्विजयप्रवृत्ते,
सेनापतौ जिनपते! नय-सार्वभौम ।

नश्यन्ति तर्कनिवहाः किमु नाम नेष्टा-
पत्तिप्रभूतबलपत्तिपदप्रचारात् ॥६॥इति[1]

तथोत्तरकालिका भूयांस आचार्या भगवतो वचांसि परिशील्य दर्शन-साहित्यादिदिक्षु नानाविधानि शास्त्राणि विरच्य लोककल्याणाय किमप्यपूर्वममृतं पुरस्कृतवन्तस्तदेवाद्य पायं पायं जनाः कृतार्थतामनुभवन्ति वाञ्छन्ति च—

णाणं सरणं मे, दंसणं च सरणं चरिय-सरणं च ।
तव संजमं च सरणं, भगवं सरणं महावीरो ॥ इति ।

उपसंहारः

प्रान्ते महाकवि'श्रीधनपाल'विरचितं 'संस्कृत-प्राकृत-भाषामयं श्रीवीरस्तवं' भगवतो महावीरस्य चरित्र-सारभूतं प्रस्तूय चरितामृतमिदमुपसंह्रियते—

सरभस-नृत्यत्सुर-युवति-कुचतट-त्रुटित-हारतारकितम् ।
जायं सिद्धत्थ-नरिंद-मंदिरं जस्स जम्मम्मि ॥१॥

बुद्ध्वाऽवधिना निज-जन्ममज्जने हृदयभावमशनिभृतः ।
लीलाइ चलणकोडीइ चालिओ जेण सुरसेलो ॥२॥

येन च बाल्ये विबुधो विवर्द्धमानः सविभ्रमं नभसि ।
हणिऊण मुट्ठिणा वामणीकओ कुलिस-कठिणेणं ॥३॥

सुरपतिपुरतो विवृतिं वितन्वता वितत-वाङ्मयं येन ।
जणियं जयस्स विज्जोवएससमए महच्छरियं ॥४॥

माता-पित्रो प्रेमानुबन्धमधिकं विबुध्य यः स्थितवान् ।
दिव्वालंकार-फुरंत-विग्गहो चत्तसंगो वि ॥५॥

येन परित्यज्य जरत्तृणमिव राज्यं समं सुहृत्स्वजनैः ।
वूढो दढनियमभरो लीलाइ गिरिंदरुंदयरो ॥६॥

सङ्गमकसुराधिप-विक्षिप्त-दीप्त-दम्भोलि-भेदसम्भ्रान्तः ।
चमरो चलणुप्पलमूलमागओ रक्खिओ जेण ॥७॥

येन घनकर्मपटलं प्रकटतपो वह्निना विनिर्दह्य ।
पलय-रवि-तेय पायडमुप्पाडितमक्खयं नाणं ॥८॥

---

१. एतद्विषये विशेषज्ञानाय द्रष्टव्या श्रीमद्यशोविजयोपाध्यायरचिता 'स्तोत्रावली' । सं० डॉ० रुद्रदेवत्रिपाठी, प्रका० यशोभारती जैन प्रकाशन समितिः, वम्बई ।

यश्च सुचिरं पृथिव्यां मिथ्यात्वान्धं विबोध्य भव्यजनम् ।
ठाणं जम्मणजरमरणरोग-परिवज्जियं पत्तो ॥९॥

तं नमत नम्रशतमखमणिमुकुट-विटङ्क-घृष्ट-चरणयुगम् ।
भुवणस्स वि बंधणपालणक्खमं वद्धमाण-जिणं ॥१०॥

इति डॉ० रुद्रदेवत्रिपाठि-विरचितं

श्रीमहावीर-चरितामृतम्

समाप्तम् ।

इति 'दशपुर'-वासी श्रीरमाकान्तसूनु-
र्व्यरचयदिह दिल्ल्यां 'रुद्रदेवत्रिपाठी ।
शर-नयनशताब्दस्मारकं निर्वृतेर्वै,
चरितममृत-तुल्यं 'श्रीमहावीर'-शम्भोः ॥१॥

इत्येतद् श्रीमहावीर-चरितामृतमुत्तमम् ।
मुदेऽस्तु पठतां नित्यं, महावीर-प्रसादतः ॥२॥

—०—

द्वितीयो भागः

आर्हत-धर्म-सुषमा

विश्वधर्मः

—उपाध्यायः श्रीविद्यानन्दमुनिः

धर्मशब्दो मानवजीवनस्य सर्वात्मिकायाः पवित्रताया उपलक्षणम् । अस्मिन् लोके परममभ्युदयं कल्याणं च धर्ममार्गेण चरता पुंसाऽऽसाद्यते । धर्मः खलु स्वाभाविकी वृत्तिर्मानवानाम् । अतएव मुनिमहर्षिभिः 'वस्तुस्वभावो धर्मः' इत्युदीरितम् । जलस्य शैत्यम् पावकस्यौष्ण्यं वायोर्गतिमत्त्वमाकाशस्य च अवगाहनत्वमेषां नैसर्गिको धर्मः । विध्याते वह्नौ यथा पावकगुणो नास्ति तथैव धर्महीने मानवे मानवत्वं न विद्यते । सर्वेऽपि पदार्था धर्ममेवाश्रित्य जीवन्ति, वर्धन्ते रोचन्ते च । यदि रसालफले माधुर्यं निम्बे च कटुत्वं न भवेत्तदा को नामानयोर्भेदं परिचिनुयात् ? रात्रिं दिनात्तम एव विभनक्ति । सूर्यादिन्दुं शीतरश्मय एव पृथक् कुर्वन्ति । त एते धर्माः पदार्थानाम् । व्यक्तयः पदार्थाश्च स्वीयैरेभिर्गुणैरेव परिचीयन्ते ।

इसी प्रकार आचार्य माणिक्यनंदि का परीक्षामुखसूत्र, प्रभाचन्द्र का प्रमेयकमलमार्तण्ड, शुभचन्द्र का ज्ञानार्णव, आचार्यसुभाषितरत्नसंदोह, धर्मपरीक्षा, पंचसंग्रह, उपासकाचार आदि ग्रन्थ, आचार्य अमृतचन्द्र का समयसार टीका ग्रन्थ, पुरुषार्थसिद्ध्युपाय, तत्त्वार्थसार, प्रवचनसारटीका, एवं महापण्डित आशाधरविरचित सागारधर्मामृत, अनगारधर्मामृत, जिनयज्ञकल्प, प्रमेयरत्नाकर, भरतेश्वराभ्युदय, ज्ञानदीपिका, राजीमती विप्रलंभ, अध्यात्मरहस्य, क्रियाकलाप, त्रिषष्टिस्मृति नित्यमहोद्योत आदि ग्रन्थों के अलावा अनेक टीका ग्रन्थों की रचना भी की है। इसी प्रकार आचार्य वीरनन्दि का चन्द्रप्रभचरित्र भी उल्लेखनीय ग्रन्थ है।

इस प्रकार उपर्युक्त आचार्यों ने श्रुति व स्मृति को ध्यान में रखने पर अपनी गुरु-परम्परा के आधार से प्राप्त ज्ञान का प्रमाणिकता से उपयोग कर ग्रन्थ निबद्ध किये। उनके ग्रन्थों में परस्पर विरोधकथन, स्वकपोलकल्पना-

निर्मितकथन, स्वार्थप्रेरित कथन, कलुपकथन, संक्लेश क्षोभ निर्मापक कथन आदि न होने में उनमें पूर्णतया प्रामाण्य है। उसका सम्बन्ध सर्वज्ञ तीर्थंकर के कथन से होने से एवं उसी का अंशरूप ग्रहण होने से उसमें अप्रामाणिकता का कोई अंश नहीं है। अतः प्रमाणस्वरूप है।

इसी प्रकार संस्कृत साहित्य के समृद्ध करने के लिए जिस प्रकार जैन आचार्यों ने प्रयत्न किया है, उसी प्रकार मराठी, तमिल, तेलुगु व कन्नड साहित्य को भी समृद्ध करने का जैनाचार्य व जैन-कवियों ने प्रयत्न किया है। यह बात उक्त भाषा के साहित्यों का सूक्ष्मतया अवलोकन करने से ज्ञात होती है। किंवहुना, उन भाषाओं के साहित्य के सृजन का प्रारम्भ ही जैन साहित्यकारों ने किया, यह कहें तो अतिशयोक्ति बिल्कुल हो नहीं सकती है।

कर्नाटक साहित्य की परम्परा

कर्नाटक साहित्य की प्राचीन परम्परा है। अनेक ऐतिहासिक विद्वान् कहते हैं कि भगवान् वृषभदेव के द्वारा पुत्री ब्राह्मी के हथेली पर लिखित ब्राह्मी लिपि कर्नाटक लिपिका प्राचीन रूप है। इसलिए इस साहित्य को बहुत प्राचीन परम्परा प्राप्त है

महाकवि पंप—इस महाकवि के द्वारा इस साहित्य का विशिष्ट विकास हुआ है या प्रारम्भ का महत्त्वपूर्ण साहित्य इसी का प्राप्त होता है। इसके पूर्वज जैनेतर ब्राह्मण थे, अभिराम देव, जो पंप महाकवि का पिता था, ने जैनधर्म की दीक्षा ली थी। पंप ने एक लौकिक और दूसरा धार्मिक, ऐसे दो काव्यों की रचना की। लौकिक काव्य 'विक्रमार्जुन विजय' था और धार्मिककाव्य था आदिपुराण। भगज्जिनसेनाचार्य के पूर्वपुराण का आधार लेकर पंप ने इस काव्य की रचना की थी।

कर्नाटक साहित्य का यह आद्यकवि कहलाता है। अपने समय के शासक अरिकेसरी के प्रति इसकी अगाध श्रद्धा थी। कर्नाटक साहित्य में इसका साहित्य बेजोड़ कहलाता है। इसे कवितागुणार्णव, सुकविजन मनोमानसोत्तंस-हंस, संसार सारै-सरस्वतीमणिहार वगैरह उपाधियाँ प्राप्त थीं; इसकी महत्ता इसी से प्रकट है। यह महाकवि वि० स० के १०वें शतमान में हुआ है।

कवि पोन्न—करीव इसी के आस-पास पोन्न नामक महाकवि हुआ है। उसने शानिनाथपुराण, भुवनैक रामाभ्युदय, गत प्रत्यागतवाद और जिनाक्षरमाला—इस प्रकार चार काव्यों का रचना की। इनमें आदि व अन्तिम दो ग्रन्थ तो प्रकाशित हुए हैं, दो ग्रन्थ अभी अनुपलब्ध हैं। यह उभयभाषाकविचक्रवर्ती कहलाता था। इसके काव्य का अवलोकन करने से यह महान् प्रौढ़कवि था यह निस्संदेह सिद्ध हो जाता है। पोन्न के शान्तिनाथपुराण की प्रतियां उपलब्ध न होने से दामचिन्तामणि अतिमब्वे ने १००० प्रतिताड़ पत्र पर लिखवाकर वितरण किया, इससे कवि की महत्ता ज्ञात होती है।

कवि रन्न—इसी शतमान में रन्न नाम का कवि हुआ, इसने गदायुद्ध, व अजितपुराण की रचना की थी। यह भी उभयभाषा में निपुण होने के कारण उभयभाषाचक्रवर्ती कहलाता था। इसके काव्य का परिशीलन करने से यह महाकवि वस्तु-विवेचन के संबन्धी सूक्ष्मतलस्पर्शी ज्ञान का धनी था यह सिद्ध होता है।

कर्नाटक साहित्य में पंप, पोन्न व रन्न ये तीन कवि रत्नत्रय कहलाते हैं।

इसी परम्परा में यशोधर चरित्र के रचयिता जन्न काव्य के प्रणेता वीरमार्तण्ड चामुंडराय अनेक ग्रन्थों के रचयिता ज्योतिर्विद् श्रीधराचार्य, तत्त्वार्थसूत्र के टीकाकार दिवाकरनन्दी, पंपरामायण के रचयिता कविनागचन्द्र कवयित्री कंति, गणितज्ञ राजादित्य, गोवैद्यविशारद कीर्तिवर्मा, न्यायवेत्ता ब्रह्मशिव नेमिनाथ पुराणत्वकर्त्ता कर्ण-

कर्णपार्य, छंद व कोष के ज्ञाता नागवर्म, नेमिचन्द्र, अग्गव, बोप्पण, बंधुवर्म, गुणवर्म आदि कवियों को भी विस्मृत नहीं कर सकते हैं जिन्होंने अपनी कृतियों के द्वारा कर्नाटक साहित्य के क्षेत्र को समृद्ध किया है।

इसी प्रकार सांगत्ययुग के निर्माता महाकवि रत्नाकर का साहित्य भी उपेक्षणीय नहीं हैं। भरतेशवैभव आज भारत के गौरवग्रन्थों में है। करीव १० हजार श्लोक परिमित भोग-योग से परिप्लावित ग्रंथरत्न की रचना इस महाकवि ने सांगत्य छंद में की है। इसी प्रकार शतकत्रय, अध्यात्मगीत आदि अनेक काव्यों का निर्माण भी इन्होंने किया है। यह सांगत्ययुग का सृष्टिकर्ता कहलाता है। इसके बाद अनेक ग्रंथकर्त्ताओं ने इस छंद का मुक्त उपयोग किया है।

इस प्रकार परस्पर अविरोधरूप से महावीरशासन में विभिन्न भाषाओं के ग्रन्थकारों ने ग्रन्थरचना कर लोकहित का कार्य प्रशस्त किया है। भ० तीर्थंकर सर्वज्ञ वाणी का परम्परा से संबन्ध होने के कारण अर्वाचीन आचार्य एवं महाकवियों के द्वारा विरचित ग्रन्थों में प्रामाण्य है। इसलिए यह सत्य ही कहा है कि **'वक्तरि प्रामाण्या-दागमप्रामाण्यम्'** ।

श्रमण साहित्य में वर्णित विविध सम्प्रदाय

डॉ० भागचन्द्र जैन 'भास्कर'

प्राचीन साहित्य में साहित्यकार स्वपालित दर्शन को उपस्थित करने के साथ ही इतर दर्शनों का खण्डन किया करता था। श्रमण (जैन-बौद्ध) साहित्य में यह खण्डन-मण्डन-परम्परा भली-भाँति उपलब्ध होती है। यहाँ हम भगवान् महावीर और महात्मा बुद्धकालीन ऐसे ही सम्प्रदायों का उल्लेख कर रहे हैं, जिनकी परम्परा लगभग छिन्न-भिन्न हो चुकी है।

पालि साहित्य[1] में महात्मा बुद्ध के समकालीन छः तीर्थंकरों का उल्लेख आता है—पूरणकस्सप, मक्खलि गोसाल, अजितकेसकम्बलि, पकुध कच्चायन, सञ्जयवेलट्ठिपुत्त तथा निगण्ठनातपुत्त (महावीर)। इनके अतिरिक्त और भी छोटे-मोटे शास्ता थे जो अपने सिद्धान्तों को समाज में प्रचलित कर रहे थे। ब्रह्मजालसुत्त के ६२ दार्शनिक मत इस प्रसंग में उल्लेखनीय हैं। इन्हें वहाँ गंभीर और दुर्ज्ञेय कहा गया है।

१. आदि सम्बन्धी १८ मत (पुब्बान्तानुदिट्ठि अठारसहि वत्थूहि)

(i)	सस्सतवाद—	४	
(ii)	एकच्चसस्सतवाद—	४	
(iii)	अन्तानन्तवाद—	४	= १८
(iv)	अमराविक्खेपवाद—	४	
(v)	अधिच्चसमुप्पन्नवाद—	२	

२. अन्त सम्बन्धी ४४ मत (अपरन्तानुदिट्ठी चतुचत्तारी वत्थूहि)

१.	उद्धमाघातनिका सञ्ञीवादा—	१६	
२.	उद्धमाघातनिका असञ्ञीवादा—	८	
३.	उद्धमाघातनिका नेवसञ्ञीनासञ्ञीवादा—	८	४४ + १८ = ६२
४.	उच्छेदवाद—	७	
५.	दिट्ठधम्मनिब्बानवाद—	५	

इन बासठ मिथ्यादृष्टियों में आत्मा, लोक, पुनर्जन्म जैसे प्रश्नों पर विशेष रूप से विचार किया गया है। किसी निश्चित स्थितिज्ञान तक न पहुँचने पर अमराविक्खेपवाद, नेवसञ्ञीनासञ्ञीवाद, उच्छेदवाद आदि जैसे सिद्धान्तों की स्थापना की गई। प्राकृत साहित्य में संभवतः इन्हीं मतों को ३६३ भेदों में विभाजित किया गया है—क्रियावाद के १८०, अक्रियावाद के ८४, अज्ञानवाद के ६७ और विनयवाद के ३२। बारहवें अंग दृष्टिवाद में भी जैनेतर मतों का वर्णन रहा होगा। संभव है, इन मतों के मूलतः दो भेद रहे हैं—क्रियावाद और अक्रियावाद। तटस्थ वृत्ति ने इसके बाद अज्ञानवाद को और उसके उपरान्त विनयवाद को जन्म दिया होगा।

१. **क्रियावाद**—इस दर्शन के अनुसार जीव का अस्तित्व है और वह अपने पुण्य-पाप रूप कर्मों के फल का भोक्ता है। इन कर्मों की निर्जरा कर उसके मत में जीव निर्वाण प्राप्त कर लेता है। कहीं-कहीं क्रिया का अर्थ

---

१. दीघनिकाय, सामञ्ञफलसुत्त।

चरित्र भी किया गया है। तदनुसार व्यक्ति को क्रिया ही फलदायी होती है, ज्ञान नहीं। क्योंकि वह ज्ञान से संतुष्ट नही होता। अतः एकान्तरूप से जीवादि पदार्थों को स्वीकारनेवाला मत क्रियावाद है। उसके १८० भेद हैं। जीव, अजीव, बन्ध, आस्रव, संवर, निर्जरा, मोक्ष, पुण्य और पाप ये नौ पदार्थ स्वतः और परतः के भेद से दो प्रकार के हैं। वे नित्य और अनित्य भी रहते हैं। पुनः ये सभी भेद काल, यदृच्छा, नियति, स्वभाव, ईश्वर और आत्मा के भेद से ५ प्रकार के हैं। इस प्रकार ९×२×२×५=१८० भेद हुए।

क्रियावाद की दृष्टि में ज्ञान-रहित क्रिया से किसी भी कार्य की सिद्धि नहीं होती। इसलिए "पढ़मं नाणं तओ दया" कहा गया है[1]। 'अहं सु विज्जाचरण पमोक्खम्' का भी यही संदर्भ है।[2] इसी प्रसंग में सांख्य, वैशेषिक, नैयायिक एवं बौद्धों को क्रियावादी कहा गया है। जैनदर्शन भी क्रियावादी है। उसके अनुसार काल, स्वभाव, नियति, पुरुषार्थ, कर्म आदि समस्त पदार्थों को पृथक्-पृथक् मानना मिथ्या है। उनके सम्मिलित स्वरूप को ही यहाँ स्वीकार किया गया है।[3]

२. **अक्रियावाद**—क्रियावाद के विपरीत अक्रियावाद में आत्मा, पुण्य, पाप आदि कर्मों का कोई स्थान नहीं। लोकायतिक और बौद्धों को इस दृष्टि से अक्रियावादी कहा जा सकता है। पालि साहित्य में निगण्ठनातपुत्त को क्रियावादी कहा गया है जबकि बुद्ध ने स्वयं को क्रियावादी और अक्रियावादी दोनों माना है। क्रियावादी इसलिए कि वे जीवों को सत्कर्म करने के लिए प्रेरित करते हैं और अक्रियावादी इसलिए कि वे असत्कर्म को त्यागने का उपदेश देते हैं। सूत्रकृताङ्ग में भी बुद्ध को एक स्थान पर क्रियावादी और दूसरे स्थान पर अक्रियावादी कहा गया है। आत्मा के अस्तित्व को अस्वीकार करने के कारण उसे यहां सम्मिलित किया गया है। अन्यथा वह क्रियावादी ही है।

अक्रियावाद के ८४ भेद हैं। जीवादि सप्त पदार्थ और उनके स्व-पर के भेद से दो भेद हैं। वे सभी भेद पुनः काल, यदृच्छा आदि के भेद से छः प्रकार के हैं। इस प्रकार ७×२×६=८४ हुए।[4] आत्मा के अक्रिय होने पर अक्रियावाद में कृतनाश और अकृताभ्यागम दोष आयेंगे। समस्त वस्तु जगत् भी सर्व वस्तुस्वरूप हो जायगा।[5]

३. **अज्ञानवाद**—इसके अनुसार श्रमण ब्राह्मणों के मत परस्पर विरुद्ध हैं, अतः असत्य के अधिक निकट हैं। इसलिए अज्ञान को ही श्रेष्ठ माना जाना चाहिए। और फिर संसार में कोई अतिशयज्ञानी नहीं जिसे सर्वज्ञ कहा जा सके। ज्ञान ज्ञेय पदार्थ के पूर्ण स्वरूप को एक साथ जान भी नहीं सकता। अज्ञानता होने से चित्त-विशुद्धि अधिक बनी रह सकती है। अज्ञानवादी जिस अज्ञान को कल्याण का कारण मानते हैं, वह ६७ प्रकार का है—सत्, असत्, सदसत्, अवक्तव्य, असद् वक्तव्य, और सदसदवक्तव्य। इन प्रकारों से जीवादिक नौ पदार्थ नहीं जाने जा सकते। अजीवादि पदार्थों में भी प्रत्येक के सात विकल्प होते हैं। अतः ९×७=६३ मत हुए। इनमें चार भेद और मिलाये जाते हैं—(i,iii) भाव की उत्पत्ति सत्, असत्, सद-सद्, से होती है, यह कौन जानता है और उस जानने से फल भी क्या है।[6]

---

१. सूत्रकृतांग, निर्युक्ति १.१२.११९
२. वही, १.१२.११
३. वही, १.१.१२ : निर्युक्ति, १२१, वृत्ति पृ० २१०-१.
४. सूत्रकृतांग, १.१.१२. वृ० पृ० २०८.१; निर्युक्ति ११९-१२१; ६.२७. वृत्ति पृ० १५२.
५. वही, १.१२, नि०१२१, वृत्ति पृ० २१०.१.
६. वही, १.१२.२. की वृत्ति।

दीघनिकाय के अनुसार अज्ञानवाद का प्रस्थापक सञ्जयवेलट्ठिपुत्त है। वे हर दार्शनिक समस्या के प्रति अज्ञानता और अनिश्चितता व्यक्त करते हैं। शीलांक सञ्जय का नाम ही भूल गये। उन्होंने उपर्युक्त सिद्धान्त जिन आचार्यों से सम्बद्ध माने हैं वे शत-प्रतिशत सही नहीं लगते। उदाहरणार्थ उन्होंने मक्खलि गोसाल का सम्बन्ध अज्ञानवाद, नियतिवाद और विनयवाद से जोड़ा है जबकि सञ्जयवेलट्ठिपुत्त से अपरिचितता व्यक्त की है। वस्तुतः अज्ञातवाद संजयवेलट्ठिपुत्त का सिद्धान्त है और नियतिवाद मक्खलि गोसाल का। पालि साहित्य में इसे अधिक स्पष्ट किया गया है। भगवतीसूत्र में भी गोशालक को नियतिवाद का प्रवक्ता माना गया है। सूत्रकृतांग में अज्ञानवाद को पासवद्धा, मिच्छादिट्ठी, अणारिया जैसे विशेषणों से अभिहित किया है। भ० महावीर के धर्म को स्वीकारने वालों में सञ्जय का नाम आता है। संभव है, वे संजयवेलट्ठिपुत्त ही हों।

४. **विनयवाद**—विनयवादी विनय से ही मुक्ति मानते हैं। समस्त प्राणियों के प्रति वे आदरभाव व्यक्त करते हैं। किसी की निन्दा नहीं करते। विनयवाद के ३२ भेद हैं—देवता, राजा, यति, ज्ञाति, वृद्ध, अधम, माता और पिता, इन आठ व्यक्तियों का मन, वचन, काय और दान के द्वारा विनय करना अभीष्ट है। अतः ८×४=३२ भेद हुए। पालि साहित्य से पता चलता है कि यह बात लोकप्रिय रही होगी।[1] महात्मा बुद्ध भी स्वयं को 'वेनयिको समणो गोतम' कहते हैं। सूत्रकृतांग में वही विनय कल्याणकारी बताया है जो सम्यग्दर्शन से युक्त हो।

उपर्युक्त चारों मतों के पुरस्कर्त्ताओं के विषय में पर्याप्त मतभेद है। अकलंक[2] ने इस सन्दर्भ में कुछ नाम गिनाये हैं। उनके अनुसार कौत्कल, काणेविद्धि, कौशिक, हरिस्मश्रु, मांछपिक, रोमश, हारीत, मुण्ड, अश्वलायन आदि आचार्य क्रियावादी हैं। मरीचिकुमार, कपिल, उलूक, गार्ग्य, व्याघ्रभूमि, वाद्वलि, माठर, मौद्गलायन आदि आचार्य अक्रियावादी परम्परा के हैं। साकल्य, वल्कल, कुथुमि, सात्यमुग्र, नारायण, कठ, माध्यन्दिन, मौद, पैप्पलाद, बादरायण, अम्बष्ठि, कृदौविकायन, वसु, जैमिनि आदि आचार्य अज्ञानवादी हैं। वसिष्ठ, पाराशर जतुकर्णी, वाल्मीकि, रोमहर्षणी, सत्यदत्त, व्यास, एलापुत्र, औपमन्यव, इन्द्रदत्त, अयस्थूण आदि वैनयिक आचार्य हैं। इन मतों का निरूपण दृष्टिवाद नामक बारहवें अंग में हुआ है। चूंकि यह अंग उपलब्ध नहीं है, अतः इस विषय में कुछ भी नहीं कहा जा सकता। फिर भी यह द्रष्टव्य है कि उक्त आचार्यों में अधिकांश आचार्य पौराणिक हैं। व्याख्याप्रज्ञप्ति के तीसवें शतक में इन चारों वादों की अपेक्षा से समस्त जीवों का विचार किया गया है।

नियतिवाद

नियतिवाद का प्रस्थापक मक्खलिपुत्त गोशालक को माना जाता है। यही आजीविक सम्प्रदाय का प्रवर्तक है। पालि साहित्य में मक्खलि शब्द मिलता है, पर प्राकृत साहित्य में 'मंखलिपुत्र' शब्द का उल्लेख आता है। मंख का अर्थ है—हाथ में चित्रपट लेकर उनके द्वारा लोगों को उपदेश देकर आजीविका चलाने वाला भिक्षुक। व्याख्याप्रज्ञप्ति के पन्द्रहवें शतक के उल्लेख से ऐसा लगता है कि यह मंख परम्परा भ० महावीर से पूर्व भी प्रचलित थी। मंखलि महावीर का शिष्य भी बना और बाद में संघ से पृथक् भी हुआ। उसके शात, कलंद, कर्णिकार, अच्छिद्र, अग्निवेश्यायन और गोमायुपुत्र अर्जुन इन छः शिष्यों (दिशाचरों) का भी उल्लेख मिलता है। ये शिष्य महावीर के पथभ्रष्ट शिष्य थे। इस लिए मक्खलि को और इन शिष्यों को चूर्णिकार ने पासत्थ कहा है। पासत्थ शब्द पथभ्रष्ट

---

१. अंगुत्तरनिकाय, भाग ३, पृ० २६५.

२. तत्त्वार्थवार्तिक, १ २०.१२, पृ० ७४.

भिक्षुओं के लिए ही अधिक प्रयुक्त हुआ है[१] ।

इस मत के अनुसार सत्त्वों के क्लेश और शुद्धि का कोई हेतु-प्रत्यय नहीं । वे निर्बल, निर्वीर्य, भाग्य और संयोग से छः जातियों में उत्पन्न होते हैं और सुख-दुःख भोगते हैं । वहाँ शील, व्रत, तप, ब्रह्मचर्य आदि का कोई स्थान नहीं । सुख-दुःख द्रोण से तुले हुए हैं । जैसे सूत की गोली फेंकने पर उछलती हुई गिरती है वैसे ही मूर्ख और पण्डित दौड़कर आवागमन में पड़ कर दुःखों का अन्त करेंगे ।[२] प्राकृत साहित्य में भी नियतिवाद इसी रूप में वर्णित है । वहाँ कहा गया है कि नियतिवाद के अनुसार बाह्य कारणों से उत्पन्न सुख-दुःख स्वयंकृत अथवा परकृत नहीं । इसके पीछे काल, ईश्वर, स्वभाव, कर्म और पुरुषार्थ भी कारण नहीं । उसके पीछे मात्र एक कारण नियति है । महान् प्रयत्न करने पर भी अभाव्य वस्तु की उत्पत्ति नहीं होती और भाव्य वस्तु का विनाश नहीं होता ।

शीलांक ने अजीविक, अज्ञानवादी और वैनयिक के सिद्धान्तों को मिश्रित कर दिया है और इन तीनों का प्रस्थापक गोशालक को मान लिया है । यह निश्चित ही भ्रामक है । पर इससे यह अनुमान अवश्य लगाया जा सकता है कि अज्ञानवाद और विनयवाद अधिक लोकप्रिय नहीं हो सके और शीलांक के समय तक के अजीविक सम्प्रदाय के अंग बन गये । गोशालक का त्रैराशिक सिद्धान्त प्रसिद्ध ही है । उसे भी शीलांक ने अस्पष्ट ही रहने दिया ।

तज्जीवतच्छरीरवाद

सूत्रकृतांग में प्रथमतः चार्वाक और तज्जीवतच्छरीरवादियों के मत को पृथक्-पृथक् बताया गया है और बाद में दोनों को एक कर दिया है । तज्जीवतच्छरीरवादी वह है जो शरीर और जीव को माने । भूतवादी चार्वाक और तज्जीवतच्छरीरवादी में अन्तर यह है कि भूतवादी के अनुसार पांच भूत ही शरीर रूप में परिणत होकर सब क्रियाएँ करते हैं परन्तु तज्जीवतच्छरीरवादी के मत में शरीररूप में परिणत उन पांच भूतों से चैतन्य शक्ति की उत्पत्ति होती है । शरीर के नष्ट होने पर उसका भी विनाश हो जाता है । कर्मफलभोक्ता परलोकगामी आत्मा जैसे पदार्थ का शरीर से पृथक् कोई अस्तित्व नहीं । इस दृष्टि से यहाँ पुण्य-पाप कर्मों का भी कोई अस्तित्व नहीं ।[३] राजप्रश्नीय में केशी और प्रदेश के बीच जीव और आत्मा के सन्दर्भ में जो विवाद हुआ, उसमें प्रदेशी तज्जीवतच्छरीरवादी दिखाई देता है ।

पालि साहित्य में तज्जीवतच्छरीरवाद को उच्छेदवाद के भेदों में देखा जा सकता है । सम्भव है चार्वाक-सम्प्रदाय में कुछ मतमतान्तर रहे हों और तज्जीवतच्छरीरवाद उनमें से एक रहा हो । शीलांक ने भी इन दोनों को कहीं-कहीं अपृथक् माना है ।

आत्मषष्ठवाद—सूत्रकृतांग में इसे सांख्य तथा वैशेषिक दर्शन से सम्बद्ध माना जाता है । पंचमहाभूत के बाद आत्मा को छठा पदार्थ मान लेने के कारण वे आत्मषष्ठवादी कहे गये हैं[४] ।

आत्माद्वैतवाद

शीलांक आत्माद्वैतवाद एवं एकान्तात्माद्वैतवाद दोनों शब्दों को समानार्थक मानते हैं । इसके अनुसार जैसे एक ही पृथ्वीसमूह विविधरूपों में लक्षित होता है, उसी प्रकार एक आत्मस्वरूप यह समस्त जगत् नाना रूपों से देखा जाता है । उसकी दृष्टि में एक ही ज्ञानपिण्ड आत्मा पृथ्वी आदि भूतों के आकार में अनेक प्रकार का देखा जाता

---

१. सूत्रकृतांग, ३.४.६, वृत्ति पृ० ६८; ११.११३, वृ० पृ० १६६ इत्यादि

२. दीघनिकाय, सामञ्ञफलसुत्त

३. सूत्रकृतांग, १.१.११. वृत्ति पृ० २०.२

४. वही, १.१.१६ वृत्ति, पृ० २४

है परन्तु इस भेद के कारण आत्मा के उस स्वरूप में कोई भेद नहीं होता। चेतन-अचेतनरूप समस्त पदार्थ एक ही आत्मा है।[१] आत्मद्वैतवाद में न प्रमाण है न प्रमेय, न प्रतिपाद्य है न प्रतिपादक, न हेतु है, न दृष्टान्त और न उनका आभास। समस्त जगत् आत्मा से अभिन्न होने के कारण एक हो जाता है। इस स्थिति में पिता, पुत्र, मित्र आदि का भेद नहीं रहता, सुखादिक नहीं रहते। अतः आत्मद्वैतवाद निर्दोष नहीं।

स्वभाववाद

स्वभाववाद के अनुसार जगत् की विचित्रता का मूल कारण स्वभाव है। कण्टक की तीक्ष्णता, मयूर की विचित्रता और मुर्गे का रंग यह सब स्वभाव से ही होता है।[२] बुद्धचरित[३] और शास्त्रवार्त्तासमुच्चय[४] में भी स्वभाववाद की यही व्याख्या की गई है। शीलांक ने इसे तज्जीवतच्छरीरवाद से सम्बद्ध किया है और यह कारण दिया है कि चूंकि पंच महाभूतों से आत्मा पृथक् नहीं है इसलिए जगत् की विचित्रता में स्वभाववाद कारणरूप माना जाना चाहिए।

इसके अतिरिक्त अव्याकृतवाद, कालवाद, यदृच्छावाद, पुरुषवाद, पुरुषार्थवाद, ईश्वरवाद, दैववाद आदि जैसे अनेक वादों के उल्लेख मिलते हैं जिन्हें लोक-निर्माण के कारण के रूप में स्वीकार किया गया है। जैनदर्शन में भी इन सभी को कारण माना गया है परन्तु उनके समन्वित रूप को, न कि पृथक्-पृथक् रूप को।

नहि कालादिहितो केवलए हितो जायए किंचि।
इह मुग्गरंधणा इवि ता सव्वे समुदिया हेऊ॥[५]

इसके साथ ही जैनदर्शन में कर्म को भी संसार के इस वैचित्र्य का कारण बताया गया है। उसको सुख-दुःख का कारण भी माना गया है। कर्म मूर्त है क्योंकि सुखादि से सम्बद्ध होने के कारण व्यक्ति तदनुकूल अनुभव करता है। मूर्त कर्म द्वारा अमूर्त आत्मा का उपघात अथवा उपकार उसी प्रकार होता है जिस प्रकार मदिरा आदि मूर्त वस्तुओं द्वारा विज्ञानादि अमूर्त वस्तुओं का। लोक द्रव्यमय है। द्रव्य-उत्पाद व्यय-ध्रौव्यात्मक है। उसका नूतन पर्यायों में परिणमन, पूर्व पर्यायों का विनाश तथा मूल अंश की स्थिति रहती है। इसमें ईश्वर को परिचालक मानने की आवश्यकता ही नहीं।

आरण्यक

आरण्यक अरण्य में ही रहना अपना धर्म समझते थे। वे कन्दमूल फलाहारी, वृक्षमूलवासी, ग्रामान्तकवासी तथा सर्वसावद्यानुष्ठान से अनिवृत रहते थे और केन्द्रीय जीवों के घात से प्रायः वे अपना निर्वाह करते थे। तापस आदि ऐसे ही होते थे। वे द्रव्यतः अनेक व्रतों का आचरण करने पर भावतः उनसे शून्य रहते। इसके पालक प्रायः ब्राह्मण रहा करते थे। अतः वे अपने आपको अहन्तव्य मानते थे। उनका मत था—**शूद्रं व्यापाद्य प्राणायामं जपेत्, किञ्चिद्द दद्यात्।**[६] पालि साहित्य में भी आरण्यकों और परिव्राजकों के पर्याप्त उल्लेख मिलते हैं।

---

१. वही, १.१.९. वृत्ति पृ० १९
२. वही, चूर्णि, पृ० ३८, दीपिका, पृ० ५
३. बुद्धचरित ५
४. शास्त्रवार्तासमुच्चय, १६९-१७२
५. सूत्रकृतांग, २.५.१५ वृत्ति
६. सूत्र० २.२.२८-२९

अन्य सम्प्रदाय

उपर्युक्त सम्प्रदायों के अतिरिक्त श्रमण-साहित्य में और भी अनेक प्रकार के सम्प्रदायों के उल्लेख मिलते हैं। प्रश्नव्याकरण में असत्यभापक के रूप में सम्प्रदायों का विभाजन इस प्रकार किया है—

१. नास्तिकवादी अथवा वामलोकवादी—चार्वाक
२. पंचस्कन्धवादी—बौद्ध
३. मनोजीववादी
४. वायुजीववादी
५. अण्डे से जगत् की उत्पत्ति माननेवाले
६. लोक को स्वयम्भूकृत माननेवाले
७. संसार को प्रजापतिनिर्मित माननेवाले
८. सारे संसार को विष्णुमय माननेवाले
९. आत्मा को एक, अकर्ता. वेदक, नित्य, निष्क्रिय, निर्गुण और निर्लिप्त माननेवाले
१०. जगत् को यादृच्छिक माननेवाले
११. स्वभाववादी
१२. देववादी
१३. नियतिवादी
१४. ईश्वरवादी

नायाधम्मकहाओ के नंदीफल नामक पन्द्रहवें अध्ययन में एक संघ के साथ विविध मतवालों के प्रवास का उल्लेख है, उन मतवालों के नाम ये हैं—

१. चटक—त्रिदण्डी अथवा कछनीधारी—कौपीनधारी तापस
२. चीरिक—चीथड़ों से निर्मित वस्त्रधारी
३. चर्मखण्डिक—चर्मवस्त्र अथवा चर्मोपकरण रखनेवाले।
४. भिच्छुंड—भिक्षुक अथवा बौद्धभिक्षुक
५. पंडुरग—शिवभक्त—भस्म लगाने वाले
६. गौतम—साथ में बैल रखनेवाले भिक्षुक
७. गोव्रती—गोव्रत रखनेवाले
८. गृहिधर्मी—गृहस्थाश्रम को ही श्रेष्ठ माननेवाले
९. धर्मचिन्तक—धर्मशास्त्र का अध्ययन करनेवाले
१०. अविरुद्ध—विनयवादी
११. वृद्ध—संन्यास में विश्वास रखनेवाले
१२. श्रावक—धर्मश्रोता
१३. रक्तपट—रक्तवस्त्रधारी परिव्राजक[1]

---

१. औपपातिक, ३८वाँ सूत्र भी देखिये।

श्रमण साहित्य में परमतों का उल्लेख अनेक नामों से हुआ है—जैसे एगे पवयमाणा, अन्ययूथिकाः, पासत्था, दिशाचरा, अन्यतीर्थिकाः, मिथ्यादृष्टि, वाला आदि। इसलिए उनका सही विवरण मिलना कठिन हो जाता है। सूत्रकृतांग के कुशील अध्ययन में चूर्णिकार ने कुछ असंयमी सम्प्रदायों का उल्लेख किया है। उनमें प्रमुख हैं—गौतम, गोव्रतिक, रंडदेवता, वारिभद्रक, अग्निहोमवादी तथा जलशौचवादी। ऋषिभाषित[1] ग्रन्थ में कुछ अर्हद्रूप ऋषियों का उल्लेख है। उनमें से कुछ ये हैं—असित, देवल, अंगिरस (भारद्वाज), महाकाश्यप, मंखलिपुत्त, याज्ञवल्क्य, बाहुक, माथुरायण, सोरियायण, वरिसव कण्ह, आरियायण, गाथापतिपुत्रतरुण, रामपुत्र, हरिगिरि, मातंग, वायु, पिंग ब्राह्मण-परिव्राजक, अरुण महासाल, तारायण, सातिपुत्र (बुद्ध), द्वैपायन, सोम, यम, वरुण, वैश्रमण।

औपपत्तिकसूत्र में गंगातटवासी वानप्रस्थों का उल्लेख मिलता है—

१. होत्तिय (अग्निहोम करनेवाले)
२. पोत्तिय—वस्त्रधारी
३. कोत्तिय—भूशायी
४. जण्णई—याज्ञिक
५. सड्ढई—श्रद्धाशील
६. थालई—सारा सामान लेकर चलनेवाले।
७. हुवडड्ढ—कुण्डी लेकर चलनेवाले।
८. दंतुक्खलिय—दांतों से चबाकर खानेवाले।
९. उम्मज्जक, सम्मज्जक और निमज्जक—स्नान करनेवाले।
१०. संपक्खाल—शरीर पर मिट्टी लगाकर स्नान करनेवाले।
११. दक्खिणकूलग—गंगा के दक्षिण तट पर रहनेवाले।
१२. उत्तरकूलग—गंगा के उत्तर तट पर रहनेवाले।
१३. संखधमक—शंख बजाकर भोजन करनेवाले।
१४. कूलधमक—किनारे पर खड़े होकर आवाज करके भोजन करनेवाले
१५. मियलुद्धय—पशुभक्षण करनेवाले।
१६. हत्थितावस—हाथी को मारकर एक वर्ष तक उसे खानेवाले।
१७. उड्डंडक—दण्ड को ऊपर कर चलनेवाले।
१८. दिसापोक्खी—दिशा सिञ्चन करनेवाले।
१९. वक्कपोसी—वल्कल पहननेवाले।
२०. अंबुवासी—जलवासी।
२१. विलवासी—विल में रहनेवाले।
२२. वेलवासी—समुद्र के किनारे रहनेवाले।
२३. रुक्खमूलिआ—वृक्ष के नीचे रहनेवाले।
२४-५. अंबुभक्खी (जलभक्षी) वायुभक्षी और सेवालभक्षी।

इसी सूत्र में प्रव्रजित श्रमण का अलग से उल्लेख किया गया है। संखा (सांख्य), जोई (योगी), कविल

---

१. अध्ययन २९ व ३१

(कपिल), भिउच्च (भृगु ऋषि के अनुयायी), हंस (वनवासी पर भिक्षार्थ ग्रामभ्रमण करनेवाले), परमहंस (नदी तटवासी तथा वस्त्रादि छोड़कर प्राण त्याग करनेवाले), वहु उदय (गांव में एक रात और नगर में पाँच रात रहने वाले), कुडिव्वय (गृहवासी तथा रागादि त्यागी) तथा कण्हपरिव्वायग (कृष्ण परिव्राजक) उनमें प्रमुख हैं। ब्राह्मण परिव्राजकों में कण्डु, करकंडु, अंवड, परासर, कण्हदीवायण, देवगुप्त और णारय तथा क्षत्रिय परिव्राजकों में सेलई, ससिहार, णग्गई, भग्गई, विदेह रायाराय, प्रमुख हैं। ये परिव्राजक वेद-वेदांग में निष्णात, स्नानादि में विश्वास करनेवाले, सादे ढंग से रहनेवाले तथा अनर्थ दण्ड से विरत रहनेवाले थे।

औपपातिक सूत्र में ही आजीविक श्रमणों के सात प्रकार वताये गये हैं—दुघरंतरिया (दो घर छोड़कर भिक्षा लेनेवाले)। तिघरंतरिया, सत्तघरंतरिया, उप्पलवेंटिया (कमल के डंठल खाकर रहनेवाले)। घरसमुदाणिय (प्रत्येक घर से भिक्षा लेनेवाले), विज्जुअंतरिया (विद्युत्पात के समय भिक्षा न लेनेवाले) तथा उट्टियसमण (किसी वडे मिट्टी के वर्तन में वैठकर तप करने वाले)। इनके अतिरिक्त अुक्कोसिय, परपरिवाइय, तथा भूइकम्मिय श्रमण भी थे। सात निह्नवों का भी यहाँ उल्लेख करना आवश्यक है—वहुरय, (प्रवर्तक महावली), जीवपर्ससय (प्रवर्तक-तिष्यगुप्त), अव्वत्तिय (प्रवर्तक-आषाढ़ाचार्य)। सामुच्छेइय (संस्थापक-अश्वमित्र), दोकिरिया (प्रवर्तक-गंगाचार्य)। तेरासिय (रोहिगुप्तासंस्थापक) तथा अवद्धिय (संस्थापक माहिल) ये मूलतः किसी न किसी सम्प्रदाय से सम्वद्ध आचार्य थे। आगम साहित्य में श्रमणों के पाँच भेद भी दिये गये हैं—निग्रन्थ, शाक्य, तापस, गैरिक और अजीविक। इनमें से आज निग्रन्थ और शाक्य ही शेष रहे हैं।

इस प्रकार पालि, प्राकृत और संस्कृत साहित्य में षड्दर्शनों के अतिरिक्त प्राचीनकाल में विशेषतः महावीर के काल में अनेक वादों का विवरण मिलता है। परन्तु उनका मूल सैद्धान्तिक साहित्य उपलब्ध नहीं होता। सम्भवतः अधिकांश उक्त वादों का कोई विशेष साहित्य था भी नहीं, अन्यथा उनका उल्लेख अवश्य मिलता। इसलिए प्रतीत होता है कि ये वाद अधिक प्रभावक सिद्ध नहीं रहे होंगे। तथा यह भी संभव है कि उनका जीवनकाल अधिक नहीं रहा होगा। आवश्यकता यह है कि इस विषय पर गंभीर शोध की जाय और उनके समूचे सिद्धान्त विविध साहित्य से एकत्रित कर भारतीय संस्कृति में उनके स्थान का निर्धारण किया जाय। मानव के लिए उनकी कहाँ तक उपयोगिता है, इसका भी मूल्यांकन किया जाना अपेक्षित है।

जैनव्याकरणोपज्ञं "कारः प्रत्ययो न कृत् किन्तु तद्धित" इति

—डॉ० हर्षनाथमिश्रः

संस्कृतवाङ्मये चिरादुपलब्धानामकारोकारैकारादिशब्दानां सिद्धचै वैयाकरणैर्विहितः प्रयत्नो द्विधा विभक्तुं शक्यते। केचनेदृशं शब्दं कारप्रत्ययं विधाय साधयितुमिच्छन्ति। ईदृशेषु वैयाकरणेषु प्रायः कात्यायन आदिमो मुख्यतमश्च। 'वर्णात्कार' इति वार्तिक सर्वप्रथमं निर्माय पाणिनिना प्रत्ययविधानद्वाराऽकृतसाधनोपायस्येदृशस्य शब्दस्य साधनोपायः कात्यायनेनैव प्रदर्शितः। इतरे वैयाकरणा घञन्तकारशब्देन सह समासं विधायैवैतादृशानां शब्दानां सिद्धि-सम्भवात् कस्यापि नूतनस्योपायस्यावश्यकतामननुभूय सूत्रादिनिर्माणं न कुर्वन्ति। ये च कारं प्रत्ययं स्वीकुर्वन्ति, तेषामपि वर्तते दलद्वयम्। तत्र कात्यायनकैयटभट्टोजिनागेशादय एतं कृत्प्रत्ययं स्वीकुर्वन्ति। परे सन्ति जैनवैयाकरणा आचार्यहेमचन्द्रप्रमुखाः, येऽस्य तद्धितत्वमङ्गीकुर्वन्ति। परम्परातः कृत्प्रत्ययरूपेण ख्यातस्य तद्धितत्वस्वीकृतिः क्रान्ति-रेवास्ति। बहूनां दोषाणां निराकरणोपायात्मिकेयं तद्धितत्वस्वीकृतिः प्रशस्यते वैयाकरणैः।

कारघटिता अकारादयः शब्दा ऐतरेयब्राह्मणे सर्वप्रथममुपलभ्यन्ते।[1] वाजसनेय-प्रातिशाख्ये ओङ्काराथकारा-दयः शब्दा दृश्यन्ते। ऋक्प्रातिशाख्ये आथर्वणे प्रातिशाख्ये चोङ्कारः शब्दः प्रयुक्तो दृश्यते। एतादृशस्य प्रसिद्धप्रयोगस्य साधनायाकृतप्रयत्नविशेषत्वाज् ज्ञायते पाणिनिर्घञन्तकारशब्देन सह समासेनेदृशः शब्दस्य साधनेच्छुरिति।

"वर्णात्कारः"[3] इति वार्तिकं निर्मायाकारादिशब्दसाधनाय कारप्रत्ययो विहितः सर्वप्रथमं कात्यायनेन। कैयटेनास्य वार्तिकस्यार्थः तथा निर्दिष्टो यथा दोषो नापद्येत। वर्णशब्दात्[4] कारप्रत्ययो नात्राभिमतः, तथासति वर्णकार इत्यत्रातिव्याप्तिः, अकार इत्यादावव्याप्तिश्चापद्येताम्। 'इक्श्तिपौ धातुनिर्देशे' इत्यस्मात्पुरोवर्ति वार्तिकम्। अतो निर्देश इत्यनुवर्तनान्निर्देश इत्येवेदं वार्तिकं प्रवर्तते। तस्य निर्देश इत्यस्य व्याख्यानादर्थविशेषं कुर्वता कैयटादिना प्रोक्तम् :—वर्णादित्यस्य न वर्णशब्दादित्यर्थः न वा वर्णादुच्चार्यमाणादित्यर्थः किन्तु वर्णानु[2] करणात् कारप्रत्ययो भवतीति वार्तिकार्थः। यदि वर्णादुच्चार्यमाणादित्यर्थः क्रियते तदाऽकार इत्यत्र कारप्रत्यय-सम्भवेऽपि ककार इत्यादौ कारप्रत्ययो न स्यात् 'क' इत्यस्य सखण्डध्वनित्वेन वर्णत्वाभावात्, अखण्डध्वने[5] रकारादेरेव वर्णत्वात्। क इत्यत्र वर्णसंघातस्यैवोच्चार्यमाणत्वात्। अनुकार्यं त्विह वर्णमात्रम् अकारस्योच्चारणार्थत्वात्। न चैवं समुच्चयार्थश्चकारः" एवकारोऽन्यनिवृत्त्यर्थ इत्यादिप्रयोगाः कथं सिद्धचन्तीति वाच्यम् उच्चैस्तरां वा वषट्कारः इत्यत्र वषट्कार इति निर्देशात्, "सर्वे चकाराः[6] प्रत्याख्यायन्ते इति भाष्यप्रयोगाद्, 'रोगाख्यायां[7] ण्वुल् बहुलम्' इत्यत्र

१· तेभ्योऽभितप्तेभ्यस्त्रयो वर्णा अजायन्त—अकार उकारो मकार इति। तानेकधा समभरत्। तदेतदोमिति, ऐ० ब्रा० १५/७

२· ओङ्कारं वेदेषु। अथकारं भाष्येषु। वा० प्रा० १/ १८-१९।

३. पा० सू० ३-३-१०८/३ वा०।

४. ३।३।१०८ सू० प्रदीपः।

५. १।२।३५

६. १।३।७३ महाभाष्यम्।

७. ३।३।१०८ पा०

वहुलवचनात्तस्य सूत्रस्य च वार्तिकत्वेन वर्णात्कार इत्यस्योपादानात् क्वचित् संघातादपि भवतीति ज्ञापनात् । 'अस्य[1] च्वौ' इत्यादौ वर्णानुकरणे सत्यपि कारप्रत्ययाभावो वहुलग्रहणप्रतापादेव सिद्धचति । अइउण् इत्यादौ कारप्रत्यया-भावोऽपि वाहुलकादेव[2] । कारप्रत्ययस्य ककारस्येत्संज्ञा प्रयोजनाभावादेव न जायते । कारप्रत्ययोऽयं नार्धधातुकत्वं भजते, धातोरविहितत्वात् आर्धधातुकं शेष[3] इत्यत्र तिङ्शिद्भ्योऽन्यो धातोरिति विहितः प्रत्यय आर्धधातुकसंज्ञः स्यादिति स्वीकारात् । तेनेडागमादिदोषो न जायते । सर्वमिदं प्रदीपे स्पष्टम् ।

चन्द्राचार्यस्तु वर्णात्कार इतीदृशं सूत्रं न करोति । स धातोः स्वरूपनिर्देशार्थकं प्रत्ययत्रयं स्वीकरोति । कात्यायनेन "इक्श्तिपौ धातुनिर्देशे" इति वार्तिकं कुर्वता प्रत्ययद्वयमेव स्वीकृतम् । किन्तु प्रत्ययद्वये स्वीकृते धातु-स्वरूपवोधनायोपलभ्यमानानि सर्वाणि रूपाणि न सिद्धचन्ति, तथाहि 'इन्धि[4] भवतिभ्याञ्च' इत्यत्र यदि इन्धीत्यत्र इक् प्रत्ययः स्वीक्रियते तदात्रानुषङ्गलोप आपद्येत । 'श्रन्थि[5] ग्रन्थिदम्भिस्वञ्जीनां लिटः कित्वं वे'ति वार्तिकेऽप्युपधान-कारस्य लोपापत्तिः । किञ्च 'वचिस्वपियजादीनां किती'त्यादौ कित्त्वात् सम्प्रसारणपत्तिः अत इक्प्रत्ययादतिरिक्त इप्रत्ययोऽपि धातुस्वरूपवोधाय चन्द्राचार्येण स्वीकृतः[6] । सरस्वतीकण्ठाभरणकारेण भोजराजेनापि प्रत्ययत्रयं स्वीकृत्य चन्द्राचार्योऽनुगतः[7] । किन्तु वर्णस्वरूपवोधनाय कारप्रत्यय इक्प्रत्ययश्च न स्वीकृतौ चन्द्रेण । तेन इ-कि-श्तिपः स्वरूपे इति सूत्रस्य वृत्तौ[8] कारशब्देन समासं विधाय अकारचीत्कारादिशब्दानां साधनाय संकेतो दत्तः, रेफ-शब्दस्तु औणादिकत्वेन स्वीकृतः । चान्द्रव्याकरणपरामर्शाङ्गीकर्तारो जैनवैयाकरणा अपि धातुस्वरूपवोधाय पूर्वोक्तं कृत्प्रत्ययत्रयमूचुः[9] । किन्तु तैरकारादिशब्दसाधनाय कारशब्देन सह तत्तद्वर्णानां वर्णसंघातानां वा समास इति चन्द्राचा-र्यपरामर्शमस्वीकृत्य कारः प्रत्ययत्वेन स्वीकृतः परन्तु तेषामयं कारप्रत्ययो न कृत्प्रत्ययः यथा किल कात्यायनस्य साम्प्रतमुपलब्धवार्तिकपाठाज् ज्ञायते परन्तु तद्धितप्रत्ययः । कैयटभट्टोजिनागेशादयो यां समस्यां सरलेन पथा न समादधुः जैनवैयाकरणास्तां हेलया निराचक्रुः । कारस्य प्रत्ययत्वं कैयटेन स्वीचक्रे । घञन्तकारशब्देन समास-विधानेन नेष्टसिद्धिः, अकारकरणमित्यादि प्रयोगाणां शिष्टकृतानामनन्वितत्वप्रसङ्गात् । करणं कारः अस्य कार अकार इत्येवं विगृह्य साधितेऽकारशब्देऽकरणकरणमित्यर्थस्य तत्र प्रतीतस्यानन्वितत्वं स्पष्टमेव । कारप्रत्ययस्य कृत्प्र-त्ययमध्यपाठात् धात्वविहितत्वेऽपि कृत्संज्ञा । यदचपि[10] कृदतिङ् इति 'कृत्संज्ञा धातोर्विहितस्य तिङ्भिन्नस्य प्रत्य-यस्य क्रियते तथापि 'रोगाख्यायां ण्वुल् वहुलम्" इति कृत्प्रत्ययविधायकसूत्रस्य वार्तिकत्वात् वर्णात् कार इति विहितस्य कारप्रत्ययस्यापि कृत्त्वमिति कैयटाशयः । कारस्य कृत्प्रत्ययस्वीकारस्य फलमकारादिशब्दस्य कृत्तद्धितसमासाश्चेति प्रातिप-दिकत्वात् अकारः एवकार इत्यादौ स्वाद्युत्पत्तिः । कृत्प्रत्ययस्वीकारे लशक्वतद्धिते[11] इति प्राप्ताया इत्संज्ञाया फलाभा-

---

१. ७।४।३२

२. १-३।३।१०८ पा० ।

३. अइउण् सूत्रस्य लघुशब्देन्दुशेखरः ।

४. ३।४।११४ सि० कौ० ।

५. १।२।६ सि० कौ० स्वादि० प्र० ।

६. इ-कि-श्तिपः स्वरूपे । चा० १।३।७६

७. इ-किश्तिपः स्वरूपे । स० क० १।४।१८१

८. कथमकारः ककार इत्यादि ? कारशब्देन समासः, यथा एवङ्कारः, ओङ्कारः, चीत्कारः, शीत्कारः, हुङ्कारः, वषट्कारः, स्वाहाकार इत्यादि । औणादिको रेफः अर्थात् रातेरिफः उ० २।८८ रेफ अक्षरम् इति ।

९. इ-कि-श्तिपः स्वरूपार्थे । कृदन्त प्र० ६।१३ आचार्यमलयगिरिशब्दानुशासनम् ।

१०. ३।१।९३

११. १.३.८.

वाद् वारणं क्रियते इडागमस्य च वारणाय धातोरविहितत्वादस्य प्रत्ययस्यार्धधातुकत्वाभावः स्वीक्रियते । भट्टोजि[१]-दीक्षित-नागे[२]शादयोऽ-पि कारप्रत्ययस्य कृत्प्रत्ययं स्वीकृत्य कृदतिङ् इति सूत्रार्थं तिरस्कृत्योत्सूत्रमचकथन् ।

जैनवैयाकरणास्तु कारं प्रत्ययं तत्रापि च तद्धितं स्त्रीकुर्वन्ति । तत्र जैनेन्द्रव्याकरणे सूत्रमुपलभ्यते वर्णात् कारः ४।२।५६ । शाकटायनव्याकरणेऽपि दृश्यते वर्णात् कारः ३।४।१२६ इत्येव सूत्रम् । तत्र चिन्तामणिवृत्तौ लिख्यते बहुलमित्येव (कारप्रत्ययविधानम्) तेन नून् पे इत्यादौ न भवति । एवकार इत्यादौ च भवति ।

आचार्यहेमचन्द्रकृतशब्दानुशासने सर्वप्रथममस्माभिः सर्वकारप्रत्यय-घटितशब्दसंग्राहकं सूत्रमुपलभ्यते 'वर्णाव्ययात् स्वरूपे कारः' ७।२।१५६ । अस्य सूत्रस्य बृहद्वृत्तौ लघुन्यासे हैमप्रकाशे कारप्रत्ययाश्रिता बहवः प्रश्नाः समाहिताः । तत्र बृहद्वृत्तिः—वर्णेभ्योऽव्ययेभ्यश्च स्वरूपार्थवृत्तिभ्यः स्वार्थे कारप्रत्ययो भवतीति सूत्रार्थं प्रस्तौति । कारप्रत्ययोऽयं तेन स्वार्थिकतद्धितप्रत्ययेषु परिगणितः । तमनुसरता मुनिश्रीचौथमल्लजीमहानुभावेन कालुकौमुद्यां स्वार्थिकतद्धितप्रकरणे 'वर्णाव्ययात्स्वरूपे कारः' ७।४।६६ इति सूत्रं प्रणीतम् । वस्तुतः अ-प्रभृतिवर्णात् एवादि प्रभृत्यव्ययाच्च विहितत्वादस्य प्रत्ययस्य तद्धितत्वं न्याय्यम् । न्याय्यस्य तद्धितत्वस्य स्वीकारात् प्रत्यादिककार-स्येत्संज्ञाप्रसक्तिरपि न भवति, 'लशक्वतद्धिते' इत्यत्रातद्धित इत्युक्तेः, आर्धधातुकत्वसम्भावनाया अपि निरस्तत्वा-दिडागमादिदोषोऽपि न सम्भवति । इत्थं कारप्रत्ययस्य तद्धितत्वोद्भावना जैनवैयाकरणानां प्रतिभाविलासं प्रकटी-करोति, बहूनां समस्यानां समाधानात्संस्कृतव्याकरणनिकायस्य च महत उपकाराय कल्पते । बृहद्वृत्तौ अकारादीनि उदाहरणानि वर्णस्य दत्तानि । अव्ययस्योदाहरणानि यथा ओङ्कारः स्वाहाकारः वषट्कारः हन्तकारः नमस्कारः, इतिकारः सीत्कारः सूत्कार इत्यादीनि प्राप्यन्ते । बृहद्वृत्तिकारेण प्रोक्तम् कारशब्देन समासं स्वीकृत्य पूर्वोक्तानि कारप्रत्ययोदाहरणानि निष्पादयितुं न शक्यन्ते ओङ्कारमुच्चारयति, वषट्कारमभिधत्ते हुंकारं करोतीत्यादिप्रयोगाणा-मसङ्गत्यापत्तेरिति । लघुन्यासकारेण बृहद्वृत्ति व्याचक्षाणेन लिखितम् "यद्यत्र-'कृ' इत्यस्य कार इति निष्पद्यते तदा ओमितिकरणस्य किमुच्चारणमिति च संगच्छते । हैमप्रकाशकारेण वर्णशब्दस्य कारप्रत्ययस्य च प्रयोगे योऽर्थभेदः सोऽपि सूत्ररूपेणोपन्यस्तः "उक्ते वर्णे सवर्णोऽपि ग्राह्यः कारे च केवलः" इति वाक्यं लिखता ।

अयं भावः—यद्यपि कारप्रत्ययः स्वरूपार्थवृत्तिभ्यो वर्णेभ्यः स्वार्थे विधीयते तथापि तयोः प्रयोगे महदर्थ-पार्थक्यमनुभूयते[३] । अवर्णपदेन ह्रस्वदीर्घप्लुताः सर्वा अ-जातिर्गृह्यते, किन्तु अकारपदेन ह्रस्व अ एव गृह्यते । अथ च कारप्रत्ययः ह्रस्वात् दीर्घात् प्लुताच्च शक्यते कर्तुम्, अतएव अकारः आकार इकार ईकार आङ्कार इति प्रयुज्यते किन्तु दीर्घात् स्वरात् वर्णशब्दप्रयोगो न क्रियते । अतएव ईवर्ण इत्यादयः प्रयोगाः न क्रियन्ते । ककार इत्यत्र क घटकाकारमुच्चारणार्थकं मत्वा वर्णाद्विधीयमानः कारप्रत्ययः शक्यते विधातुं किन्तु कवर्ण इति न शक्यते वक्तुमनभिधानात् केति संघातस्य सखण्डध्वनित्वेन वर्णत्वाभावाच्च । कथमेतद्वैलक्षण्यमिति चेत् प्रयोगस्वभावादिति गृहाण । प्रयोगप्राप्तवैलक्षण्यादेव विद्वान् इति शब्दः यमर्थमभिधत्ते नं तं विदम् शब्दोऽभिधातुं शक्नोति । हैमशब्दानु-शासने "वर्णाव्ययात् स्वरूपे कारः" इत्यत्र स्वरूप इत्युच्यते तेन अः विष्णुः इः कामः कः ब्रह्मा, खम् आकाशम्, ओम् ब्रह्म, वषडिन्द्राय, स्वाहाऽग्नये, स्वधा पितृभ्य इत्यर्थपरतायां न भवति । सूत्रे च प्रायोऽनुवृत्तेरन्यत्रापि भवति । तेन मन एव मनस्कारः अहमेवाहङ्कार इत्यादि सिद्धयति ।

---

१. कारप्रत्ययस्य धातोरविहितत्वेऽपि धात्वधिकारस्थत्वात् कृत्संज्ञा । म० ३।३।१०८

२. कृत्संज्ञेति बाहुलकादित्यन्ये उद्योते । ३।३।१०८ ।

३. १।३।८

रस्य कृते रेफ इत्युच्यते। तत्र तैत्तिरीयप्रातिशाख्ये दृश्यते वर्णः कारोत्तरो वर्णाख्या। अकार व्यवेतं व्यञ्जनानाम्। एफस्तु[1] रस्य। वाजसनेयप्रातिशाख्ये प्रोक्तम् निर्देश इतिना कारेण च अ-व्यवहितेन व्यञ्जनस्य। स्वरैरपि।[2] र[3]एफेन च। इत्थं पूर्वोक्तप्रातिशाख्याभ्यां रादेफप्रत्ययः रेफशब्दसाधनाय स्वीकृतो दृश्यते। कात्यायनेन 'इक्श्तिपौ धातुनिर्देशे, वर्णात्कारः रादिफ' इति वार्तिकत्रयं रोगाख्यायां ण्वुल् बहुलमित्यत्र कृत्प्रत्ययविधायकसूत्रे स्वीकृत्य कृत् इफ प्रत्ययः स्वीकृतः। वस्तुतस्तु वर्णाद् विहितत्वाद् रघटकाकारस्य रादित्यत्रोच्चारणार्थत्वादेफप्रत्ययस्वीकार एव श्रेयान् तत्र गुणाकरणजन्यं प्रक्रियालाघवमपि। अत एवोच्यते हेमचन्द्राचार्येण रादेफ[1] इति सूत्रं तद्धितप्रकरणे कृतम्। रशब्दादेफप्रत्ययो वा भवति इति सूत्रार्थः। तेन रकार इत्यपि सिद्धचति, सूत्रस्य विकल्पत्वात्। कालुकौमुद्यामपि 'रादेफो वा' (७।४।१००) इति सूत्रं दृश्यते। तेन जैनवैयाकरणानां मतेन रेफरकारोभयशब्दयोः शिष्टप्रयुक्तयोः साधुत्वं सारल्येनावगम्यते। एतेन "रकारादीनि नामानि शृण्वतो मम पार्वति" इत्यादौ दृष्टस्य रकारेतिप्रयोगस्यार्षत्वकल्पनमनावश्यकम्। तत्त्वबोधिनीकारेणापि[4] "वा स्वरूपविधिना कारप्रत्ययस्य इफप्रत्ययेन वैकल्पिकबाध एव स्वीकृतः। इत्थं तन्मतेन इफ प्रत्ययः कृत्प्रत्यय इति सिद्धचति। रनाम्नो जातस्याप्यस्य कृत्त्वादि सम्पादनायासः कारप्रत्ययवत् करणीयो भवतीति गौरवं कृदतिङ्ङिति सूत्राक्षराननुगुणञ्च भवतीति विचार्यं सुधीभिः।

इत्थं कारप्रत्ययस्यैफप्रत्ययस्य च तद्धितत्वोद्भावना जैनवैयाकरणानां महानुपकारः कृतज्ञै रङ्गीक्रियते।

इति शम्।

---

१. १/१६ २. ३६-३८ ३. १/७६-४०

४. ७।२।१५७ हैमशब्दानुशासनम्। सि० कौ० तत्त्वबो० ६५५ पृ०।

शाकटायन-शब्दानुशासनम्

डॉ० तीर्थराजस्त्रिपाठी

स्वस्ति श्रीसकलज्ञानसाम्राज्यपदमाप्तवान् । महाश्रमणसंघाधिपतिर्यः शाकटायनः ।।
एकः शब्दाम्बुधिं बुद्धिमन्दरेण प्रमथ्य यः । सयशश्रीः समुद्दध्रे विश्वं व्याकरणामृतम् ।।
(यक्षवर्मप्रणीता-चिन्तामणि-टीका)

शाकटायन-शब्दानुशासनविवरणात्प्रागित्यप्यवधेयं यत्कोऽयं शाकटायनः कतमञ्चालञ्चकार कुलं जनपदादि-कञ्चेति ? अत्र विषये महामुनिना पतञ्जलिना उणादयो बहुल (३।३।१) मिति सूत्रे महाभाष्ये प्रत्यपादि यच्छकट एव शाकटायनाचार्यस्य पितृचरणो न चेतरो हि कश्चिद् भवितुमर्हतीति । तच्च 'शकटस्यापत्यं पुमान् शाकटायनः' इति विग्रहेण निष्पादयितुं शक्यते ।

भगवता पतञ्जलिनाऽपि शकटशब्दो नडादिगणे निर्दिष्टः[१] । परन्तु नैकैर्वैयाकरणैः स्वीक्रियते यत्तस्य पिताम-हेनैव शकटाभिधानेन भाव्यं न च तत्पितृचरणेनेति श्रीमीमांसकः[२] ।

भगवता वोपदेवेन तु स्वविरचिते 'कविकल्पद्रुम'नाम्नि ग्रन्थे शाकटायनोऽप्यष्टसंख्याकेषु वैयाकरणेषु सादरं सप्रश्रयञ्च स्मृतः । तद्यथा—

"इन्द्रश्चन्द्रः काशकृत्स्नापिशली शाकटायनः ।
पाणिन्यमरजैनेन्द्रा जयन्त्यष्टादिशाब्दिकाः ।।"[३]

अत्र शाकटायनेत्यनेन पदेनार्वाचीनः कश्चिज्जैनशाकटायनः प्राच्यो वा कश्चिद्वैदिकः शाकटायन इति न स्पष्टतरं प्रतीतिं यातीति श्रीमीमांसकादयः । किञ्च 'श्रीतत्त्वविधि'— नाम्नि वैष्णवग्रन्थेऽपि शाकटायनोऽष्टसंख्याकेषु शाब्दिकेषु सादरं स्मृत इति तत्रैव श्रीमीमांसकेनोपपादितम् । तद्यथा—

"ऐन्द्रं चान्द्रं काशकृत्स्नं कौमारं शाकटायनम् ।
सारस्वतं चापिशलं शाकल्यं पाणिनीयकम् ।।"[४]

तदेवं शाकटायनः पूर्वपाणिनेः समुद्भूतेषु शाब्दिकेषु मूर्धन्यपदं लेभे इति नात्र संशयावकाशलेशोऽपि । पाणि-नीयाष्टकेऽपि शाकटायनस्त्रिधा निर्दिष्टः ।[५] वाजसनेयप्रातिशाख्ये, ऋक्प्रातिशाख्ये चैषां नैकशो निर्देशो जायते । किञ्च

---

१. द्र० 'नडादिभ्यः फक्' (४।१।९९)
२. द्र०—'संस्क० व्याकरण शास्त्र का इति०' इति ग्र० प्र० भा० १६० तमे पृ० ।
३. द्र० श्रीयुधि० मीमां० विर०' संस्कृत व्याक० शास्त्र का इति०' इति ग्रन्थे प्र० भा० ६४ तमे पृ० ।
४. द्र० श्रीमीमां० विर० 'सं० व्याक० शास्त्र का इति०' ग्रन्थे प्र० भा० ६५ तमे पृ० ।
५. 'लङः शाकटायनस्यैव' (३।४।१११), 'व्योर्लघुप्रयत्नतरः शाकटायनस्य' (८।३।१८) 'त्रिप्रभृतिषु शाकटायनस्य' (८।४।५०) ।

भगवता यास्काचार्येणाऽपि यत्र तत्र निरुक्ते शाकटायनमतमुपन्यस्तम्।[1] महाभाष्यकारेण पतञ्जलिनाऽपि शाकटायनस्य व्याकरणशास्त्रप्रणेतृत्वं स्फुटमेवोरीकृतम्[2]।

एष ह्याचार्यः ख्रिष्टाब्दात्सहस्राब्देभ्यः पूर्वं तन्निर्देष्टा पाणिनिश्च सप्तमख्रैस्ताब्दस्येतस्तो जनिं लेभे इति श्रीवेलवल्करमहाभागेनोपपादितम्[3]। यास्काचार्येण शाकटायनो नामनिर्देशपुरस्सरं स्मृत इति सपद्येव व्युदपादि। यास्काचार्यस्तु नूनमेव वैक्रमाब्दाद् विगतेभ्यस्त्रिसहस्राब्देभ्यः पूर्वमलञ्चकार भूमण्डलमिदमिति। शाकटायनश्चेत्-काण्वस्य शिष्यो वा काण्वशाखायाः प्रवर्तयिता वा मन्ये तर्हि ध्रुवमेवास्य कालक्रमो वैक्रमाब्देभ्य एकत्रिंशदब्देभ्यः पूर्वं क्वचिन्निश्चेतुं सुशकमिति श्रीमीमांसकस्याशयः[4]।

शाकटायनस्तु पूर्वपाणिनिरिति निश्चप्रचम्, परन्तु यत्प्रणीतं शाकटायनव्याकरणमद्यत्वे समुपलभ्यते, तस्य प्रामाणिकं नाम पाल्यकीर्तिरिति तत्प्रणीतं व्याकरणञ्च "शब्दानुशासनमिति नाम्ना विज्ञायते बुधैः। शाकटायनमिव पाल्यकीर्तिरपि शाब्दिकेषु सङ्कीर्तितत्वाच्छाकटायनेति नाम्ना तच्छब्दानुशासनञ्च "शाकटायन-शब्दानुशासने"ति नाम्ना प्रसृतिङ्गतम्।[5] जैनाचार्येण वादिराजसूरिणा स्वग्रथिते पार्श्वनाथचरितेति नाम्नि काव्यग्रन्थे शाकटायनस्यापरनाम्ना विश्रुतस्य पाल्यकीर्तेर्जैनधर्मानुगामित्वमपि स्फुटमेव ध्वनितम्। अपरञ्च तेन तत्रैव ग्रन्थे पाल्यकीर्तिस्त्वित्थं स्मृतः—

"कुतस्त्या तस्य सा शक्तिः पाल्यकीर्तेर्महौजसः।
श्रीपदश्रवणं यस्य शाब्दिकान् कुरुते जनान्॥"

अत्रावधेयं यच्छाकटायनेनामोघवृत्तिनाम्न्येका वैदुष्योपगूढा स्वोपज्ञा टीका व्यरचीति शाकटायनशब्दा-नुशासनोहापोहेनेनावगम्यते। एतन्नाम्नी हि टीका 'श्रीवीरममृतं ज्योति'रित्यनेन मङ्गलाचरणेन प्रारब्धेति गम्यते। किञ्च वादिराजसूरिणा मङ्गलाचरणस्थं श्रीतिपदमभिलक्ष्य प्रत्यपादि यत्पाल्यकीर्तिर्व्याकरणारम्भणेनैव जनाः शाब्दिकाः प्रतिपद्यन्ते। श्रीमता शुभचन्द्रेण स्वनिर्मितायां 'पार्श्वनाथचरित-पञ्जिकायाम्' मङ्गलाचरणस्थः श्लोकोऽधो-ऽङ्कितेन विधिना व्याख्यायि—

"तस्य पाल्यकीर्तेः महौजसः श्रीपदश्रवणम्। श्रिया उपलक्षितानि पदानि शाकटायनसूत्राणि तेषां श्रवणं आकर्णनम्[6]।"

इत्यनेन स्फुटमेव ध्वन्यते यत्पञ्जिकाकारेण शुभचन्द्रेण पाल्यकीर्तिरेव शाकटायनसूत्रनिर्मातेत्यनुमतः।

श्रीमताऽभयचन्द्रेणापि शाकटायन-प्रक्रिया-सङ्ग्रहस्य मङ्गलाचरणं भगवान् जिनेश्वरः 'पाल्यकीर्ति-मुनीन्द्रे'ति

---

१. द्र०—निरुक्ते १।१२ तत्र नामान्याख्यातजानीति शाकटायनो नैरुक्तसमयश्च।'

२. द्र०—'उणादयो बहुल (३।३।१) मिति सूत्रे महा०—'व्याकरणे शकटस्य च तोकम्' अपि च 'परोक्षे लिट्' (३।२।११५) इति सूत्रे महा० 'वैयाकरणानां शाकटायनानाम्'।

३. द्र० श्रीपादकृष्णवेलवल्करप्रणीतम्—'सिस्टम्स् आफ संस्कृत ग्रामर' इत्याख्यं पुस्तकम्।

४. द्र० 'संस्कृत व्याक० शास्त्र का इति०' इति ग्रन्थे प्र० भा० १६४ तमे पृ०।

५. द्र० पण्डित अम्बालाल प्रे० शाह विर० 'जैन साहि० का बृहद् इति०' इति नाम्नि ग्रन्थे 'पार्श्वनाथ विद्याश्रम शोधसंस्थान, वाराणसीतः प्रका० १६ तमे पृ०।

६. द्र०—श्रीनाथूराम प्रेमि-विर० 'जैन साहित्य और इतिहासे'ति नाम्नि ग्रन्थे यशोधर मोदी, विद्याधर मोदी, मुम्बईतः प्रका०' १५६ तमे पृ०।

विशेषणद्वयेनोट्टङ्कितः । 'जिनेश्वरे'ति पदस्य च श्लिष्टत्वादेकस्मिन्नर्थे जिनेश्वरो द्वितीये च वैयाकरणेषु लब्धकीर्तित्वात् पाल्यकीर्तिरेव शिरसा नुतः । शाकटायन-प्रक्रियाप्रणयनकाले अभयचन्द्रः प्रामाणिकं ग्रन्थकर्त्तारं परित्यज्यान्यं कंस्विस्तूयादिति न सम्भाव्यते । अनेनापि शाकटायनस्य वास्तवं नाम पाल्यकीर्तिरेवेति निश्चेतुं सुशकम्[1] ।

किञ्च यथा किल कविषु महाकवेः कविकुलगुरोः कालिदासस्योत्कर्षातिशयत्वात् तत्कालान्तरोद्भूताः कविकुलशिरोमणयः कालिदासेत्यभिधानेनैव सङ्कीर्तितास्तथैव वैयाकरणेषु मूर्धाभिषिक्तत्वात्पाल्यकीर्तिरेव शकटायनेतिनाम्ना दिग्दिगन्तरेषु पप्रथे ।

पाल्यकीर्तिरचनाः —

वैयाकरणमूर्धन्यस्य पाल्यकीर्तेः शाकटायनस्य वाऽन्यत्वे केवलास्तिस्र एव रचना दृग्गोचरी भवन्ति, ताश्चाधो विव्रियन्ते—

१. शब्दानुशासनात्मको मौलः सूत्रपाठः ।
२. अमोघवृत्तिः ।
३. स्त्रीमुक्ति—केवलिभुक्तिप्रकरणम् ।

अतिरिच्यैता गीर्वाणवाण्याः प्रख्याततमेन साहित्यमीमांसकेन राजशेखरेण स्वविहितायां 'काव्य-मीमांसायाम्' पाल्यकीर्तेः शाकटायनस्य वा मतमुपन्यस्यता प्रत्यपादि—

"यथातथा वाऽस्तु वस्तुनो रूपं वक्तृप्रकृतिविशेषायत्ता तु रसवत्ता तथा च यमर्थं रक्तः स्तौति तं विरक्तो विनिन्दति मध्यस्थस्तु तत्रोदास्ते, इति पाल्यकीर्तिः ।"[2]

इत्यनेन विवरणेन सुतरामेव ध्वन्यते यत्पाल्यकीर्तेः शाकटानस्य वा कश्चित् साहित्यविषयको ग्रन्थो नूनमेवासीत् परमद्यत्वे नोपलभ्यते ।

शाकटायन-शब्दानुशासनात्मको मौलः सूत्रपाठः—

शब्दानुशासनात्मकेऽत्र व्याकरणे नावलोक्यते प्रकरणानुसारी विभागः । पाणिनिरिव वैधानक्रममनुसृत्य सूत्राण्यत्र ग्रथितानि । प्रक्रिया-क्रममनुसृत्यैव शब्दानुशासनमिदं ग्रथितुमध्यवसितमत एव क्लिष्टताविप्रकीर्णतादयो दोषबाहुल्येनात्र दृग्गोचरीक्रियन्ते । शाकटायन-प्रत्याहारैः पाणिनीय-प्रत्याहारसाम्येऽपि क्वचिद् भिन्नत्वमप्यत्राक्षिलक्षीक्रियते । यथा खलु 'ऋ लृ क्' इत्यस्य स्थाने' 'ऋ क्' एव शाकटायन-शब्दानुशासने पाठोऽवलोक्यते, ऋलृवर्णयोरभेदाभावात् । 'हयवरट्लण्'त्यतो परस्परं सम्मेल्यैकमेव सूत्रं शाकटायनशब्दानुशासने समवलोक्यते । अपरञ्चोपान्त्य-'सूत्रे' शषसरित्यत्र जिह्वामूलीयोपध्मानीयावपि समावेशितौ । सूत्राणि सर्वथैवात्र विरुद्धानि दृश्यन्ते ।

शाकटायन-शब्दानुशासने कातन्त्र-व्याकरणस्य भूयानेव प्रभावोऽत्रावलोक्यते । किञ्च शाकटायन-शब्दानुशासनमध्यायचतुष्टयेषु षोडशेति संख्याकेषु च पादेषु विभक्तमवलोक्यते ।

यक्षवर्मणा शाकटायन-शब्दानुशासनमधिकृत्य ग्रथितायां 'चिन्तामणी'त्याख्यायां टीकायां व्याकरणस्यास्य वैशिष्ट्यं निरूपयता प्रत्यपादि—

---

१. "यल्लकीर्तिर्यथा रूढः पुरा व्याकरणे कृती ।
तथाभिमानदानेषु प्रसिद्धः पल्लपण्डितः ।" द्र० तत्रैव ग्रन्थे १५६ तमे पृ० ।

२. द्र०—श्रीनाथूराम प्रेमिकृते "जैन साहित्य और इति०" इति नाम्नि ग्रन्थे १५६ तमे पृ० ।

'इष्टिर्नेष्टा न वक्तव्यं वक्तव्यं सूत्रतः पृथक् ।
संख्यानं नोपसंख्याने यस्य शब्दानुशासने ॥
इन्द्र-चन्द्रादिभिः शाब्दैर्यदुक्तं शब्दलक्षणम् ।
तदिहास्ति समस्तं च यन्नेहास्ति न तत्क्वचित् ॥[1]

अयमाशयो यच्छाकटायन-व्याकरणे इष्टयो नेष्टाः । सूत्रवार्तिकादिभिर्यन्न संसाध्यते, भाष्यकारप्रयोगैश्च यत्खलु संसाध्यते, सेष्टीति संज्ञिता बुधैः । अपरञ्च 'सूत्रेणासङ्गृहीतं लक्ष्यं येन संगृह्यते तदुपलक्षणमिष्ट्युपसंख्यानग्रहणमिति पदमञ्जरी ।[2]

किञ्चोपसंख्यानमप्यत्र नोपसंख्यानम् । इन्द्र-चन्द्रादि-वैयाकरणैर्यच्छब्दलक्षणं प्रत्यपादि तत्समस्तमिह निगदितमवलोक्यते । 'यन्नेहास्ति न तत्क्वचिदि'त्यपि भगवता यक्षवर्मणा शाकटायन-व्याकरणमधिकृत्य ग्रथितायां चिन्तामणी'त्याख्यायां टीकायां न्यदर्शि । इदमप्यवितथमेव यत्पाल्यकीर्तिना शाकटायनेन वा पूर्ववर्तिवैयाकरणानां त्रुटयोऽप्यत्र यथावसरं निरवसिताः ।

२. **अमोघवृत्तिः**—इयं हि शाकटायनस्य पाल्यकीर्तेर्वा स्वोपज्ञा वृत्तिर्या खलु शाकटायनशब्दानुशासनमधिकृत्यैव स्वग्रथितेत्यूरीकरोति शाकटायनः । एषैव हि सूत्रकारस्य सुविशदा टीका या किल राष्ट्रकूटेश्वरममोघवर्षमभिलक्ष्यामोघवृत्तीति नाम्ना विद्वत्सु प्रथितेति । नृपोऽमोघवर्षस्तु ८७१ तमे वैक्रमाब्दे सिंहासनमध्यतिष्ठत् ।[3] तस्यैवेतस्तो वैक्रम्या नवम्यां शत्यां वा वृत्तिरेषा प्रणिबद्धेति ।

इतिवृत्तमुखेन सुविज्ञायते यद्विवङ्गतेन डा० के० बी० पाठकमहाभागेन सुष्ठुतया वृत्तिरेषा समपादि । वृत्तेरस्या आदावेव वृत्तिकारेण शाकटायनेन पाल्यकीर्तिना वा वृत्तेरस्या वैशिष्ट्यमधिकृत्य प्रत्यपादि—

श्रीवीरममृतं ज्योतिर्नत्वादिं सर्ववेधसाम् ।
शब्दानुशासनस्येयममोघा वृत्तिरुच्यते ॥

अविघ्नेनेष्टप्रसिद्ध्यर्थं मङ्गलमारभ्यते—

नमः श्रीवर्द्धमानाय प्रबुद्धाशेषवस्तवे ।
येन शब्दार्थसम्बन्धाः सार्वेण सुनिरूपिताः ॥"[4]

ततश्च स्वशब्दानुशासनगतो मङ्गलार्थः श्लोको व्याख्यात्रा शाकटायनेन पाल्यकीर्तिना वा 'अमोघवृत्तौ' न्यबन्धि "शब्दो वाचकः अर्थो वाच्यः तयोः सम्बन्धो योग्यता अथवा शब्दः आगमः अर्थः प्रयोजनम् । अभ्युदयो निःश्रेयसं च तयोः । सम्बन्ध उपायोपेयभावः ते येन सर्वसत्वहितेन सत्ता तत्त्वतः प्रज्ञापितः तस्मै परमार्हंत्यमहिम्ना विराजमानाय भगवते वर्द्धमानाय षडपि द्रव्याणि अशेषाणि अनन्तपर्यायरूपाणि साकल्येन साक्षात्कुर्वते नमः कुर्वे इत्युपस्कारः । एवं कृतमङ्गलरक्षाविधानः परिपूर्णमल्पग्रन्थं लघूपातं शब्दानुशासनशास्त्रमिदं महाश्रमणसंघाधिपतिर्भगवानाचार्यः शाकटायनः प्रारभते । शब्दार्थज्ञानपूर्वकं च सन्मार्गानुष्ठानम् । अ इ उ ण् । ऋक् । ए ओ ङ् । हल् ॥ १३ ॥ इति

१. द्र०—पं० अम्बालाल प्रे० शाह विर० 'जैन साहि० का बृ० इति०' इति ग्र० ५ भागे लाक्षणिक—साहि० १६ तमे पृ० ।
२. द्र०—'इष्ट्युपसंख्यानवती'ति वृत्तिस्थवाक्यव्याख्यानावसरे १ अ० १ पा० पदमञ्जर्यां मङ्गलाचरणे पञ्चमे पृ०,
३. द्र० पं० अम्बालाल प्रे० शाह विर० 'जैन साहि० का बृहद् इति' इति ग्रन्थे १६ तमे पृ० ।
४. द्र० श्रीनाथूराम प्रेमिविर० 'जैन साहि० और इति०' इति नाम्नि ग्रन्थे १६२ तमे पृ० ।

वर्णसमाम्नाय: क्रमानुबन्धोपादनः प्रत्याहारान् शास्त्रस्य लाघवार्थः । सामान्याश्रयणाद्दीर्घप्लुतानुनासिकानां ग्रहणम्'[1] अमोघवृत्तिः ।

तदेवं 'शब्दानुशासनस्येयममोघवृत्तिरुच्यते' इत्यनेन विवरणेनाध्यवसीयते यदमोघवृत्तिः स्वोपज्ञा शाकटायनप्रणिबद्धा चेति । किञ्च 'शब्दो वाचकः अर्थो वाच्यः तयोः सम्बन्धो योग्यता अथवा तयोः सम्बधः उपायोपेयभावः' इत्यनेनोपरितनेन विवरणेनापि तेषां शब्दार्थसम्बन्धे तद्द्वारा शब्दानुशासने च प्रावीण्यं स्फुटमेवावगम्यते । 'अ इ उ ण् । ऋ क् । ऐ ओ ङ् । हलि'त्येतैश्चतुर्भिर्वर्णसमाम्नायसूत्रैस्तेषु दीर्घप्लुतानुनासिकादीनां समावेशात्पाणिनीयशब्दानुशासनवैषम्याच्च स्वपाण्डित्यमेवोद्घोषितं शाकटायनेन पाल्यकीर्तिना वेति ।

३. स्त्रीमुक्ति—केवलिभुक्तिप्रकरणम्—इति वृत्तिवृद्धिः शाकटायनो दिगम्बर-श्वेताम्बरयोरतिरिच्य यापनीययति-ग्रामाग्रणीरेवानुमतः[2] । किञ्च यापनीयसम्प्रदायानुयानुयायिनो नारीणां तस्मिन्नेव भवे मोक्षमामनन्ति, केवलीनाञ्चाशनमेव मन्यन्ते । एतस्मिन्नेव विषये शाकटायनकृतः—'स्त्रीमुक्ति—केवलिभुक्तिप्रकरण'नामा लघीयानेव ग्रन्थः समुपलभ्यते, यश्चाधुना प्रकाश्यतां गतः । अत्र ग्रन्थे स्त्रीमुक्तिमधिकृत्य ५५ कारिकाः, केवलिभुक्तिञ्चाधिकृत्य ३४ कारिका दृग्गोचरीभवन्ति ।

ग्रन्थादस्मात्कश्चनांशोऽत्र प्रस्तूयते—

प्रारम्भः—प्रणिपत्य भुक्तिमुक्तिप्रदममलं धर्ममर्हतो दिशतः ।
वक्ष्ये स्त्रीनिर्वाणं केवलिभुक्तिं च संक्षेपात् ।।१।।

अस्ति स्त्रीनिर्माणं पुंवद्यदविकलहेतुकं स्त्रीषु ।
न विरुद्धयते हि रत्नत्रयसम्पत्तिर्वृत्तेर्हेतुः ।।२।।

अन्तः—विग्रहगतिमापन्नाद्यागमनवचनं सर्वमेतस्मिन् ।
मुक्तिं ब्रवीति तस्माद् द्रष्टव्या केवलिनि भुक्तिः ।।३२।।

नानाभोगाहारो निरन्तरः सोऽविशेषतो नाभूत् । (१)
युक्त्या भेदेनावगतिस्थितिपुष्टिक्षुच्छमास्तेन ।।३३।।

इति स्त्रीनिर्वाण—केवलिभुक्तिप्रकरणं भगवदाचार्यशाकटायनकृदन्तपादानामिति ।[3]

अपरञ्चात्रावधेयं यच्छाकटायन-शब्दानुशासनमधिकृत्याद्यावध्यधोऽङ्किताः केवलाः सप्त टीकाः समुपलभ्यन्ते, ताश्चात्र निबध्यन्ते—

१. अमोघवृत्तिः, २. शाकटायनन्यासः, ३. चिन्तामणिटीका, ४. मणिप्रकाशिका, ५. प्रक्रियासंग्रहः, ६. शाकटायनटीका, ७. रूपसिद्धिश्चेति ।

१. **अमोघवृत्तिः**—शाकटायनप्रणीतां वृत्तिमिमामधिकृत्यानुपदमेव विशदय्य प्रत्यपादि '

---

१. द्र० तत्रैव श्रीप्रेमिवि० इतिहासग्रन्थे १६१ तमे पृ० ।

२. 'शाकटायनोऽपि यापनीययतिग्रामाग्रणीः स्वोपज्ञशब्दानुशासनवृत्तावादौ भगवतः स्तुतिमेवाह ।' द्र० 'जैन साहि० और इति०' इति ग्रन्थे १५७ तमे पृ० ।

३. द्र० नाथूराम प्रेमि-विर०—'जैन साहि० और इतिहास' इति ग्रन्थे १५८ तमे पृ० मुम्बईतः प्रकाशिते ।

२. **शाकटायन-न्यासः**—अमोघवृत्तिमधिकृत्य श्रीप्रभाचन्द्रप्रणीते 'शाकटायन-न्यासे'[1]ति नाम्नि ग्रन्थे द्वावेवाध्यायौ प्राप्येते।

३. **चिन्तामणिटीका** (लघीयसी वृत्तिः)—ग्रन्थकर्ता यज्ञवर्मणा अमोघवृत्तिमेव संक्षिप्य 'चिन्तामणिटीके'ति नाम्नी लघीयसी वृत्तिर्न्यबन्धीति गम्यते।

४. **मणिप्रकाशिका**—अत्र ग्रन्थस्थितेन मणीत्यनेन चिन्तामणीत्यर्थो गम्यते। अतोहि 'मणिप्रकाशिकाख्ये' ति टीका भगवता जिनसेनेन न्यबन्धीति गम्यते।

५. **प्रक्रिया-संग्रहः**—श्रीमद्भट्टोजिदीक्षितप्रणीतां सिद्धान्तकौमुदीमिव श्रीअभयचन्द्रकृतः प्रक्रिया-सङ्ग्रहोऽपि प्रक्रियाटीकैवेति बोद्धव्यम्

६. **शाकटायनटीका**—'वादिपर्वतवज्र'-भावसेन-त्रैविद्यदेवकृतेयं 'शाकटायनटीके'ति बोद्धव्यम्। ग्रन्थकारस्यास्य 'विश्वतत्त्वप्रकाशे'ति नाम्ना ग्रन्थोऽपि समुपलभ्यते।

७. **रूपसिद्धिः**—लघुकौमुदीवल्लघीयसी टीकेयं द्रविड़सङ्घीयेन मुनिना दयापालेन[2] न्यबन्धीति गम्यते। टीकेयं प्राकाश्यतां नीतेत्यवधेयम्।

तदेवं शाकटायन-शब्दानुशासनमधिकृत्य तेनैव प्रणीताममोघवृत्तिमधिकृत्य श्रीयक्षवर्मग्रथितायाश्चिन्तामणिटीकाया आद्योपान्ताध्ययनेनाध्यवसीयते यन्महाश्रमणसङ्घाधिपतिः सकलज्ञानसाम्राज्येश्वरः श्रीशाकटायनः पाल्यकीर्तिर्वा स्वबुद्धिमन्दरेण शब्दाम्बुधिं प्रमथ्य विश्वं व्याकरणामृत समुद्दध्रे[3]। अत्र च तत्प्रणीतस्य शाकटायन-शब्दानुशासनस्य तद्व्याकरणञ्चाधिकृत्य प्रणीतानां सप्त ग्रन्थानां पर्यालोचनात्मकमध्ययनं मया शाब्दिकानां जिज्ञासूनाञ्च पुरः सम्प्रस्तुतम्। शाकटायन-शब्दानुशासनञ्च प्रति भगवान् पाणिनिरपि बद्धादर एवेत्यलम्।

---

१. "सूत्राणाञ्च विवृतिर्विख्यातं च यथामतिः।
ग्रन्थस्यास्य च न्यासेति (१) क्रियते नामनामतः॥" द्र०—'जैन साहि० और इति०' इति ग्रन्थे टिप्पणभागे १६० तमे पृ०।

२. 'हितैषिणां यस्य नृणामुदात्तवाचा निबद्धाहितरूपसिद्धिः।
वन्द्यो दयापालमुनिः स वाचा सिद्धस्सताम्मूर्द्धनि यः प्रभावैः॥"
द्र० श्री नाथूरामप्रेमिकृते 'जैन साहि० और इतिहास' इति नाम्नि ग्रन्थे १६० तमे पृ० टिप्पणभागे।

१. "एकः शब्दाम्बुधिं बुद्धिमन्दरेण प्रमथ्य यः।
सयशः श्रीः समुद्दध्रे विश्वं व्याकरणामृतम्।"
द्र० यक्षवर्मप्रणीता 'चिन्तामणिटीका'। अपि च 'जैन साहि० और इतिहा०' इति नाम्नि ग्रन्थे १६२ तमे पृ०।

संस्कृते जैनसाहित्यम् : विहगावलोकनम्

प्रो० श्रीरञ्जनसूरिदेवः

संस्कृतभाषायां परिनिबद्धस्य जैनसाहित्यस्य प्राचुर्यं वरीवर्त्तीति । संस्कृते हि धर्मदर्शनातिरिक्तं काव्य-कोश-छन्दोऽलङ्कार-ज्यौतिषायुर्वेदमुद्राशास्त्रप्रभृतिविषयानाश्रित्य विपुलग्रन्थाः रचिताः । गृद्धपिच्छाचार्येण हि खृष्टाब्दस्य प्रथमशताब्द्यां 'तत्त्वार्थसूत्रं' विनिर्मितम् । सूत्रशैल्यां निबद्धोऽयं ग्रन्थः जैनदार्शनिकग्रन्थेषु सर्वप्रथमं स्थानमलङ्करोति । नातिदीर्घेऽस्मिन् (दशाध्यायपरिमिते) आद्ये जैनदर्शनग्रन्थे सातिशयनिपुणतया सम्पूर्णं जैनतत्त्वज्ञानं विनिवेशितमस्ति । जैनसिद्धान्तसागरे प्रविविक्षूणां कृते प्रस्थानत्रयीसमोऽयं ग्रन्थ इति सुनिश्चितम् ।

गृद्धपिच्छानन्तरं संस्कृतभाषाया द्वितीयो जैनदार्शनिकः समन्तभद्र इति । अस्य कालः खलु खृष्टाब्दस्य द्वितीयं शतकम् । अयं हि 'स्वयम्भूस्तोत्र-स्तुतिविद्या-देवागमस्तोत्र-युक्त्यनुशासन-रत्नकरण्डश्रावकाचार-जीवसिद्धि-तत्त्वानुशासन-प्रमाणपदार्थ-कर्मप्राभृतटीका-गन्धहस्तिभाष्या'दिकान् महद्वैशिष्ट्योपेतान् ग्रन्थानररचत् ।

समन्तभद्रानन्तरं सिद्धसेनाचार्यो हि दार्शनिकपदे प्रतिष्ठितः । अनेन हि 'द्वात्रिंशतिका' विरचिता । अस्मिन् ग्रन्थे काव्यमनोहरं दर्शनतत्त्वं समुपलभ्यते । अतः परं संस्कृतजैनाचार्येषु देवनन्दिपूज्यपादमहोदयस्य भूयसी प्रतिष्ठा वर्त्तते । अयं खलु युगपदेव कविर्वैयाकरणो दार्शनिकश्चाप्यासीत् । अस्य समयः विक्रमाब्दस्य पञ्चमतशतकस्योत्तरार्द्धम् । 'जैनेन्द्रव्याकरण-सर्वार्थसिद्धिसमाधितन्त्र-इष्टोपदेशा' तिरिक्तं 'दशभक्ति'रित्याख्यो ग्रन्थोऽपि ह्यनेन रचितः ।

पात्रकेसरि-मानतुङ्गौ सप्तमशतकस्याचार्यौ स्तः । मानतुङ्गस्य सुप्रसिद्धं 'भक्तामरस्तोत्र'काव्यं सर्वविदितमस्ति । तीर्थङ्कर-चक्रवर्त्ति-नारायण-प्रतिनारायणप्रभृतिमहापुरुषाणां चरितानां काव्यरूपेण निबन्धनस्य परम्परा सप्तमशतकात्प्रारब्धा । रविषेण-जयसिंहनन्दिप्रभृतयस्तद्विधा एव कवयः सन्ति । ये खलु रामायणशैलीमाश्रित्य स्वं स्वं प्रबन्धं चक्रुः । विमलसूरेः प्राकृतनिबद्धा 'रामकथा' रविषेणेन संस्कृतभाषायां ललितछन्दःसु प्रतिनिबद्धा । जयसिंहनन्दिनः 'वराङ्गचरितं' काव्यं महाकाव्यरूपेण प्रतिष्ठितमस्ति । वराङ्गचरितमहाकाव्यमष्टमशतकस्य संस्कृतेः समाजस्य चाध्ययनदृष्ट्या निरतिशयं महत्त्वपूर्णम् ।

